TRIVANDRUM SANSKRIT SERIES

No. L[illegible]

श्रीभोजदेवप्रणीतः

तत्त्वप्रकाशः

श्रीकुमारविरचितया तात्पर्यदीपिकाख्यया व्याख्यया समेतः।

THE

TATTVAPRAKÂSA

OF

SRÎ BHOJA DEVA

WITH THE COMMENTARY

TÂTPARYADÎPIKÂ OF SRÎKUMÂRA

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1920.

TRIVANDRUM SANSKRIT SERIES
No. LXVIII

THE TATTVAPRAKÂŚA

OF

SRÎ BHOJA DEVA

WITH THE COMMENTARY
TÂTPARYADÎPIKÂ OF SRÎKUMÂRA

EDITED BY

MAHÂMAHOPÂDHYÂYA
T. GAṆAPATI SÂSTRÎ
Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1920.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ६८.

तत्त्वप्रकाशः

श्रीभोजदेवप्रणीतः

श्रीकुमारविरचितया तात्पर्यदीपिकाख्यया व्याख्यया समेतः ।

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितः ।

कोल्लम्बाब्दाः १०९५, क्रैस्ताब्दाः १९२०.

PREFACE.

Tattvaprakâsa is a rare ancient work on the Saiva System of Philosophy. The author of the work is King Bhoja Deva. It is probable that he is the same as the Bhoja Deva, the reputed author of Sarasvatîkanthâbharana, Sringâraprakâsa, Pâtanjalasûtravritti and other works, as the latter is well-known to have been a master of varied branches of learning. There were three kings of the name of Bhoja in the Parmar Dynasty; one of them lived about 575 A. D., the other about 665 A. D., and the third about 1,044 A. D.; but it is not certain which of them is the present author. The work is cited as authority in the Saivadarsana of the Sarvadarsanasangraha.

The author of the commentary Tâtparyadîpikâ is Srîkumâra. It is not known when and where this commentator lived, but it is certain that he is later than Paramesvarâchârya the author of the Laghu Brihmini, a commentary on the Laghustuti, as the Laghu Brihmini is quoted in the present commentary.

The edition of this work with commentary is based on the following three manuscripts:—

1. (क) Lent by Mr. Anantakrishna Sastri of Ariyanayakipuram.
2. (ख) Belonging to Mr. Maheswaran Bhattathiri, Thiruvalla.
3. (ग) Do. Do. Do.

All these manuscripts are in Malayalam characters on palm-leaves, and the first is an extremely worn-out one.

Trivandrum,
5th February 1920.

T. GANAPATI SÂSTRÎ.

निवेदना ।

तत्त्वप्रकाशो नामायमपूर्वोपलब्धः पुरातनो ग्रन्थः पाशुपतदर्शन-गतानि तत्त्वानि संक्षिप्य प्रतिपादयति ।

अस्य ग्रन्थस्य प्रणेता श्रीभोजदेवनृपतिः सरस्वतीकण्ठाभरण-शृङ्गारप्रकाश-पातञ्जलसूत्रवृत्त्यादिकर्तुर्भोजदेवादभिन्नः सम्भाव्यते, यतो भोजदेवस्य सर्वतन्त्रस्वतन्त्रत्वख्यातिरस्ति । भोजदेवाश्च परमारवंश्यास्त्रय आसन् एकः ३१७७तमे कलिवर्षे, अपरः ३७६७तमे, अन्यः ४१४६तमे । तेषु प्रकृतः कतम इत्यनिश्चयः । किन्त्वयं ग्रन्थः सर्वदर्शनसङ्ग्रहे शैवदर्शने स्मर्यते ।

एतद्व्याख्यायास्तात्पर्यदीपिकायाः कर्ता श्रीकुमारः कुत्र कदा स्थित इति न ज्ञायते । किन्तु लघुस्तुतिव्याख्यां लघुबृंहणीं स्मरन्नयं लघु-बृंहणीकारात् परमेश्वराचार्यादर्वाचीनः ।

सव्याख्यस्य तत्त्वप्रकाशस्य संशोधनाधारभूतास्तु ग्रन्था एते—

१. श्रीयुतैः (हरनायर्कीपुरम्) आर्. अनन्तकृष्णशास्त्रिभिरुपकृतः क.संज्ञः (जीर्णत्रुटितपत्रः) ।

२. श्रीयुत-(तिरुवल्ला) महेश्वरभट्टतिरिसम्बन्धी ख.संज्ञः ।

३. तथा ग.संज्ञः ।

सर्व एते केरलीयलिपयस्तालपत्रात्मकाश्च ।

अनन्तशयनम्
५-१-१९२०

त. गणपतिशास्त्री.

विषयानुक्रमणी।

प्रथमः परिच्छेदः।

अथ तृतीयः परिच्छेदः।

अथ चतुर्थः परिच्छेदः ।

अथ पञ्चमः परिच्छेदः ।

तत्त्वप्रकाशव्याख्यायां स्मृता ग्रन्थाः ।

तत्त्वप्रकाशव्याख्यायां स्मृता ग्रन्थकर्तारः ।

॥ श्रीः ॥

श्रीभोजदेवप्रणीतः

तत्त्वप्रकाशः

श्रीकुमारविरचितया तात्पर्यदीपिकाख्यया व्याख्यया समेतः ।

नमः शर्वाय देवाय कारणत्रयहेतवे ।
निर्मलाय सदानन्दचित्स्वरूपाय शम्भवे ॥
शक्तिं सदाशिवं चेशं नत्वा देवीं सरस्वतीम् ।
तत्त्वप्रकाशतात्पर्यदीपिका क्रियते मया ॥

प्रारिप्सितस्यास्य शास्त्रस्याविघ्नेन परिसमाप्तिप्रचयगमनाद्यर्थम् इष्टदेवतास्तुतिं करोति —

चिद्घन एको व्यापी नित्यः सततोदितः प्रभुः शान्तः ।
जयति जगदेकबीजं सर्वानुग्राहकः शम्भुः ॥ १ ॥

इति । नन्विष्टदेवतास्तुतिनमस्कारादेः शास्त्रपरिसमाप्तिप्रचयगमनादिहेतुता कुतोऽवगम्यते । शिष्टाचारानुमितादागमादिति ब्रूमः । शास्त्राद्यारम्भे शिष्टैरिष्टदेवतास्तुतिनमस्कारादेः क्रियमाणस्य तदिष्टपरिसमाप्त्यादिहेतुतां विना न सम्भवः । तेनास्य तद्धेतुत्वम् । तच्चागमादेवावगम्यते । अन्यस्य प्रमाणस्यात्रासम्भवात् । तथा

"मङ्गलाचारयुक्तानां, विनिपातो न विद्यते ।"

G. P. T. 2869. 500. 1-6-18. B

इति स्मृतेश्च तदवगमः । तथा परिसमाप्तेः कादाचित्कतया कारणापेक्षा । तच्चान्यस्यासम्भवान्नमस्कारादिजनितो धर्मविशेष इति कल्प्यते । कथं तस्य तद्धेतुत्वमिति चेद्, उच्यते । नमस्कारादिः कायिको वाचिको मानसो वा धर्मविशेषं सम्पादयन् विघ्नहेतुभूतमधर्मं पर्यस्य परिसमाप्त्यादिहेतुतामधिगच्छति, तस्येष्टत्वादिष्टहेतुत्वाच्च धर्मस्येति । कथं तर्हि क्वचित् कृते नमस्कारे परिसमाप्त्यभाव इति चेत्, तद्वैगुण्यादिति ब्रूमः । यथा कारीर्यादौ वृष्ट्यादिसाधनेऽनुष्ठिते वृष्ट्याद्यभावात् तद्वैगुण्यकल्पना, प्रतिबन्धकाधर्मप्राचुर्यकल्पना वा । एवमत्रापीति न विरोधः । कथं तर्हि नमस्काराद्यभावे क्वचित् परिसमाप्तिः, कारणाभावे कार्योत्पत्त्यसम्भवादिति चेद्, नैवम् । तत्र वाचिकनमस्काराभावेऽपि कायिकमानसादेरनुमेयत्वाद्, अन्यथा परिसमाप्तेरसम्भव इति । ननु तर्हि स एवास्त्वत्रापि, किं वाचिकेन ग्रन्थप्राचुर्यसम्पादकेनेति चेद्, नैवम् । वाचिके प्रयोजनान्तरसम्भवेन तदुपादानात् । तथाहि — यस्तु विस्मृत्येष्टदेवतास्तुतिनमस्कारादिं श्रवणे प्रवर्तते, तेनाप्याद्यश्लोकत्रयपाठमात्रादेव नमस्कारः कृतो भवतीति प्रयोजनान्तरसम्भवात् तदुपादानमिति न कश्चिद् विरोधः । अथ पदार्थः — चिद्घन इति चैतन्यघनः, चैतन्यसारः, चिन्मात्र इति यावत् । "अथैष एव परमानन्दोऽनन्तरोऽपारो विज्ञानघन" इत्यादिश्रुतेः,

"आद्यन्तरहितं शुद्धं चिदानन्दमयं शिवम्"

इत्यादिस्मृतेश्च भगवतः शम्भोश्चिद्रूपत्वं सिद्धम् । तथा शिवेन सूत्रकर्त्रा 'चैतन्यमात्मे'त्यनेन प्रथमसूत्रेणात्मनश्चैतन्यरूपत्वमुपवर्णितमित्युपपन्नं चिद्घन इति । एक इति अद्वितीय इत्यर्थः । 'एकमेवाद्वितीयम्', 'अहमेकः प्रथममासं वर्तामि च भविष्यामि च । नान्यः कश्चिन्मत्तो व्यतिरिक्तः' इत्यादिश्रुतेः । तथा 'एको रुद्रो न द्वितीयाय तस्थुरि'ति श्वेताश्वतरे । 'एक एव रुद्रो न द्वितीयाय तस्थे' इति त्रैयम्बकाध्याये । नीलरुद्रे च — 'सर्वो रुद्रस्तस्मै रुद्राय नमोऽस्त्वि'त्यादिनाद्वितीयत्वप्रतिपादनादुपपन्नं शिवाद्वितीयत्वमिति । न च प्रत्यक्षादिप्रमाणैरनेकार्थावभासादनुपपन्नं शिवाद्वितीयत्वमिति वाच्यम् । एकस्याप्यवस्थानभेदेनानेकधा भासनोपपत्तेः । यथैकस्यैव मृत्पिण्डस्य घटशरावकुम्भकुड्यमृदङ्गाद्यात्मनावस्थानभेदवशेनानेकधा भासनं, सुवर्णपिण्डस्यैकस्यैवाङ्गुलीयकरुचककटकमकुटाद्यवस्थानभेदवशेन, एवमेकस्यैव सतो रुद्रस्य घटः सन् पटः सन् कुसूलः सन् अस्तीत्यादिप्रत्यक्षतोऽखिलरूपतयावभासस्य 'एकं सद् विप्रा बहुधा वदन्ति', 'एकं सन्तं बहुधा कल्पयन्ती'त्यादिश्रुतितश्चावस्थानभेदवशेनानेकधा भासनमुपपद्यत इति न प्रत्यक्षादि(विरोध)सम्भवः । अपौरुषेयतयासम्भवद्दोषेण स्वतःप्रमाणभूतेन प्रबलेन वेदराशिना शिवाद्वितीय(त्व)स्य सिद्धत्वात् तद्विपरीतदुर्बलप्रत्यक्षादिसिद्धानेकत्वस्य बाध्यत्वाच्च । तथाहि वेदवाक्यानामपौरुषेयत्वं प्रतिपाद्यते । तेनाप्रामाण्यकारणानामज्ञानरागद्वेषादीनां वेदवाक्येऽसम्भवाद्प्रामाण्यासम्भवः । न हि शब्दे स्वतो दोषः सम्भवति ।

आप्तानाप्तवाक्ययोः प्रामाण्याप्रामाण्यनियमसम्भावनात् । न हि वक्तृगतदोषतदभावानुसारं विना स्वतो दोषगुणाभ्यां प्रामाण्याप्रामाण्ययोरभ्युपगमे तन्नियमः सम्भवति, आप्त्यनाप्त्योस्तदकारणत्वात् । नित्यस्य वेदराशेरनाप्तकृतत्वाभावेनाप्रामाण्यासम्भवात्, स्वतःप्रमाणत्वे सति तत्सिद्धशिवाद्वितीयत्वस्य प्रबलप्रमाणसिद्धत्वान्न प्रत्यक्षादिविरोधसम्भवः । न च कर्त्रभावेन गुणस्याप्यभावात् प्रामाण्यस्याप्यभाव इति वाच्यम् । व्युत्पन्नपदपदार्थस्य तद्वाक्यश्रवणसमनन्तरमेव तदर्थविषयप्रमोत्पत्तेरुपलम्भात् । गुणसद्भावश्च न प्रामाण्यकारणम्, अप्रामाण्यकारणभूतदोषपरिहारार्थत्वादिति । तथा तत्परवेदसिद्धत्वाच्च शिवाद्वितीयत्वस्य न प्रत्यक्षादिबाधः । शिवाद्वितीयताप्रतिपादकस्य वाक्यस्य तत्र तात्पर्यं षड्विधलिङ्गसद्भावादवगम्यते । तदुक्तं न्यायविद्भिः —

"आदिमध्यान्तसङ्गानमभ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥"

इति । एतानि लिङ्गानि रुद्राद्वितीयताप्रतिपादकश्रुतौ सन्त्येव । तथाहि — 'सर्वो वै रुद्रः', 'पुरुषो वै रुद्रः', 'सर्वो ह्येष रुद्रः' इत्यादिमध्यान्तसङ्गानाख्यं तात्पर्यलिङ्गमुपलभ्यते । तथा 'सर्वो वै रुद्रः', 'सर्वो ह्येष रुद्रः' इत्यसकृदुपदेशादभ्यासलक्षणं च तात्पर्यलिङ्गं सिद्धम् । तथा 'विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रः' इत्यादिश्रुतेरज्ञातार्थत्वरूपं च तात्पर्यलिङ्गं सिध्यति । तथा 'तमेवं विद्वानमृत इह भवति', 'विद्यया विन्दतेऽमृतम्', 'आत्मा

ज्ञातव्यः', 'तरति शोकमात्मवित्', 'न च पुनरावर्तते', 'भूयश्चान्ते विश्वमायानिवृत्तिः', 'य एवैक उद्भवे सम्भवे च', 'य एतं विदुरमृतास्ते भवन्ति' इत्यादिभिः शिवात्मैकत्वज्ञानस्य फलश्रवणात् तत्प्रतिपादकश्रुतीनां तत्र तात्पर्यसिद्धिः। 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति स्तुत्यर्थवादसद्भावादेकत्वे तच्छ्रुतेस्तात्पर्यं सिध्यति। तथा 'य एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति' अविदुषस्त्वथ तस्य भयं भवतीत्यादिनिन्दार्थवादसद्भावाच्च तत्सिद्धिः। तथा 'सर्वो वै रुद्रः' इत्यादिवाक्यसिद्धं रुद्रस्य सर्वात्मकत्वं वाक्यान्तरेण 'पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यमि'त्यनेन विरुध्येत। तत्र 'पुरुषो वै रुद्रः' इत्यविरोधोपपादनादुपपत्त्याख्यं च तात्पर्यलिङ्गं सिध्यति। तथा 'सदेव सोम्येदमग्र आसीदि'त्यादिवाक्यान्तरसिद्धसदद्वितीयत्वविरोधं च परिहरद् 'रुद्रः सन्नि'ति वाक्यमुपपादकम्। तथा 'वेदाहमेतं पुरुषं महान्तम्' इत्यादिना 'नान्यः पन्था अयनाय विद्यते' इत्यन्तेन श्रुतिवाक्येन सिद्धमहापुरुषाद्वयत्वविरोधं च 'रुद्रः सन् मह(?)' इति वाक्यं परिहरदुपपादकम्। तेन सुतरां रुद्राद्वितीयत्वेऽस्याः श्रुतेस्तात्पर्यसिद्धिः। तदेतदनुवादसिद्धं शिवाद्वितीयत्वमाश्रयणीयम्। अन्यथा तदानर्थक्यादिति। तदुक्तमार्याकारेण —

"अज्ञातोऽर्थः फलवानसकृत् सम्भावितश्च दृष्टान्तैः।
पौर्वापर्यानुगतः श्रुतः कथं कथ्यते तथा नेति॥"

इति। तस्मान्न प्रत्यक्षादिना दुर्बलेन बाधावकाश इति।

प्रधान इति वा, 'नत्वा ओजीयो रुद्र! त्वदस्ति', 'भीषास्माद् वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः' इत्यादितैत्तिरीयात् श्वेताश्वतराच्च सर्वप्राधान्यं भगवतो महेश्वरस्य रुद्रस्यावगम्यते। तथाहि—'य एवैको जालवानीशत इशनीभिः सर्वान् लोकानीशत ईशनीभिरि'त्यादि।

"सर्वस्मादधिकत्वं ये न वदन्ति पिनाकिनः।
साधारणं स्मरन्त्येनं सदारस्त्वं समाविश॥"

इत्युक्तं लैङ्गे पुराणे। तस्मात् तत्प्राधान्यं श्रद्धातव्यमिति। व्यापीति। व्यापोऽस्यास्तीति व्यापी, सर्वगत इत्यर्थः। अगत्वा सर्वमूर्त[2]संयोगित्वं सर्वगतत्वम्। अगमनं च सर्वत्रसद्भावाद् गगनवदिति, 'आकाशवत् सर्वगतश्च नित्यः' इत्यादिश्रुतेः,

"स हि सर्वेषु भूतेषु स्थावरेषु चरेषु च।
वसत्येको महावीर्यो नानाभावसमन्वितः॥"

इत्यादिस्मृतेश्च। न चाकाशवदेवास्य जडत्वमिति वाच्यम्। चिद्रूपताप्रतिपादकश्रुतिविरोधात्। अथवा व्यापित्वं सर्वस्वरूपत्वमेकत्वे हेतुतयोक्तम्। तच्च

"स इज्ज्योतिः स यजमान आसीत्
सो मातरिश्वा स उदेति सूर्यः।
स चन्द्रमाः स पृथ्वी जलाषः
स आकाशो विश्वा भुवना विवेश॥"

---

१. 'म' ख. पाठः. २. 'र्ते' ग. पाठः.

इति मूर्त्यष्टकप्रतिपादकलिङ्गसूक्तिश्रुतिसिद्धम् । नित्य इति । अविनाशीत्यर्थः । 'क्षरं प्रधानममृताक्षरं हरः' इति श्वेताश्वतरश्रुतेः । कालत्रयव्यापित्वं वा नित्यत्वं तद्राहित्यं वा । 'सर्वेषु कालेष्वनुसन्ततात्मे'त्यादिश्रुतेः, 'परस्त्रिकालादकलो हि दृष्ट' इत्यादिश्वेताश्वतरश्रुतेश्च तदवगमः । सततोदित इति । सततं सर्वदा उदयः प्रकाशो यस्यासौ तथोक्तः । अनुदितास्तमितप्रकाशः, स्वयंप्रकाश इत्यर्थः । 'अत्रायं पुरुषः स्वयंज्योतिः' (इति श्रुतेः), 'सर्वगः पुरुषः पर' इतीश्वरगीतास्मृतेश्च तदवगमः । प्रभुरिति । कर्तृकर्मकरणादिसकलकारकार्थवाहित्वरूपाप्रतिहतैश्वर्यं प्रभुत्वम् । तच्च 'यथोर्णनाभिः सृजत्येवमेवासौ सृजती'ति श्रुतेः,

"संसारहेतुः संसारो मोक्षहेतुश्च निर्वृतः"

"प्रजायसे[२] जनयसि जन्यसे मुहुः"

इत्यादिस्मृतितश्च सिद्धम् । करणादिं विना सकलकार्यजनकत्वं वा । तच्च 'आत्मा वा इदमेकमेवाग्र आसीन्नान्यत् किञ्चन मिषत् । स ईक्षत लोकान्नु सृजा इति । स इमाँल्लोकानसृजत' इत्यादिश्रुत्यवगतम् । निष्क्रियकर्तृत्वं वा ।

"यथा मणिरयस्कान्तसान्निध्यादुपकारकः ।
अयसश्चलतस्तद्वच्छिवोऽप्यस्येति सूरयः ॥
यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते ।
मनसो नोपकर्तृत्वात् तथासौ परमेश्वरः ॥"

---

१. मेकर्तृकर' ग. पाठः. २. 'ते स ज' ख. पाठः.

इत्यादिपुराणागमादवगतं तस्य तत्प्रभुत्वं, श्रमाद्यसम्भवात् । सव्यापारकर्तृत्वस्याप्रभुत्वरूपता च श्रमादियोगात् । तत्र हेतुमाह—शान्त इति । सर्वव्यापाररहितः शिवो यतः, अतोऽसौ प्रभुरिति । अथवा जगत्सृष्टिस्थितिध्वंसादिकर्मसम्बन्धवशात् कर्मवश्यशरीरादिप्रसङ्गेन या संसारित्वप्रसक्तिर्भगवतः, सा च निषिध्यते शान्त इति । सर्वक्रियारहिततयोदासीनस्वभावस्य परमेश्वरस्य सर्वज्ञस्य न परगतक्रियया संसारसम्भव इति ।

"निष्कलं निष्क्रियं शान्तं निर्गुणं तं निरञ्जनम्[2] ।"

इत्यादिश्रुतेस्तदवगमात् । तथा

"पश्यन्ति ऋषयो मुक्ताः स्वात्मानं परमार्थतः ।
विकारहीनं निर्दुःखानन्दमात्मानमव्ययम् ॥"

इतीश्वरगीतास्मृतेश्च । मुक्त इति वा ।

"तदेकमजमव्यक्तं नित्यलुप्तमलुप्तदृक्"

इत्यादिश्रुतेः,

"अहं ब्रह्माव्ययः शान्तो निर्मूलो निष्क्रियोऽव्ययः ।
एकाकी भगवान् मुक्तः केवलः परमेश्वरः ॥"

इत्यादिस्मृतेश्च तदवगमः । जयतीति । सर्वोत्कर्षेण वर्तेत इत्यर्थः । 'यस्मात् परं नापरमस्ति किञ्चित्' 'अणोरणीयान् महतो महीयानि'त्यादिश्रुतेस्तदवगमात् ।

"सर्वेन्द्रियेभ्यः परमं मन आहुर्मनीषिणः ।
मनसश्चाप्यहंकारः अहङ्कारान्महान् परः ॥

---

१. 'त स्व' ख. पाठः. २. 'न्तरम्' क. पाठः.

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषाद् भगवान् प्राणस्तस्य सर्वमिदं जगत् ॥
प्राणात् परतरं व्योम व्योमातीतोऽग्निरीश्वरः ।
ईश्वरान्न परं किञ्चित् ॥"

इत्यादिस्मृतेश्च । (सो?स्वो)पासकानां श्रवणाद्युपजातपरमार्थदर्शने ज्ञानादेरभिभवादभिभवो वा जयतेरर्थः । तथा सर्वमात्मनो वशे कृत्वा वर्तत इति वशीकारो वा । तथा लयोदये निखिलकार्यजालं स्वात्मन्येव स्वीकृत्यास्त इति स्वीकारो वा । जगदेकबीजमिति । जगतः कालादेः कार्यजातस्य ए(तत्? कं) प्रधानं बीजं कारणं, मूलकारणमिति यावत् । अथवा जगतामेकः कर्ता च बीजमुपादानं चेति जगदेकबीजं, निमित्तोपादानभूत इति यावत् । 'यतो वा इमानि भूतानि जायन्ते', 'यत् प्रयन्त्यभिसंविशन्ति',

"एको रुद्रो मृत्युरव्यक्तमेकं बीजं विश्वमेकः स एव"

इत्यादिश्रुतेः,

"अस्माद्धि जायते सर्वमत्रैव प्रविलीयते"

इतीश्वरगीतास्मृतेश्च परमेश्वरस्य जगदुपादानभावो गम्यते। तथा 'द्यावाभूमी जनयन् देव एकः', 'भुवनस्य पितरं गीर्भिराभिः स विश्वकृद्विश्वविदात्मयोनिः' इत्यादिश्रुतेः, 'सर्गकाले च करोति सर्गम्' इत्यादिस्मृतेश्च तस्य निमित्तभावोऽवगम्य इति मायाशरीरस्य परमेश्वरस्य जगन्निमित्तत्वोपादानत्वे सम्भवत इति न विकारित्वादिप्रसङ्गः । सर्वानुग्राहक इति । सर्वेषां चेतनानामचेतनानां चानुग्रहं मोक्षाद्यं करोतीति तथोक्तः । वक्ष्यति च — भुक्ति

मुक्तिमणूनामिति । ननु यदि स्वप्रयोजनार्थमनुग्रहकरणं, तर्हि सर्वान(न्द)त्वहानिः, तत्साध्यसुखस्य तदुत्पत्तेः प्राग(स)त्त्वात् । स्वप्रयोजनाभावे तु प्रवृत्त्यसम्भवः । तदुक्तं न्यायविद्भिः —

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।
यदि प्रयोजनोद्देशो हीयेतानन्दरूपता ॥"

इति । नैवम् । करुणया स्वभावतो वा प्र(वृ)त्त्युपपत्तेः । ननु यदि करुणयानुग्रहकरणं, तर्हि मोक्षमेवासौ सृजेत्, न संसारात्मकं जगत्सर्जनं, तस्यान्याय्यत्वात् । तथाहि — दुःखदर्शनपूर्वकं करुणया प्रवर्तमानानां तद्दुःखसंप्रहाणायैव प्रवृत्तिरुचिता, न तद्दुःखसम्पादनाय । अतो न युक्तं दुःखात्मकं जगत्सर्जनम् । नैव(म् । अ)ज्ञाननिवृत्त्यात्मकस्यापवर्गस्य ज्ञानतत्कारणाद्यपेक्षत्वेन जगत्सर्जनोपपत्तेः । तथाहि — ज्ञानं तावदपरोक्षभूतमपवर्गकारणम् । आपरोक्ष्यं च निदिध्यासनेनाविद्यासंस्कारतिरस्कारे सत्युद्भवति । निदिध्यासनं च श्रवणमननाभ्यां शिवात्मज्ञाने सञ्जाते सम्भवति । ते चान्तःकरणशुद्धितः सञ्जायेते । सा काम्यप्रतिषिद्धकर्मपरिहारेण नित्यनैमित्तिककर्मानुष्ठानाद् भवति । तदनुष्ठानं पशुसस्यराजरक्षादिपूर्वकम् । अतो यदिदं तत् सर्वं मोक्षशेषमिति न व्यर्थं जगत्सर्जनम् । कामनाश्रुतयश्चैहिकफलाः 'चित्रया यजेत पशुकाम' इत्यादय ऐहिकफलनिविष्टचित्तान् विप्रान् वैदिकमार्गे प्रवर्तयितुं प्रवृत्ताः, स्वर्गफलाश्च तदुत्सुकानिति । ये च शत्रुनाशोत्सुकास्तान् वैदिकमार्गे प्रवर्तयितुं श्येना-

(चि ? जि)राद्यभिचारकर्मविधयश्चेति । ततश्च विहितस्नानपापक्षयकर्मानुष्ठानान्वाधानाग्निहोत्रादिना क्रमान्मनश्शुद्धिसम्भवे सति कामनानिवृत्तौ नित्यनैमित्तिककर्मानुष्ठानाद् आत्मविविदिषारूपान्तःकरणशुद्ध्युद्भवे श्रवणमननाभ्यां शिवात्मज्ञाने संजाते निदिध्यासनाभ्यासादविद्यातत्संस्कारापनयना(न)न्तरं शिवात्मापरोक्ष्ये सति मोक्ष इति । तदुक्तं मोक्षधर्मादौ —

"सर्वत्र विहितो धर्मः स्वर्गः सत्यफलोदयः ।
बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया ॥"

इति । अत्र ये महेश्वरनियुक्ते श्रौते स्मार्ते वा कर्मणि प्रवर्तन्ते, ते मुच्यन्ते । ये तु न प्रवर्तन्ते, ते संसरन्ति । तदुक्तमैतरेयोपनिषदादौ — "एष पन्था एतत्कर्म तस्मान्न प्रमाद्येत नातीयात् न ह्यत्यायत् पूर्वे येऽत्यायंस्ते पराबभूवुः" इत्यादि । अनुग्रहस्वभावत्वाद्वा प्रवृत्तिः । तदा च तस्य कारणापेक्षितया न सकलजगन्मोक्षप्रसङ्गः । तदुक्तं श्रीवायवीये —

"अनुग्रहस्वभावत्वे न सर्वान्मोचयेच्छिवः ।
स्वभावोऽपि हि भावानां भाविनोऽर्थस्य कारणम् ॥
न हि स्वभावतोऽसन्तमर्थं कर्तैव साधयेत् ।
यथा विकासयत्येव रविः पद्मानि भानुभिः ॥
समं न विकसन्त्येव स्वस्वभावानुरोधतः ।
एवं पक्वमलानेव मोचयेन्न शिवः परान् ॥"

इत्यादि । शम्भुरिति । शं सुखं तस्मिन् भवतीति शम्भुः, स्वयमानन्दरूप इत्यर्थः । 'विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुतेः, 'आनन्दमजमव्यक्तं निष्कलं तदुदाहृतामि'त्यादीश्वर-

गीतास्मृतेश्च तदवगमः। ननु शिवस्यानन्दमयत्वे प्रीत्यात्मकसत्त्वगुणरूपत्वेन सगुणत्वात् परिणामादिदोषप्रसङ्गः। तथाहि सांख्याचार्यैरुक्तं —

"प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।
अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥"

इति। नैवम्। प्रीत्यानन्दशब्दयोर्भिन्नार्थत्वात्। तथाहि — विषयेन्द्रियसम्प्रयोगजन्यानित्यसातिशयसुखं प्रीतिशब्देनोच्यते, सततैकरूपनित्यनिरतिशयात्मस्वभावसुखमानन्दशब्दवाच्यमिति नोक्तदोषावकाश इत्येके। अन्ये तु सत्त्वगुणे निर्मले पुण्यहेतुना विषयेन्द्रियसंप्रयोगेण परिणते नित्यसुखमेव प्रतिबिम्बितं प्रीतिशब्देनोपदिष्टम्। "एतस्यैवानन्दस्यान्यानि[1]भूतानि मात्रामुपजीवन्ती"ति श्रुतेः सत्त्वगुणस्य[2] न सुखात्मता, सुखप्रतिबिम्बाश्रयतया सुखरूपत्वाभिधानमिति मन्यन्ते॥

अस्य प्रथमश्लोकस्य सकलशास्त्रार्थसंग्रहरूपत्वाद् एतत्सूचिताभिष्टदेवतास्तुतिमुत्तरश्लोकेन विवृणोति। अथवा इष्टदेवतास्तुतिच्छलेन निष्कलं प्राप्यं शिवतत्त्वमभिधाय तत्प्राप्त्युपायभूतं सकलनिष्कलात्मकं तेजो ज्योतिर्लिङ्गादि[3]रूपेणावस्थितं स्तौति —

नोदयति यन्न नश्यति निर्वाति न निर्वृतिं प्रयच्छति च।
ज्ञानक्रियास्वभावं तत् तेजः शाम्भवं जयति॥ २॥

इति। अयमर्थः — यत् तेजो नोदयति नाविर्भवत्यादित्यादिवत्। न च नश्यति नास्तं गच्छति। निर्वाति न

१. 'न्या भू' क. पाठः. २. 'स्यासु' ख. पाठः. ३. 'तिलिङ्गात् लिङ्गा' क. पाठः.

न मुच्यते । अज्ञानतन्मूलरागद्वेषतत्प्रयुक्तप्रवृत्तिधर्माधर्मतद्दृश्यशरीरेन्द्रियाद्यभावेन संसाराभावात् । अज्ञानाभावश्च सर्वज्ञत्वात् । अपक्षयलक्षणविनाशप्रतिषेधो वा निर्वाणं, नितरां वानम् अपक्षयः न्यूनत्वं, तन्नास्ति, सततैकरूपत्वात् । तच्च नित्यत्वात् । निर्वृतिं प्रयच्छति चेति । निर्वृतिर्मुक्तिः तां प्रयच्छति प्रददाति स्वोपासकानामिति । ज्ञानक्रियास्वभावं ज्ञातृकर्तृस्वभावं तच्छाम्भवं शम्भोरिदं शाम्भवं तेजः इतरतेजोनिकरेभ्यः उच्चैः कारणैरुत्कृष्टमिति । अथवा, शाम्भवं तेजो रूपं मन्त्रात्मकं विग्रहं, तत्प्राप्त्युपायभूतं सकलमिति यावत् । जयतीति । सर्वस्मादुपरि वर्तत इत्यर्थः । कुतः, अस्य विग्रहस्येतरविग्रहवदुत्पत्तिनाशाद्यभावात् । तच्च वेदमयत्वाद् वेदस्य च नित्यत्वादिति ॥ २ ॥

एवं महेश्वरं स्तुत्वा महेश्वरीं महादेववल्लभामखिलभुवनजननीं नित्यसहिताम् "एष ते रुद्रभागः सह स्वस्राम्बिकया तं जुषस्व" इत्यादिश्रुतिसिद्धपूजास्तुत्यादिसाहित्यप्रदर्शनाय फलाप्तये च स्तौति—

शक्तो यया स शम्भुर्भुक्तौ मुक्तौ च पशुगणस्यास्य ।
तामेकां चिद्रूपामाद्यां सर्वात्मनास्मि नतः ॥ ३ ॥

इति । अयमर्थः—यया शक्त्या भगवान् महेश्वरः पशुगणस्यास्य भुक्तिप्रदाने मुक्तिप्रदाने च शक्तः समर्थो भवति, तां नतोऽस्मीति महेश्वरीस्तुतिकर्तव्यता प्रतिपादिता । तया विना भगवतोऽनुग्राहकत्वासंभवात् । तथाहि — शिवस्य

सर्वगतस्य केवलस्य निष्क्रियस्योदासीनतनोः पशुसमुदायं प्रति भुक्तिमुक्तिप्रदानासंभवाच्छक्तिमत एव तत्प्रदानोपपत्तिः । अतः शक्तिसहितस्यैवानुग्राहकत्वमिति । एकामिति । अद्वितीयामित्यर्थः । ननु शिव एव सर्वमिति पूर्वं शिवाद्वितीयत्वं प्रतिपादितम् । अतः कथमिहाद्वितीयतावाचोयुक्तिरिति चेत् । सर्वस्यापि वस्तुनो देवीदेवात्मकत्वसद्भावेनोभयाद्वितीयतावचनोपपत्तेरिति ब्रूमः । तथाहि — केवलात्मावस्थानलक्षणस्यापवर्गस्य तावच्चिदानन्दरूपतया देवीदेवात्मता विद्यते । मोक्षस्यानन्दरूपत्वाभावे पुरुषार्थता हीयेत, सुखस्यैव मुख्यपुरुषार्थत्वात् । न च दुःखाभावस्यापि पुरुषार्थतयापवर्गस्यानन्दरूपत्वाभावेऽपि दुःखसंस्पर्शविरहेण पुरुषार्थत्वसंभव इति वाच्यम् । दुःखाभावस्य सुखानुगुणतया पुरुषैरर्थ्यमानत्वेन मुख्यपुरुषार्थत्वाभावात् । तस्मात् सुखस्यैव मुख्यपुरुषार्थत्वेनानन्दरूपतापवर्गस्याश्रयणीया । सा चाननुभूयमाना[1] न पुरुषार्थतां भजत इति तदनुभवोऽप्याश्रयणीय इति सुखचिदात्मको मोक्ष इति तस्य देवीदेवात्मकत्वसिद्धिः । तत्र परमानन्दसंविद् देवी संविदानन्दो देव इति, 'एषा विद्या ह्यहं वेद्य' इति पुराणागमात् तदवगमः । तथा देवीमन्त्रकल्पे चोक्तम् —

"आदिनाथ ऋषिश्छन्दो दैवी गायत्रि उच्यते ।
देवता परमानन्दसंविदत्रोपदिश्यते ॥"

इति । भुवनेश्वरीकल्पे च —

१. 'ना पु' ख. ग. पाठः.

"बोधस्वरूपवाची संवित् प्रोक्ता च देवता गुरुभिः"

इति । तथा 'विज्ञानमानन्दं ब्रह्मे'त्यादिश्रुतेश्च तदवगमः ।

"यानुभूतिरजामेयानन्तात्मानन्दविग्रहा ।

महदादिजगन्मायाचित्रभित्तिं नमामि ताम् ॥"

इत्यभियुक्तवचनाच्च तदवगमः । न च संवित्सुखे परस्परमात्मनश्च भिन्ने आत्मगुणरूपे इति वाच्यम् । 'चिदानन्दात्मकः शिवः' इत्यादिश्रुतिविरोधाद्, भेदाभ्युपगमे तद्गुणत्वासंभवप्रसङ्गाच्च । ननु चिदानन्दयोरभेदेऽन्यतरस्तदनुभवासंभवात् स्वयंप्रकाशतया मोक्षसंसारयोरविशेषप्रसङ्गः । नैवम् । संसारावस्थायां जपासन्निहितस्वयम्प्रभस्फटिकवदात्मनोऽसत्[1]कल्पतयानन्दानुभवासंभवेनाविरोधादिति । तदिदमानन्दं ब्रह्मणो रूपम् । तच्च मोक्षेऽभिव्यज्यत इति श्रुतिसिद्धम् । नन्वस्तु शुद्धतत्त्वस्य देवीदेवात्मता[2] । कारण[3]तत्त्वस्य मायाशबलितस्य कथं देवीदेवात्मतेति चेत् । निमित्तोपादानभावेनावस्थानादिति ब्रूमः । तदुक्तं लैङ्गे—

"अस्याष्टमूर्तेः शर्वस्य शिवस्य गृहमेधिनः ।

गृहिणी प्रकृतिर्दिव्या[4] प्रजाश्च महदादयः ॥"

इति । कार्यतत्त्वस्य चात एवं[5] चिदचिदात्मतया देवीदेवरूपत्वम् । तथाच[6] भूतानां चतुर्दशविधानां देहदेह्यात्मना द्वैरूप्याद् देवीदेवात्मता । ननु भूतानां कथं देवीदेवात्मकत्वम् । तद्विभूतित्वादिति ब्रूमः । तथाच बृहदारण्यकश्रुतिः—"ए-

१. 'क्ल' ग. पाठः. २. 'क' ख. पाठः. ३. 'णशब्दस्य मा', ४. 'व्य' ग. पाठः. ५. 'व चिदा', ६. 'हि' क. पाठः.

काकी न रमते । स द्वितीयमैच्छत् । स हैतावानास । पुंस्त्वं स्त्रीत्वं चापातयत् । पतनात् पतिः पत्नी च । सा गौरभवत् । ऋषभ इतरः । ताभ्यां गावः । सा बडवाभवदश्व इतरः । ताभ्यामश्वाः” इत्यादिवाक्यैरखिलजन्त्वात्मना देवदेव्योर्जगत्कारणयोरवस्थानावभासादखिलस्य तद्विभूतित्वसिद्धिः । मानवे च —

“द्विधाकृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां च विराजमसृजत् प्रभुः ॥”

“पुँल्लिङ्गमखिलं देवः स्त्रीलिङ्गं परमेश्वरी ।”

इति लैङ्गवचनाच्च तत्सिद्धिरिति । महेश्वरीमहेश्वरयोर्भेदाभावेनोभयाद्वितीयत्ववचनम् । तथाहि—एकमेव शिवतत्त्वं पुँल्लिङ्गस्त्रीलिङ्गनपुंसकलिङ्गशब्दैर्व्यवह्रियते । भावानां त्रैविध्यदर्शनेनास्यापि भावतयान्यतमरूपप्रसक्तौ तन्नियामकासंभवात् । तथाहि—शिवतत्त्वस्य स्त्रीत्वनपुंसकत्वयोरभावेन घटस्य घटशब्देनेव महेश्वरशब्देन पुँल्लिङ्गेन व्यवहारः । न च पुंस्त्वसद्भावाद् घटस्य घटशब्देन व्यवहार इति वाच्यम् । पुस्त्वस्यात्यन्तमत्रानुपलम्भात् । तथापि तस्य सत्त्वाभ्युपगमे शशविषाणादेरपि सत्त्वप्रसङ्गः । तथा पुंस्त्वनपुंसकत्वयोरप्यभावाच्छिवेति स्त्रीलिङ्गशब्देन व्यवहारः । न च तस्य स्त्रीत्वसद्भावादिति वाच्यं, शालामालादिशब्दानां तदभावेन स्वार्थे वृत्त्यभावप्रसङ्गात् । न च घटादौ स्त्रीलिङ्गशब्दस्यापि प्रवृत्तिप्रसङ्ग इति वाच्यं, पङ्कजशब्दस्येव क्वचिदेव प्रवृत्तेरिष्टत्वात् । एवं पुंस्त्वस्त्रीत्वयोरप्यभावाच्छिवत-

---

१. ‘स्वभावा’ क. पाठः.

त्वस्य नपुंसकलिङ्गेन ब्रह्मेत्यनेन शब्देन व्यवहारः, न च नपुंसकत्वसद्भावात्, कुण्डमित्रादिशब्दानां तदभावेन स्वार्थे वृत्त्यभावप्रसङ्गात् । तथा पुरुषादिशब्दानामितररूपासत्त्वाद् निमित्तात् प्रवृत्तिर्ज्ञेया, लाघवस्य सद्भावादात्मनि च पुं-स्त्वरहिते[1] वृत्तिसद्भावाच्चेति । तस्मान्महेश्वरीमहेश्वरयोर्भेदा-भावादुपपन्नमुभयाद्वितीयत्ववचनमिति। तदुक्तं बृंहण्यां —

"शिवो देवः शिवा देवी शिवं ज्योतिरिति त्रिधा ।
अलिङ्गमपि यत्तत्त्वं लिङ्गभेदेन कथ्यते ॥"

इति । भगवता श्रीबादरायणेन सनत्सुजाते चोक्तं —

"सा प्रतिष्ठा तदमृतं लोकास्ते ब्रह्म तद् यशः ।
भूतानि जज्ञिरे तस्मात् प्रलयं यान्ति तत्र च ॥"

इति । पुंस्त्वाद्यभावश्च

"नैव स्त्री न पुमानेष नैव चायं नपुंसकः"

इत्यादिश्वेताश्वतरश्रुतेः,

"न च स्त्री न पुमानेष न चैवेदं नपुंसकम्"

इत्यादिश्रीवायवीयागमाच्च सिद्धः । कथं तर्हि भेदेन नमस्कार इति चेत्। शिवोपलक्षितशक्तेः शक्त्युपलक्षितशिवाद् भेदोपप-त्तेरिति ब्रूमः। शक्तिशक्तिमतोरभेदादद्वितीयतोपपत्तिः । न च धर्मधर्मिभावेन शक्तितद्वतोरभेदासंभव इति वाच्यम् । केवल-भेदाभ्युपगमेऽस्यायं धर्म इति व्यपदेशाभावप्रसङ्गात्। न च स-म्बन्धसद्भावात् तदुपपत्तिरिति वाच्यम्। सम्बन्धस्यापि संब-न्धान्तराभ्युपगमेऽनवस्थाप्रसङ्गात्। अनाश्रयणे च सम्बन्धस्य

---

१. 'स्त्वाहि' ग. पाठः.

सर्वसाधारण्येनास्यायमिति व्यपदेशाभावः । तस्माद् धर्मधर्मिणोरभेदोऽभ्युपगन्तव्य इति, कथञ्चिद् भेदस्यापि सद्भावेन भेदव्यवहारो मुखोदरादिभेदव्यवहारवदिति । शिवशक्त्योरभेदे हेतुमाह — चिद्रूपामिति । शिवश्चिद्घनः, (इ)यं च चिद्रूपा चित्स्वरूपा चिन्मात्रेति न तयोर्भेद इति । अयमर्थः शैवरहस्ये चोक्तः —

"अग्न्यौष्ण्यवदद्वैधं द्वैधं च मिथः कथञ्चन दधाते ।
शक्तिशिवौ वस्त्वैक्यं मणिप्रभावद् यतो युक्तम् ॥"

इति । आद्यामिति । अखिलकारणतया प्रथमोद्भूतामित्यर्थः । वक्ष्यति च — 'चिदचिदनुग्रहहेतोरि'ति । सिद्धान्तहृदये चोक्तं —

"सिसृक्षोराद्य उन्मेषः शक्तिसाम्यात्मकोऽस्य यः ।
तदुपाधिः शिवः शक्तितत्त्वमित्यभिधीयते ॥"

इति । सर्वात्मनास्मि नत इति । मनसा वाचा कर्मणा प्रपन्नोऽस्मीत्यर्थः ॥ ३ ॥

एवमिष्टदेवतास्तुत्यादिना निरस्तसमस्तान्तरायः शास्त्रकर्ता विषयसंबन्धप्रयोजनवच्छास्त्रं कर्तुं प्रतिजानीते —

लोकानुग्रहहेतोः करुणारसनिर्भरेण चित्तेन ।
तत्त्वप्रकाश एष क्रियतेऽस्माभिः समासेन ॥ ४ ॥

इति । लोकानुग्रहहेतोरिति । लोकानां पशूनामनुग्रहोऽपवर्गः, तदर्थमिति प्रयोजननिर्देशः । तदनभिधाने शास्त्रस्याग्रहणं स्यादिति । तदुक्तं भगवता भट्टपादेन —

"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते ॥"

इति । वक्ष्यति च — 'चिदनुग्रहस्त्वयं किल' इति । लोकानुग्रहहेतोः एष तत्त्वप्रकाश इत्युक्तेः शास्त्रप्रयोजनयोः साध्यसाधनभावसम्बन्धसिद्धिः, अन्यथा तादर्थ्यासम्भवात् । तत्त्वानि प्रकाश्यन्ते प्रदर्श्यन्ते येन शास्त्रेण स तत्त्वप्रकाश इत्यनेनास्य शास्त्रस्य विषयः प्रतिपादितः । तत्त्वानामत्रे प्रतिपाद्यमानतया विषयत्वात् । ननु च शास्त्रात् प्रतिपाद्यमानतत्त्वविषयज्ञानमुत्पद्यते । अतः कथमस्यापवर्गसाधनत्वमिति चेदुच्यते । तत्त्वज्ञानस्यावान्तरव्यापारत्वेन शास्त्रस्य तत्साधनत्वोपपत्तेः । तथाहि — शास्त्रश्रवणात् तत्त्वज्ञानं शास्त्रविषयमुत्पद्यते । तस्मिन् सत्यज्ञानान्यथाज्ञानयोर्निवृत्तिः । ततस्तन्मूलरागाद्यभावः । ततस्तत्कार्या प्रवृत्तिर्निवर्तते । ततो धर्माधर्मयोरनुत्पत्तिः । पूर्वोत्पन्नयोः सञ्चितयोः दीक्षाकर्मणा विनाशः । आरब्धकार्ययोस्तयोरस्तशरवद् विनियुक्तत्वादुपभोगादेव प्रक्षयः । ततः शरीराद्युपाधिविरहाज्जीवात्मनः शिवस्वभावस्य घटाकाशस्य तदुपाधिघटविनाशे परमाकाश इव परमेश्वरे शिवे लयोऽपवर्गाख्यो भवतीति । एतदुक्तं श्रीकौर्मे —

> "घटाकाशमिवाकाशे सरित्तोयमिवार्णवे ।
> जीवो मे विलयं यातु शिवाख्ये परमात्मनि ॥"

इति । शिवधर्मोत्तरे च —

> "जगतस्तत्त्वसंबोधादज्ञानं विनिवर्तते ।
> अज्ञानविनिवृत्तौ च रागादीनामसम्भवः ॥

---

१. 'घ' क. पाठः.

रागाद्युपशमात् पुंसां पुण्यपापपरिक्षयः ।
तत्क्षयाच्च शरीरेण न पुनः सम्प्रयुज्यते ॥
अशरीरं च संक्लेशैः सर्वैरेव न बाध्यते ।
क्लेशमुक्तः प्रसन्नात्मा मुक्त इत्यभिधीयते ॥"

इत्यादि । तस्मात् शास्त्रात् तत्त्वज्ञानद्वारेणापवर्गो भवतीति सिद्धम् । ननु च यद्यस्मादेव शास्त्रात् तत्त्वज्ञानोत्पत्तिः, तर्हि शास्त्रकर्तुस्तत्त्वज्ञानाभावप्रसङ्गः, प्राक् शास्त्राभावात् । न च[1] शास्त्रकरणानन्तरं तच्छ्रवणात् तस्य तत्त्वज्ञानमिति वाच्यं, तज्ज्ञानाभावे तत्त्वप्रतिपादकशास्त्रकर्तृत्वस्यैवासम्भवात् । न ह्यज्ञातेऽर्थे शब्दप्रयोगो घटत इति । नैतदेवम् । किरणपारमेश्वरादिषु तत्त्वानां प्रतिपादितत्वेन तच्छ्रवणात् तस्य तत्त्वज्ञानोपपत्तेः । न चास्मदादीनामपि तथा तत्त्वज्ञानोपपत्तेरनारम्भणीयमिदं शास्त्रमिति वाच्यम् । अस्मदादीनां तथाविधप्रज्ञासामर्थ्याभावेन विप्रकीर्णतया विस्तरेण च प्रतिपाद्यमानतत्त्वविषयज्ञानस्याशक्यसम्पादनत्वात् । अथ तत्त्वज्ञानस्यापवर्गसाधनत्वे समुत्पन्नतत्त्वज्ञानास्त्वनन्तरमेव मुच्यन्त इति शास्त्रकरणतद्व्याख्यानाद्यसम्भवाद् अस्मदादीनां तत्त्वज्ञानासम्भवः । अथ शास्त्रकर्ता तदर्थमवतिष्ठत एवेति चेत् । न तर्हि तत्त्वज्ञानमपवर्गे साधनम् । तज्ज्ञानसद्भावेऽप्यपवर्गाभावादिति । नैष दोषः । शिवात्मज्ञानस्यापरोक्षभूतस्यापवर्गजनकत्वाभ्युपगमात् । तथाहि — श्रौते तत्त्वज्ञाने संजातेऽपि न भवत्यपवर्गः । निदिध्यासनसम्भवस्य

---

१. 'न' ग. पाठः

ज्ञानापरोक्ष्यस्य तदानीमभावात् । श्रौते हि तत्त्वज्ञाने संजाते मननसापेक्षपुनर्निदिध्यासनसंभवं शिवात्मैकत्वविषयम् अपरोक्षज्ञानं देहादिविषयापरोक्षभूताज्ञाननिरसनात्मकमपवर्गमुपजनयति । तच्चापरोक्षभ्रमस्य परोक्षज्ञानेन निवृत्त्यसंभवात् । स चोदीच्यामुदित आदित्य इत्यपरोक्षदिग्भ्रमस्य तदुदयपूर्वकपूर्वदिक्त्वानुमानेन निवृत्त्यदर्शनादवगम्यते । पुनश्चाभ्यासवशादपरोक्षज्ञानोद्भवे निवृत्तिदर्शनाच्चेति । तथाहि श्रुतयः श्रुतिशिरसि वर्तमाना एकमेवार्थमुपपादयन्ति । तथा च 'अरे आत्मा द्रष्टव्य' इति निर्द्धारेणापवर्गसाधनं शिवात्मदर्शनमेव विहितम् । तदुपायत्वेन श्रवणमनननिदिध्यासनानि विधीयन्ते 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति । तेन न श्रवणमात्रजनितं विज्ञानमपवर्गसाधनम् । किन्तु निदिध्यासनसम्भवं शिवात्मदर्शनमिति गम्यते । एषां श्रवणादीनां सद्वारेण निर्द्वारेण चात्मदर्शनं प्रत्यङ्गत्वं,

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
ज्ञात्वा च सततं ध्येयः"

इति "एते दर्शनहेतव" इति सिद्धं च । अतो न शास्त्रकरणतद्व्याख्यानाद्यसंभवः, तत्त्वज्ञानिनां यावदापरोक्ष्यमवस्थानाभ्युपगमादिति । न च शरीरादिव्यतिरिक्तात्मासत्त्वेनाधिकार्यभावात् स्वर्गापवर्गफलदमिदं शास्त्रमनारम्भणीयमिति वाच्यम् । शरीरादिव्यतिरिक्तस्य नित्यस्य जीवात्मनः सद्भावस्य

१. 'त्ति' क. ख. पाठ. २. 'चाद' ख. ग. पाठः. ३. 'स्य' जी. क. पा.

वक्ष्यमाणत्वात् । न च मोक्षतत्साधनप्रतिपादकशास्त्रान्तरसम्भावनादनारम्भणीयमिदं शास्त्रमिति वाच्यम् । शास्त्रान्तराणां शिवतत्त्वाप्रतिपादकानां

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥"

इत्यारणवाक्येन श्वेताश्वतरेणापवर्गहेतुताप्रतिक्षेपाच्छिवप्रतिपादकानां चेतरतत्त्वव्यावृत्त्यात्मकशिवज्ञानविधायकवाक्यैरपवर्गहेतुता प्रतिक्षिप्ता । तथाहि — द्विविधमिह शिवज्ञानमपवर्गकारणम् इतरव्यावृत्त्या स्वरूपतश्चेति । श्रुतिस्मृत्योस्तथा विधानात् । 'आत्मा ज्ञातव्यः', 'प्रकृतितो विवेक्तव्यः', 'अन्यदेव तद्विदिताद् अथो अविदिताद्' इत्याद्याः श्रुतयः इतरव्यावृत्त्या, 'सत्यं ज्ञानमनन्तम्', 'आनन्दं', 'प्रज्ञानं ब्रह्म'-त्यादयः स्वरूपतोऽपि विज्ञानं प्रतिपादयन्ति ।

"नायं पृथ्वी न सलिलं न तेजः पवनो नभः ।
न प्राणो न मनोऽव्यक्तं न शब्दः स्पर्श एव वा ॥

न रूपरसगन्धाश्च नाहंकर्ता न वागपि ।
न पाणिपादौ नो पायुर्न चोपस्थं द्विजोत्तमाः! ॥

न[1] कर्ता न च भोक्ता वा न च प्रकृतिपूरुषौ ।
न माया नैव च प्राणश्चैतन्यं परमार्थतः ॥"

इत्याद्याः स्मृतय इतरव्यावृत्त्या,

---

१. 'न च क' क. ख. पाठः.

"आत्मायं केवलः स्वच्छः शान्तः सूक्ष्मः सनातनः ।
अस्ति सर्वान्तरः साक्षी चिन्मात्रस्तमसः परः ॥"

इत्याद्याः स्वरूपतः शिवात्मज्ञानं प्रतिपादयन्तीत्युभयथा विज्ञानस्याश्रयणीयत्वात् । तथाविधविज्ञानसाधनमिदं शास्त्रमारम्भणीयमिति सिद्धम् । करुणारसनिर्भरेण चित्तेनेति । करुणायाः संजातो रसः करुणारसः अनुजिघृक्षा । अथवा करुणा चासौ रसश्चेति । तेन निर्भरं विशृङ्खलं यत् तत् करुणारसनिर्भरं, तेन । चित्तेन मनसा । न ख्यातिलाभपूजार्थं शास्त्रकरणं, किन्तु केवलं करुणानुन्नमानसैरस्माभिः क्रियत इत्यर्थः । आत्मनि गुरुषु बहुवचनविधानादस्माभिरिति बहुवचननिर्देशः । समासेनेति शैवागमेषु विप्रकीर्णतया विस्तरेण चोक्तानां तत्त्वानां मन्दबुद्ध्यनुग्रहार्थं समासेन संश्लेपणेन, संक्षेपेण वेत्यर्थः ॥ ४ ॥

तत्त्वप्रकाशः क्रियत इत्युक्तं, तत्रेदमाशङ्कते — कानि तानि तत्त्वानि, कियन्ति चेति । एकादिषट्त्रिंशान्तं[1] बहुभिराचार्यैर्बहुधा तत्त्वानां प्रतिपादितत्वादाशङ्कासमुद्भवः । तामाशङ्कामपनेतुमाह —

शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात् त्रितयम् ।
तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ॥

शैवेति । अयमभिप्रायः — एकादिषट्त्रिंशान्तेषु तत्त्वपक्षविशेषेषु सर्वेष्वपि मुख्यत्वादनभ्युपगमे दोषप्रसङ्गाच्च

---

१. 'तीं' ग. पाठः.

पतिपशुपाशात्मकत्रैविध्यमाश्रयणीयम् । तथाहि — पशोः संसारिणोऽनभ्युपगमे धर्माधर्मजन्ममरणसुखदुःखानुभवलक्षणस्य संसारस्य तन्निवृत्तिलक्षणस्य चाश्रयाभावादसत्त्वं, तत्प्रतिपादकश्रुतिस्मृतीतिहासपुराणादेश्च निर्विषयतयाप्रामाण्यप्रसङ्गश्च स्यात् । तथा पाशानां संसारहेतुभूतानां मलकर्ममायाख्यानामभावे शरीरादेरभावे स्वर्गनरकगमनजन्ममरणादेरभावप्रसङ्गः । आत्मनो निष्क्रियस्य तदखिलासंभवात् । तथा पत्युः परमेश्वरस्याभावे जगत्सृष्टिस्थितिध्वंसधर्माधर्मबन्धमोक्षविचारादेरसंभवः, जीवानामसर्वज्ञानां शरीररहितानां तदसंभवात् । तस्मात् तत्त्वत्रैविध्यं सर्वेष्वपि पक्षविशेषेष्वभ्युपेयमिति । ननु तत्त्वैकत्वद्वित्वपक्षयोः कथं तदाश्रयणम् । उपाधिभेदकृतभेदसद्भावादिति ब्रूमः । तथाहि — एकमेव जलतत्त्वमुपाधिवशात् तरङ्गफेनबुद्बुदात्मनाप्रच्युतस्वस्वभावं यथा त्रैविध्यमागवगम्यते, तथायं शिवोऽप्यप्रच्युतस्वस्वभावस्त्रैविध्यं पतिपशु(भावा?पाशा)त्मकमनुभवति । तदुक्तं शैवरहस्ये —

"अनुभवति हि पशुभावं शिव एवाणवतिरोहितात्मगुणः ।
सोऽपि मलो यः कश्चन शक्तिलवः सर्वथा शार्वः ॥"

इति । प्रकृतिपुरुषात्मना द्वैविध्ये प्रकृतितदुपहितानुपहितात्मना त्रैविध्यसम्भव इति षट्त्रिंशान्तेपु चतुष्टयादिषु चेतरतत्त्वानामत्रैवान्तर्भावात् तत्त्रैविध्योपपत्तिः । तथाहि — पत्यौ शुद्धानां तत्त्वानामन्तर्भावः । मायाकार्याणां शुद्धाशुद्धानां

---

१. 'णाभ्यु' क पाठः. २. 'स्य त' ख. ग. पाठः.

"पत्यौ शिवस्वभावाः सर्वे सर्वात्मना प्रकाशन्ते ।
केचन पाशेषु पशुषु चान्तर्दधते निरवशेषम् ॥"

इति । अत एवास्य त्रितयस्य मुख्यत्वम्, अन्येषामत्रैवान्तर्भावाद् । अथवा क्रमान्मुख्यत्वमिति । ननु कथमेतदवगम्यत इत्यत आह—शैवागमेष्विति । ते च—

"कामिकं योगजं चिन्त्यं कारणं त्वजितं परम् ।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम् ॥
विजयं चैव निःश्वासं स्वायम्भुवमतः परम् ।
वीरं च रौरवं चैव मकुटं विमलं तथा ॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ।
सिद्धं सन्तानसर्वोक्तं पारमेश्वरमेव च ॥
किरणं वातुलं चैव त्वष्टाविंशातिसंहिताः ।
मूलभेदमिति ख्यातमसंख्यमुपभेदकम् ॥"

एपूक्तत्वादिति । तथाहि पारमेश्वरे तावत्—

"पाश्यः पाशयिता पाशास्त्रयमेतद् व्यवस्थितम् ।"

इति । किरणे च—

"पशुपाशपतिज्ञानविचारप्रतिपादकम् ।
किरणाख्यं महत् तन्त्रम्"

इत्यादि । श्रीवायवीये च—

"अजडं च जडं चैव नियन्तृ च तयोरपि ।
पशुः पाशः पतिश्चेति कथ्यते त्रितयं क्रमात् ॥"

शैवेति शिवप्रणीतत्वविशेषणेनागमानां प्रामाण्यं सूचितम् । तथाहि—शिवस्य सर्वज्ञतयाज्ञानान्यथाज्ञानरागद्वेषादेरप्रा-

---

१. 'च', २. 'ष्टुमं त' ख. पाठः.

माण्यवाक्यरचनाहेतोरभावात् तद्रचितानामागमानां सिध्यत्येव प्रामाण्यम् । न हि सर्वज्ञस्याज्ञानं संभवतीत्यज्ञानादप्रमाणवाक्यरचनेति वक्तुं न शक्यते । अज्ञानाभावादेव तन्मूलरागद्वेषादेरभावात् तन्मूलाप्रमाणवाक्यरचनासम्भवः । तस्मात् क्षीणदोषतयाप्तेन महेश्वरेण रचितानां प्रामाण्यसद्भावात् तदुक्तप्रमेयतथात्वमभ्युपेयमिति । तदुक्तं शिवधर्मोत्तरादौ —

"विधिवाक्यमिदं शैवं नार्थवादः शिवात्मकम् ।
लोकानुग्रहकर्ता यः स मृषार्थं कथं वदेत् ॥
सर्वज्ञपरिपूर्णत्वादन्यथा[1] केन हेतुना ।
ब्रूयाद् वाक्यं शिवः शान्तः सर्वदोषविवर्जितः ॥
यद् यथावस्थितं वस्तु गुणदोषैः स्वभावतः ।
यावत्फलं च यत् पुण्यं सर्वज्ञस्तत् तथा वदेत् ॥
रागाज्ञानादिभिर्दोषैर्ग्रस्तत्वादनृतं वदेत् ।
ते चेश्वरे न विद्यन्ते ब्रूयात् स कथमन्यथा ॥
अपास्ताशेषदोषेण सर्वज्ञेन शिवेन यत् ।
प्रणीतममलं वाक्यं तत् प्रमाणं न संशयः ॥
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता ।
यथार्थं पुण्यपापेषु तदश्रद्धो व्रजत्यधः ॥"

इति । नन्वीश्वरप्रणीततागमानां कुतोऽवगम्यते । तदागमैरेवेति चेत् । तदेतरेतराश्रयता । अथागमस्य प्रमाणभूतस्याप्तकर्त्रपेक्षायां तदन्यस्यातीन्द्रियार्थदर्शिनः कर्तृत्वासंभवाच्च

---

१. 'थोक्तेन' ख. ग. पाठः.

सर्वेश्वरस्य सर्वकर्तुः सर्वज्ञस्यागमकर्तृत्वं निश्चीयते इति चेत्। नैवम्। आगमप्रामाण्यानिश्चयादेवं कल्पनानुपपत्तेः। तथा आप्तान्तराप्रणीतत्वे प्रमाणाभावादतीन्द्रियार्थदर्शिनः कर्तृत्वाविरोधाच्च न शिवप्रणीतत्वविशेषणस्यार्थवत्त्वमिति। नैतदेवम्। आगमस्य प्रतिपत्तिसामर्थ्यात्मकात् प्रमाणान्तरात् प्रामाण्यसिद्धेः। तथाहि—द्विविधो ह्यागमः, दृष्टार्थोऽदृष्टार्थश्चेति। तत्र दृष्टार्थानां चित्रायागविधायकवाक्यसदृशानां तदुक्तकर्मानुष्ठानेन तदुक्तफलसंभवदर्शनात् प्रामाण्यमनुमाय तत्कर्तुरतीन्द्रियार्थदर्शित्वेन परमाप्तत्वनिश्चयेऽन्येषामदृष्टार्थानामपि तत्कर्तृकतया दृष्टार्थवाक्यवत् प्रामाण्यमनुमीयत इति। न च पूजाजपादिविशिष्टकर्मणां विशिष्टतत्तत्फलसाधनतामध्यक्षतोऽवगच्छन्नागमकर्ता भवे[2]दसर्वज्ञः, एतद्दर्शिनो ह्यदृश्यवस्त्वन्तराभावात्। न चानुमानादिममर्थमुपलभ्य तत्र वाक्यरचनेति वाच्यम्। व्याप्तिग्रहणलिङ्गादेरसम्भवात्। अनुमानं हि लिङ्गलिङ्गिनोः प्रत्यक्षतो व्याप्तिग्रहणे सति लिङ्गमात्रदर्शनादुपजायमानं लिङ्गिविज्ञानम्। तथाहि—प्रत्यक्षतो महानसादौ धूमाग्न्योर्लिङ्गलिङ्गिनोरविनाभावे गृहीते देशान्तरे पर्वतादौ धूमदर्शनादग्न्यनुमानं प्रवर्तमानं दृष्टम्। तदत्र फलकर्मणोः साध्यसाधनभावस्य लिङ्गलिङ्गिनोः प्रत्यक्षतया लिङ्गानुपलम्भाच्च व्याप्तिग्रहणासंभवान्नानुमानसंभव इत्यनुमानमूलता नागमा-

---

१. 'म्यात्म' ख. पाठः. २. 'त् स' क. पाठः,

नाम् । नाप्यागमान्तरमूलता । तस्यापि पौरुषेयत्वेनागमान्तरमूलताभ्युपगमेऽनवस्थाप्रसङ्गात् । न च वेदव्यतिरिक्तमपौरुषेयं वाक्यं पश्यमः, येन तन्मूलता कल्प्येत । तस्मान्नागमान्तरमूलतागमानाम् । न च योगिनामतीन्द्रियार्थदर्शिनामागमकर्तृत्वमिति वाच्यम् । तेषां महेश्वरप्रसादापेक्षसर्वज्ञतया तदुपायदीक्षापूर्वकपूजाद्यावेदकागमानां सद्भावस्य प्रागेवाश्रयणीयत्वाद् जगत्कर्तुः शिवादन्यस्यागमकर्तृत्वकल्पनायां गौरवापाताच्च स एवागमानामपि कर्तेति कल्प्यते । न च परस्परविरुद्धधर्मप्रतिपादकागमानां एकाप्तकर्त्रभ्युपगमासंभवादनेकाप्तकर्त्रभ्युपगमप्रसङ्ग इति वाच्यम् । वर्णाश्रमाद्यधिकारिभेदवशेन वेद्यस्य चैकस्यैव शिवस्य करुणानिधेर्विरुद्धधर्मोपदेशोपपत्तेरिति नेतरेतराश्रयत्वादिदोषः । न च लोकपरिग्रहे स्यादन्योन्याश्रयत्वमिति वाच्यम् । तस्य प्रामाण्यपरिज्ञानमूलत्वाभावात् । तथाहि—प्रथमं तावद् आगमान् विरचय्य ब्रह्माणं स्वसुतं महेश्वरो ग्राहयामास । ततः स्वसुतान् ब्रह्मा, ततस्तेऽपि स्वसुतानिति, वेदपरिग्रहवदागमपरिग्रहोपपत्तेर्नोक्तदोषावकाशः । ननु शिवप्रणीततयागमप्रामाण्यं पूर्वमुपवर्णितम् । संप्रति प्रतिपत्तिसामर्थ्यादिति पूर्वापरविरोध इति चेद्, न उत्पत्तिज्ञप्त्यपेक्षया उभयोरप्युपपत्तेः । तथाहि—शिवप्रणीततयागमानां प्रामाण्यमुपजातं तत्प्रतिपत्तिसामर्थ्येनावगम्यत इति न कश्चिद्विरोधः । वेदमूलत्वाद्वागमप्रामाण्यम् । तदानीमपि शिवप्रणीत्वादागम-

१. 'ति वे' ग. पाठः. २. 'त्वमाग' ख. ग. पाठः.

प्रामाण्यं द्रढयति, शिवदृष्टस्य वेदार्थस्याबाध्यत्वादिति। स चागमो द्वेधा, प्रत्यक्षश्रुतिमूलोऽनुमेयश्रुतिमूलश्चेति। तत्र प्रत्यक्षश्रुतिमूलानाम् आगमानां प्रत्यक्षश्रुतिमूलत्वात् प्रामाण्यम्, अनुमेयश्रुतिमूलानाम् अष्टकादिश्रुतिमूलवदिति आगमेषु प्रतिपाद्यमानानामर्थानां श्रुतिषूपालम्भात् तन्मूलतागमानामवगम्यते। तथाहि — 'रुद्रोऽवश्यं यष्टव्य' इति श्रुतिवाक्याद् रुद्रयागकर्तव्यतावभासते। तत्र करणादिकं मन्त्रार्थवादावगतमागमैः प्रतिपाद्यत इति तन्मूलतागमानाम्। तथाहि — 'तमु ष्टुहि यः स्विषुः सुधन्वा य' इत्यत्र पूजास्तुतिनमस्कारादे रुद्रगोचरस्य महत्सौख्यनामकापवर्गं प्रति हेतुतावगम्यते। 'अन्तरिच्छन्ती'[1]त्यत्र ध्यानजपौ रुद्रविषयौ कर्तव्यौ इत्यवगम्यते। 'यज्ञं रुद्राय मीढुषे' इत्यत्र पान्तं पानीयं सोमाख्यमन्धो हवी रुद्राय हरध्वमित्यवगम्यते। एवं शतरुद्रीयनीलरुद्रसूक्तश्वेताश्वतरेशावास्याथर्वशिरस्तच्छिखारौद्रसूक्तारणादिष्वागमप्रतिपाद्यमानानामर्थानां सद्भावो द्रष्टव्य इति। अत्र प्रयोगाः—विवादपदं तन्त्रशास्त्रं प्रमाणं, यथार्थत्वात् सम्प्रतिपन्नवाक्यवत्। तथा तन्त्रे[2]शास्त्रं प्रमाणम्, आप्तोक्तत्वात्, यद्यदाप्तोक्तं तत्तत्प्रमाणं, यथा पुराणादि, तथेदमाप्तोक्तं, तस्मात् प्रमाणम्। तथागमाः शिवप्रणीताः, तदन्याजन्यै[3]कार्यत्वाद्, यद्यत् तदन्याजन्यकार्यं तत्तच्छिवप्रणीतं, यथा प्रपञ्चः। तथा चैते। तस्माच्छिवप्रणीताः। तन्त्रशास्त्रं कार्यं, वेदान्यवाक्यत्वात्, यद्यद् वेदव्यतिरिक्तं वाक्यं तत्तज्जन्यं दृष्टम्। यथा भारतादि। न च प्रपञ्चस्य

---

१. 'री', २. 'त्र' ख. पाठः. ३. 'न्यताका' ग. पाठः.

शिवप्रणीतत्वासिद्धेः साध्यविकलो दृष्टान्त इति वाच्यम् । तस्योपरिष्टादुपपाद्यमानत्वात् । तथा तन्त्रशास्त्रं प्रमाणं, वेदमूलत्वाद्, मन्वादिस्मृतिवत् । तद् वेदमूलं च, तदुक्तार्थप्रतिपादकत्वाद्, मन्वादिस्मृतिवदिति । अथ, शास्त्रमप्रमाणम् अनाप्तकृतत्वात्, सम्प्रतिपन्नवदिति प्रत्यनुमानबाधादोषप्रसङ्ग इति चेद्, नैवम् । विकल्पानुपपत्तेः । तथाहि — अनाप्तकृतत्वादित्यस्य कोऽर्थः । यद्याप्तेनाकृतत्वम्, आहोस्विदनाप्तेन कृतत्वं, यद्याद्यः पक्षः, तर्हि वेदवाक्यैर्व्यभिचारः, तेषां प्रमाणभूतानामेवाप्तेनाकृतत्वहेतोः सद्भावात् । असिद्धाश्चायं हेतुः, आप्तकृतत्वस्य साधितत्वात् । यद्युत्तरः पक्षः, तदा चाप्तकृतत्वादेवासिद्धता । न चानाप्तरचिता आगमाः, वेदविरुद्धत्वाद् बौद्धाद्यागमवदिति साधयितुं शक्यत्वान्नासिद्धतेति वाच्यम् । वेदार्थप्रतिपादकतया वेदमूलानामागमानां वेदविरुद्धत्वस्याप्यसिद्धत्वात् । तस्माच्छैवागमेपूक्तत्रैविध्यादिकं मार्कण्डेयागस्त्यरामदधीचादिसकलशिष्टजनैः परिगृहीतत्वाच्चादरणीयमिति । पतिपशुपाशा इति । पतिश्च पशवश्च पाशाश्चेति तथोक्ताः । के ते इत्याकाङ्क्षायामाह — तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः इति । तत्र तेषां मध्ये पशूनां पालनात् पतिशब्देन शिव उक्तोऽभिहितः । पशवोह्यणवः अणुत्वसम्पादकमलादिसंबन्धिनः । शिवस्वभावा जीवाः पशवः न

---

१. 'च्या' क. पाठः. २. 'ज्जी' ख. पाठः.

चतुष्पाद एव, द्विपदां च पशुत्वश्रवणात् । तथाहि—"एतावन्तो वै पशवो द्विपादश्चतुष्पादश्च । यो वामिन्द्रावरुणा द्विपात्सु पशुषु यो वा चतुष्पात्सु पशुष्वि"त्यादिश्रुतेः । तेषामीश्वरत्वाद् भगवतः शिवस्य पशुपतित्वं, "येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदामि"ति श्रुतेः । लैङ्गोपरिभागे च—

"ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य धीमतः ।
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः ॥
तेषां पतित्वाद् भगवान् रुद्रः पशुपतिः स्मृतः ।"

इति । ननु केन कारणेन जीवात्मनां शिवस्वभावानां मलादिपाशसम्बन्ध इति चेदुच्यते । मलपाशसंबन्धात् कर्मपाशसंबन्धः । तत्संबन्धान्मायापाशसम्बन्धः । मलपाशसंबन्धस्य त्वनादित्वेन न कारणापेक्षा । यस्य वस्तुनः आदिमत्त्वं तस्यैव हि कारणापेक्षित्वम् । अस्य त्वनादित्वान्न कारणापेक्षेति । तदुक्तं किरणे—

"अनादिमलसंबन्धान्मलिनत्वमणौ स्थितम् ।
अनादिमलमुक्तत्वान्निर्मलत्वं स्थितं शिवे ॥
आदिमत्त्वं यदा सिद्धं निमित्तं कथ्यते तदा ।
ईदृग्रूपं स्मृतं ताभ्यां शुद्धाशुद्धं यथार्थतः ।
विशुद्धः स्फटिकस्तस्मात् ताम्रं सकालिकम् । (?)
यथास्मिन्न निमित्तं स्यात् तथा न स्याच्छिवात्मनोः"

इति । ननु तर्हि पशूनां शिवत्वाभावप्रसङ्ग इति चेत् । नैवम् । तेषां शिवस्वभावत्वे श्रुत्यादिप्रमाणसद्भावस्य वक्ष्यमाणत्वात् । अत एव पाशबद्धत्वात् पशुत्वम् । तेन किञ्चित्कर्तृत्वादि-

नाणुत्वं, न परमाणुवदवस्थानात्। तेषामव्यापकत्वेन तदसंभवादिति। अर्थपञ्चकं पाश इति। अर्थानां मलकर्मसूक्ष्मस्थूलमायापाशानुग्राहकशिवशक्तीनां पञ्चकमर्थपञ्चकं, तत्पाशाख्यं तत्त्वमिति। तदुक्तं—

"मलं कर्म च माया च मायोत्थमखिलं जगत्।
तिरोधानकरी शक्तिरर्थपञ्चकमुच्यते॥"

इति। ननु अर्थपञ्चकं पाश इतीह प्रतिपादितम्। शास्त्रान्तरे तु पाशानां त्रैविध्यमुक्तमिति विरोधः। तथाहि— शैवरहस्ये तावत्—

"सहजमनादि मलं स्यात् पाशेषु त्रिष्वपि प्रधानतमम्।
कर्म च माया च मले सति पाशतया प्रवर्तेते॥"

इति। प्रयोगमञ्जर्यां च—'पाशास्त्रयो निगलयन्ती'ति। नैवम्। ईश्वरशक्तेः पाशानुग्राहितयैव पाशत्वाभिधानान्मायापाशस्य स्थूलसूक्ष्मात्मना द्वैविध्येन च पञ्चधा भेदाभिधानादिति। अध्वपञ्चकं पाश इति केचित् पठन्ति। तदाध्वनां षण्णां तत्त्ववर्णमन्त्रभुवनपदकलानां पञ्चकमध्वपञ्चकं पाश इति। तदुक्तं सिद्धान्तहृदये—

"शिवः पशुपतिः प्रोक्तः पशवो ह्यणवो मताः।
ते पाशबन्धात् पशवः पाशः स्यादध्वपञ्चकम्॥
अध्वानस्तत्त्वभुवनकलार्णपदमन्त्रकाः।
यैरमी पुरुषा बद्धाः संसरन्ति भवाद् भवम्॥

१. 'द्धाः प' ग. पाठः.

मलादिजाः षडध्वानः तत्त्वाद्यास्ते च पञ्चधा ।
निवृत्त्यादिविभागेन तदुक्तं ह्यध्वपञ्चकम् ॥"

इति । गुरुदेवपद्धतौ च—

"अथाध्वानां क्रमादेषां व्याप्तिः सम्यङ् निगद्यते ।
पृथ्वीतत्त्वं क्षवर्णश्च मन्त्रौ हृदयसद्यकौ ॥
कालाग्निरपि कूश्माण्डहाटकौ ब्रह्मवैष्णवे ।
रौद्रं च भुवनान्यन्तर्ब्रह्माण्डस्य भवन्ति षट् ॥
अण्डाद् बहिः शतं रुद्रा दशदिक्षु व्यवस्थिताः ।
कपालीशो ह्यजो बुद्धो वज्र[1]देहः प्रमर्दनः ॥
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः ।

प्राच्यां दिशि—

अग्नी रुद्रो हुताशश्च पिङ्गलः खादको हरः ॥
ज्वलनो दहनो बभ्रुः भस्मान्तश्च क्षयात्मकः ।

आग्नेय्यां दिशि—

यमो मृत्युर्हरो धाता विधाता च तथापरः ॥
कर्ता चैव च संयोक्ता नियोक्ता धर्म एव च ।
तद्वद् धर्मापतिस्तत्र दशमो दक्षिणे स्थिताः ॥
निर्ऋतिर्मारणो हन्ता क्रूरदृष्टिर्भयानकः ।
उर्ध्वकेशो विरूपाक्षो धूम्रलोहितदंष्ट्रिणः ॥

नैर्ऋत्यां—

१. 'त' ख. पाठः.

बलो ह्यतिबलश्चैव पाशहस्तो महाबलः ।
श्वेतोऽथ जयभद्रश्च दीर्घहस्तो बलान्तकः ॥
वारुण्यां मेघनादश्च सुनादश्च प्रकीर्तितः ।
शीघ्रो वायुर्वायुवेगः सूक्ष्मस्तीक्ष्णः क्षयान्तकः ॥
पञ्चान्तकः पञ्चशिखः कपर्दी मेघवाहनः ।

वायव्यां —

निधीशो रूपवान् धन्यः सौम्यदेहो जटाधरः ॥
लक्ष्मीधरो रत्नधरः श्रीधरश्च प्रसाधनः ।
प्रकामो दशमश्चेति कौबेर्यां दिशि संस्थिताः ॥
विद्याधिपेशसर्वज्ञा ज्ञानभुग् वेदपारगः ।
सुरेशशर्वज्येष्ठाश्च भूतपालो बलिप्रियः ॥

ऐशान्यां —

विषो विषधरोऽनन्तः क्रोधनो मारुताशनः ।
न्यग्रोधोदुम्बरीशश्च फणीन्द्रो वज्रदंष्ट्रिणौ ॥

अधोभागे —

शम्भुर्विभुर्गणाध्यक्षस्त्रियक्षस्त्रिदशेश्वरः ।
संवाहश्च विवाहश्च नभोलिप्सुस्त्रिलोचनः ॥
तेषामुपरि रुद्राणां वीरभद्रो व्यवस्थितः ।
भद्रकाल्याश्च भुवनमेवमष्टाधिकं शतम् ॥
भुवनानि क्रमोक्तानि रुद्राणां स्वाख्यया पृथक् ।
मन्त्रावसानिकपदान्महादेवपदावधि ॥
विलोमतः पदानि स्युरष्टाविंशतिसंख्यया ।
इत्यध्वपञ्चकं षष्ठ्या निवृत्तिकलया समम् ॥

व्याप्तं सञ्चिन्तनीयं स्यादध्वषट्कं विभागतः।
आपोऽग्निर्वायुराकाशो गन्धश्च रसरूपके॥
स्पर्शः शब्दश्च वाक्पाणी पादपायुभगानि च।
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणश्चेतीन्द्रियाणि च॥
मनोहङ्कारबुद्ध्यन्तमन्तःकरणकत्रयम्।
सर्वेषां त्रिगुणाथ स्यात् प्रकृतिः कारणं परा॥
त्रयोविंशतितत्त्वानि विलोमादिति संख्यया।
ह्रादिटान्तास्ततो वर्णास्त्रयोविंशतिसंख्यकाः॥
शिरश्च वामदेवाख्यो मन्त्रौ तद्वत् पुराणि तु।
षट्पञ्चाशत् क्रमेण स्युरमरेशादिनामभिः॥
अमरेशं प्रभासं च नैमिशं पुष्कराषढी।
डिण्डिमुण्डिभारभूतिरित्यष्टावम्बुतत्त्वके॥
हरिश्चन्द्रश्च श्रीशैलो जल्पीशाम्रातकेश्वरौ।
मध्यमेशो महाकालः केदारो भैरवस्तथा॥
भुवनाष्टकमित्येतत् तेजस्तत्त्वे व्यवस्थितम्।
गया चैव कुरुक्षेत्रं नोखलं कनखलं तथा॥
विमलेशोऽट्टहासश्च महेन्द्रं भीमकेश्वरम्।
इत्यष्टौ भुवनानि स्युर्वायुतत्त्वगतानि तु॥
वस्त्रापदो रुद्रकोटिरविमुक्तो महालयः।
गोकर्णो भद्रकर्णश्च स्वर्णाक्षः स्थाणुरित्यपि॥
भुवनाष्टकमाकाशसंज्ञतत्त्वे व्यवस्थितम्।
छगलण्डो द्विरण्डश्च माकोटो गोमण्डलेश्वरः॥

कालञ्जरं दारुवनं शङ्कुकर्णं स्थलेश्वरम् ।
प्रारभ्य गन्धतन्मात्रमहङ्कारान्तमध्वनि ॥
स्थितानि भुवनान्यष्टावेतानि तु यथाक्रमम् ।
पैशाचं राक्षसं याक्षं गान्धर्वं चैन्द्रसौम्यके ॥
प्राजेशं ब्राह्ममित्येतद् देवयोन्यष्टकं धियि ।
अकृतं च कृतं चैव भैरवं ब्राह्मवैष्णवे ॥
कौमारमौमं श्रीकण्ठमिति योन्यष्टकं स्मृतम् ।
गुणप्रकृतितत्त्वे तु स्थिरमेतत् तु भौवनम् ॥
अष्टकैः सप्तभिस्त्वेवं षट्पञ्चाशद् यथाक्रमम् ।
भुवनानि स्थितान्येवं पादान्यप्येकविंशतिः ॥
महेश्वाराख्यात् प्रारभ्य स्यादरूपिन्पदावधि ।
एवं पञ्चविधाध्वा स्मात् प्रतिष्ठाकलया समम् ॥
षष्ठ्या व्याप्तं विचिन्त्यं स्यात् षोढाध्वव्याप्तिरीदृशी ।
अथ विद्याकलायां तु पुरुषो राग एव च ॥
अशुद्धविद्या च कला नियतिः काल एव च ।
माया च सप्त तत्त्वानि वर्णसप्तकसंयुतम् ॥
ञकारादि घकारान्तं शिखो[2]घोरौ च मन्त्रकौ ।
वामादिभुवनानि स्युः सप्तविंशतिसंख्यया ॥
वामो भीमस्तथैवोग्रो भवश्चेशान एव च ।
एकवीरश्च पुरुषः षडेते भुवनेश्वराः ॥
प्रचण्डो[3]मापतिश्चाजो ह्यनन्तश्चैकरुद्रकः ।
रागतत्त्वे स्थितं त्वेतद् भुवनानां तु पञ्चकम् ॥

---

१. 'नकं श्रीकमि', २. 'वा' क. पाठः. ३. 'यो' ग. पाठः.

क्रोधचण्डावशुद्धायां विद्यायां तु व्यवस्थितौ ।
नियत्यां ज्योतिसंवर्तौ ततः सूकरसंज्ञितः ॥
पञ्चान्तकैकवीरौ च शिवदश्च कलागताः ।
महादेवो वामदेव उद्भवश्चैकपिङ्गलः ॥
एकनेत्रस्तथेशानो भुवनेशस्ततः परः ।
अङ्गुष्ठमात्र इति चाप्यष्टावेते स्थलेश्वराः ॥
कालतत्त्वे च मायायां भौवनी सप्तविंशतिः ।
व्यापिन्निति समारभ्य ध्यानाहारपदावधि ॥
पदानां विंशतिश्चात्र स्याद् विद्याकलयाखिलम् ।
व्याप्तं सञ्चिन्तयेदेवं षड्विधाध्वव्यवस्थितिः ॥
अथ शान्तिकलायां स्याच्छुद्धविद्येश्वरावधि ।
सदाशिवश्च तत्त्वानि त्रीणि तस्यां स्थितानि हि ॥
वर्णास्त्रयः स्युर्गखका मन्त्रौ कवचपूरुषौ ।
अष्टादशैव भुवनान्यत्र वामादिसंज्ञया ॥
वामा ज्येष्ठा च रौद्री च काली कलविकारिणी ।
बले[1] [2]विकरणी चैव बलप्रमथिनी तथा ॥
सर्वभूतदमन्येका नवमी तु मनोन्मनी ।
शुद्धविद्याह्वये तत्त्वे स्थितान्येवमनुक्रमात् ॥
अनन्तेशश्च सूक्ष्मश्च ततश्चापि शिवोत्तमः ।
एकनेत्रश्चैकरुद्रस्त्रिमूर्तिस्तु तथापरः ॥
श्रीकण्ठश्च शिखण्डी च भुवनानीश्वराह्वये ।

---

१. 'व' ग. पाठः २. 'ल' क. पाठः.

सदाशिवाख्यं भुवनं स्थितं तत्त्वे सदाशिवे ॥
पदान्येकादशात्रैव नित्ययोगिन आदितः ।
व्योमव्यापिपदान्तानि स्थितान्येवं तु पञ्चधा ॥
षष्ठ्या तु शान्तिकलया व्याप्तान्येवं विचक्षणैः ।
षड्विधाध्वमयी व्याप्तिर्बोद्धव्या क्रमशो भवेत् ॥
तथैव शान्त्यतीतायां शिवतत्त्वं व्यवस्थितम् ।
वर्णाः षोडश सर्गाद्याः स्वराः स्युस्ते विलोमतः ॥
अस्त्रेशानौ तथा मूलमन्त्रो मन्त्रा भवन्ति हि ।
निवृत्यादीनि भुवनान्यत्र पञ्चदशैव हि ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
शान्त्यतीतेति हि कलाः स्युर्बिन्दौ भुवनानि हि ॥
इन्धिका दीपिका रोचिर्मोचिका चोर्ध्वगा तथा ।
भुवनानीति पञ्च स्युस्तानि नादकलाः खलु ॥
व्यापिनी व्योमरूपा चाप्यनन्ता चाप्यनाथया ।
अनश्रिता चेति कलाः शाक्ताः स्युर्भुवनान्यपि ॥
मन्त्राद्यं प्रणवं यत् तद् विलोमेनान्तकं तु तत् ।
पदमेकं भवेदेवमध्वायं पञ्चधोदितः ॥
शान्त्यातीतकलाव्याप्तं विद्यादित्यध्वनां क्रमात् ।
षड्विधा व्याप्तिरुद्दिष्टा शैवागमविनिर्णयात् ॥
षडध्वज्ञानवान्मुच्येन्मोचयेच्च भवार्णवात् ।

एकत्राध्वा षड्विधैकादश स्यु-
मन्त्रास्त्वेकं चाप्यशीतिः पदानि ।

षट्त्रिंशच्चाप्यत्र तत्त्वानि वर्णाः
पञ्चाशत् स्युः पञ्चसंख्या कलेति ॥

अथ पदोद्धारः—

प्राक्पदं प्रणवं तत् स्यादेकवर्णं शिवात्मकम् ।
व्योमव्यापि चतुर्थ्यन्तं द्वितीयं पञ्चवर्णकम् ॥
तृतीयं व्योमरूपाय पञ्चार्णमपरं तथा ।
सर्वव्यापि चतुर्थ्यन्तं शिवायेत्यथ पञ्चमम् ॥
त्र्यक्षरं च विजानीयात् पञ्चाङ्गानि शिवस्य तु ।
अनन्तायेत्यनन्तस्य वाचकं चतुरक्षरम् ॥
अनाथायेति सूक्ष्मस्य पदं स्याच्चतुरक्षरम् ।
अनाश्रिताय पञ्चार्णं पदं शिवतमस्य तु ॥
ध्रुवायेति पदं त्र्यर्णमेकनेत्रस्य कीर्तितम् ।
शाश्वतायैकरुद्रस्य पदं स्याच्चतुरक्षरम् ॥
योगपीठसंस्थिताय चाष्टार्णं तु त्रिमूर्तिनः ।
श्रीकण्ठस्य पदं नित्ययोगिने पञ्चवर्णकम् ॥
ध्यानाहाराय पञ्चार्णं पदमेतच्छिखण्डिनः ।
नमःशिवायेति पदं षड्वर्णं प्रणवादिकम् ॥
सर्वप्रभुश्चतुर्थ्यन्तं पञ्चार्णं पदसन्ततौ ।
शिवाय पदमन्यच्च चतुर्थ्यन्तं त्रिवर्णकम् ।
पदमीशानमूर्धाय षड्वर्णं मुनिसत्तम! ।
तदीशानस्य बोद्धव्यं सप्तार्णं पूरुषस्य तु ॥

---

१. 'नन्ताये' ग. पाठः.

स्यात् तत्पूरुषवक्त्राय अघोरहृदयाय च ।
सप्तार्णं बहुरूपस्य तद्वद् वामस्य कीर्तितम् ॥
स्याद् वामदेवगुह्याय सद्यस्याप्यथ कथ्यते ।
सद्योजातमूर्तयेति सप्तवर्णमुदीरितम् ॥
प्रणवादि प्रयोक्तव्यं पञ्चार्णं च नमो नमः ।
गुह्यातिगुह्याय पदं षड्वर्णं द्व्यर्णकं परम् ॥
गोप्त्रे पदं चतुर्वर्णं मातङ्गे निधनाय तत् ।
अकारपूर्वं पञ्चार्णं चन्द्रज्ञाने प्रकीर्तितम् ॥
सर्वविद्याधिपायेति पदं स्यात् सप्तवर्णकम् ।
सर्वयोगाधिपूर्वं तु गतायेत्यष्टवर्णकम् ॥
ज्योतीरूपाय पञ्चार्णं पदमेतत् सुशोभनम् ।
परमेश्वरपूर्वं तु परायेत्यष्टवर्णकम् ॥
अचेतनाचेतनेति सप्तवर्णं पदं विदुः ।
व्योमिन्व्योमिंश्चतुर्वर्णं व्यापिन्व्यापिंस्तथा पदम् ॥
अरूपिंश्च द्विरभ्यस्य षड्वर्णं पदमीरितम् ।
प्रथमेति द्विरभ्यस्तं षड्वर्णमपरं तथा ॥
तेजस्तेज इति प्रोक्तं चतुर्वर्णं पदं विभोः ।
ज्योतिर्ज्योतिःपदं तद्वद् विज्ञेयं चतुरक्षरम् ॥
त्र्यर्णं पदमरूपाख्यं तथानग्ने पदं शुभम् ।
त्रिवर्णं स्यादधूमाख्यमभस्माख्यं तथा पदम् ॥
अनादे त्र्यर्णमुद्दिष्टं नानानाद्यं धूधूतथा ।
ओंभूस्तद् द्व्यक्षरं ज्ञेयमोंभुवश्च त्र्यक्षरम् ॥

ओंस्त्वोवर्णद्वयं चानिधनाख्यं चतुरक्षरम् ।
निधनाख्यं त्रिवर्णं स्यात् पञ्चार्णं निधनोद्भवम् ॥
द्व्यक्षरं स्याच्छिवपदं द्व्यर्णं शर्वपदं विभोः ।
परमात्मंश्चतुर्वर्णं महेश्वरपदं तथा ॥
चतुर्वर्णं समुद्दिष्टं महादेवपदं हि यत् ।
सद्भावेश्वरसंज्ञं तु पञ्चार्णं मुनिसत्तम! ॥
महातेज इति प्रोक्तं पदं वर्णचतुष्टयम् ।
पदं पञ्चार्णमुद्दिष्टं योगाधिपतिसंज्ञकम् ॥
मुञ्चमुञ्च चतुर्वर्णं षड्वर्णं प्रमथात्मकम् ।
शर्वशर्वपदं चात्र बोद्धव्यं चतुरक्षरम् ॥
भवयुग्मं तथा तद्वद् भवोद्भवपदं पुनः ।
पदमष्टाक्षरं चान्यत् सर्वभूतसुखप्रदम् ॥
सर्वसान्निध्यपूर्वं तु करान्तं सप्तवर्णकम् ।
पदमष्टाक्षरं ब्रह्मविष्णुरुद्रपरम्परम् ॥
अनर्चितं द्विरभ्यस्तमष्टार्णं पदमुच्यते ।
असंस्कृतपदं तद्वत् पूर्वस्थितपदं तथा ॥
साक्षिस्तुरूपदे तद्वच्चतुर्वर्णे द्विरुक्तितः ।
षट् पतङ्गपदे वर्णाश्चत्वारः पिङ्गसंज्ञके ॥
तद्वज्ज्ञानपदं शब्दसूक्ष्माख्ये चतुरक्षरे ।
द्व्यक्षरं स्याच्छिवपदं तथा शर्वपदं विभोः ॥
त्र्यक्षरं सर्वदपदं प्रणवादि नमोनमः ।
पञ्चवर्णं शिवायेति त्रियक्षरमुदीरितम् ॥

---

१. 'तु दकारान्तं सव' ख. ग. पाठः.

नतियुग्मं पञ्चवर्णं सतारं पदमुत्तमम् ॥"

इति ॥ ५ ॥

ननु पशूनां शिवस्वभावतया पतिव्यतिरेकासम्भवात् तत्तद्द्वैविध्यप्रसङ्ग इत्याशङ्क्याह —

मुक्तात्मानो हि शिवाः किन्त्वेते तत्प्रसादतो मुक्ताः ।
सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः ॥ ६ ॥

मुक्तेति । अयमभिप्रायः — मुक्तात्मनामेव शिवस्वभावत्वम् । किन्तु तेषामपि मुक्तेः प्राङ् न शिवात्मता, ताम्रादेः स्वर्णस्वभावाच्छादक*कालिमाकल्पमलादिपाशप्रच्छादितशिवस्वभावतया पशुत्वात् । अत एव ते तत्प्रसादतो मुक्ताः । स शिवस्त्वनादिमुक्तः । एक इति । एक एव नित्यमुक्त इत्यर्थः । कालत्रयेऽपि मलादिसम्बन्धरहितत्वात् । तदुक्तं श्रीवायवीये —

"अनादिमलसंश्लेषप्रागभावात् स्वभावतः ।
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ॥"

इति । पञ्चमन्त्रतनुरिति । नादबिन्दुपदवर्णवाक्यात्मना पञ्चात्मकसकलमन्त्रशरीर इत्यर्थः । मन्त्रस्वरूप इति वा । "तस्योष्णिग्लोमानि त्वग् गायत्री त्रिष्टुम्मांसमनुष्टुब् स्नावानस्थि जगती पङ्क्तिर्मज्जा प्राणो बृहती"त्यादिश्रुतेः वैदिकादिमन्त्राणां धातुमयत्वप्रतिपादनाच्छिवस्य मन्त्रशरीरत्वावगमः । अथवा प्रणववेदचतुष्कात्मना पञ्चात्मकमन्त्रतनुरिति । तदुक्तं लैङ्गादौ —

---

* 'कालिका' इति स्यात् ।

"ओंकाररूपमृग्वक्त्रं सामजिह्वासमन्वितम्।
यजुर्वेदमहाग्रीवमथर्वोष्ठमजं विभुम्॥"

इति। बीजबिन्दुनादशक्तिशान्तात्मना पञ्चात्मकप्रणवतनुरिति वा। "ओमिति ब्रह्म, ओमित्यथो योऽसौ[1] तपती"त्यादिश्रुतेः। पञ्चाक्षरतनुरिति वा, निवृत्त्यादिपञ्चतत्त्वतनुरिति वा, पञ्चब्रह्मतनुरिति वा। तदुक्तं लिङ्गोद्भवे—

"अथ दृष्ट्वा कलावर्णमृग्यजुस्सामरूपिणम्।
ईशानमीशमकुटं पुरुषास्यं पुरातनम्॥
अघोरहृदयं हृद्यं वामगुह्यं सदाशिवम्।
सद्यपादं महादेवं महायोगीन्द्रभूषणम्॥
निष्कलं सूक्ष्ममव्यक्तं सकलं च महेश्वरम्।
सर्गप्रतिष्ठासंहारलीलार्थं लिङ्गरूपिणम्॥
प्रधानं लिङ्गमाख्यातं लिङ्गी च परमेश्वरः।"

इत्यादि। पारमेश्वरे च—

"पञ्चमन्त्रतनुः श्रीमान् सकलं परिपठ्यते।
योगयोगीश्वरः स्वामी स्वतन्त्रः पशुपाशहा॥
ईशानमूर्धा पुंवक्त्रो ह्यघोरहृदयः प्रभुः।
उच्यते वामगुह्योऽयं सद्यमूर्तिर्महेश्वरः॥
एवं मन्त्रास्तु पञ्चैते यैर्निबद्धा तनुः शिवा।"

इत्यादि। तस्मादेवं विज्ञेयः विशेषेण[2] भेदेन पशुभ्यो ज्ञेयः शिव इति। न च परमेश्वरवाचकस्य वेदमन्त्रादेर्वाच्यात् पर-

---

१. 'सौ यो त' क. ख. पाठः. २. 'ष' ख. ग. पाठः.

मेश्वराद् भेदसद्भावेन तस्य वेदमयत्वाभाव इति वाच्यम् । तयोर्भेदे वाच्यवाचकनियमाभावप्रसङ्गात् । न च सम्बन्धात् तन्नियमः । सम्बन्धस्य सम्बन्धान्तराश्रयणादनवस्थादिदोषस्योक्तत्वात् । न च वाचकत्वशक्तिर्नियामिकेति वाच्यम् । तस्याश्च वाच्याद् भेदसद्भावेऽन्यशक्तिवदनियामकत्वात् । शक्तेर्वाच्यासाधारण्यमप्यभेदव्यतिरिक्तं न संभवतीति वाच्यवाचकयोरेवाभेदोऽभ्युपगन्तव्यः । किमनया शक्तिकल्पनया । न च वाच्यवाचकभावस्य भिन्न[1]निष्ठतया तयोरभेदे[2]ऽसंभव इति वाच्यम् । गुणगुणिभेदवद् भेदस्याप्यत्र सद्भावात् । न च भेदाभेदयोर्विधिप्रतिषेधरूपत्वेन विरोधादेकत्रासम्भवः । वाच्यवाचकभावान्यथानुपपत्तिप्र[3]माणसिद्धत्वात् । तथा घटोऽयं पटोऽयं शब्दोऽयमिति वाचकसंपृक्तार्थ[4]प्रतिभासाद् घटशब्दोऽयमि[5]त्यसंपृक्तशब्दप्रतिभासाच्च शब्दार्थयोरैक्यमाश्रयणीयम् । अत एव तत्त्वादिवाचकमन्त्रविन्यासात् तत्त्वादिसान्निध्यमिति सर्वमवदातम् ॥ ६ ॥

ननु पतिसद्भावे प्रमाणाभावात् तत्त्वत्रैविध्यासंभव इत्याशङ्क्याह —

पञ्चविधं तत्कृत्यं सृष्टिः स्थितिसंहृती तिरोभावः ।
तद्वदनुग्रहकरणं प्रोक्तं सततोदितस्यास्य ॥ ७ ॥

पञ्चेति । अयमर्थः—सर्गस्थितिसंहारतिरोभावानुग्रहा-

---

१. 'क्रियत', २. 'द' ख. पाठः. ३. 'प्रामाणिकत्वा' क. पाठः. ४. 'क्ताद् प्र' ग. पाठः. ५. 'त्यर्थसं' क. ख. पाठः.

त्मना पञ्चविधं पञ्चप्रकारं तत्कृत्यं महेश्वरकार्यं तस्मिन् प्रमाणं, तस्यैव कर्तुं शक्यत्वादिति । न चान्यो जीवो[1] माया वा जगत्सृष्ट्यादिकं कर्तुं शक्नोति । पशोरुपादानोपकरणविनियोगक्रमज्ञानाभावाद् , मायायाश्चाचेतनतया तदसम्भवादिति । स सर्गः पञ्चविधः । भावतत्त्वभुवनभूतप्रत्ययात्मसृज्यस्य पञ्चविधत्वात् । तदुक्तं शैवरहस्ये—

"भोगेन परिणमयितुं कर्माणि घृणानिधिः पतिः सृजति ।
भावं तत्त्वं भुवनं (भूतं) प्रा(त्यै?त्ययि)कमपि सर्गम् ॥"

इति । विस्तरत उपरिष्टादुपपाद्यते । स्थितिः पालनम् । संहृतिर्विनाशः, स्वेषु स्वेष्वसाधारणकारणेषु कार्यस्य लयः, सूक्ष्मरूपेणावस्थानमिति यावत् । आत्मनां पाशैः प्रच्छादनं तिरोभावः । अनुग्रहकरणं मोक्षादि । ननु विरुद्धमिदमुक्तं पाशैरात्मप्रच्छादनद्वारेण संसारहेतुत्वम् आत्मप्रच्छादनमलादिपाशनिरसनेनापवर्गप्रदानं चेति चेत् । नैवम् । विषयभेदेनानयोरविरोधात् । येषां[2] साधनचतुष्टयसंपत्तिः, तान् प्रत्यनुग्रहकरणम् । येषां तन्नास्ति, तान् प्रति संसारहेतुत्वमिति । प्रोक्तं सततोदितस्यास्येति । कर्त्रा विनाकार्योत्पत्त्यसंभवादन्यस्य कर्तृत्वासम्भवाच्चास्य महेश्वरस्य सततोदितस्य स्वयंप्रकाशचैतन्यमात्रस्य परिपूर्णस्य निर्व्यापारस्योदासीनस्यापि साक्षिणः परमेश्वरस्य सृष्ट्यादिषु कर्तृत्वं प्रोक्तम् अभिहितमित्यर्थः । तदुक्तं —

---

१. 'नंकरंण' ग. पाठः. २. 'ते' ख. पाठः.

"यथा ह्यविक्रियो वह्निर्जलतण्डुलविक्रियाम् ।
तथा करोत्युदासीनः शम्भुर्मायादिविक्रियाम् ॥"

इति । ७ ॥

एवमुद्देशक्रमेण पतितत्त्वस्य लक्षणं परीक्षां च कृत्वानन्तरप्राप्तपशुतत्त्वनिर्णयार्थमाह —

पशवस्त्रिविधा ज्ञेया विज्ञानप्र(वि)लयाकलाः सकलाः ।
मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयश्च ॥ ८ ॥

पशव इत्यादि । पाशाः कथ्यन्ते, तैर्ये बद्धास्ते पशव इति । अथ शरीरादिव्यतिरिक्तस्येहलोकपरलोकसंचारिणः संसार्यात्मनः पशोः सद्भावे प्रमाणाभावादाश्रयासिद्धमिदं पशुलक्षणमिति चेत् । नैवम् । शरीरव्यतिरिक्तस्य नित्यस्यात्मनो जातिस्मृत्यादिभिः प्रमाणैः सद्भावावगमात् । तथाहि—पूर्वजन्मनि निहितं निध्यादिकमपरस्मिन् जन्मनि मयेदमत्र निहितं पूर्वमित्युपादीयमानमुपलभ्यते । अतो देहातिरिक्तस्यैकस्य नित्यस्य निधिविन्यासकर्तुः पशोः सद्भावः । अन्यथा तदुपादानासम्भवात् । न चान्यनिहितमन्येनोपादीयत इति वाच्यम्। अन्यानुभूतेऽन्यस्य स्मरणासम्भवेन तत्पूर्वकोपादानासम्भवात् । न चासौ भ्रान्तिमूलेति वाच्यम् । बाधकाभावात्, प्रत्यक्षतस्तदुपलम्भेन संवादतः प्रामाण्यसिद्धेश्चेति । तथा 'योनिमन्ये प्रपद्यन्ते' इत्याद्यागमाच्च पूर्वशरीरपरित्यागेन शरीरान्तरप्राप्तेरुपलम्भात् शरीरव्यतिरिक्तात्मसिद्धिः । न च प्राण आत्मा, वायुरूपत्वाद्

बाह्यवायुवत् । मम प्राणा इति प्राणात्मनोर्मम वस्त्रमितिवद् भेदोपलम्भाच्च । आर्हतैकदेशीयोक्तमिन्द्रियात्मत्वं[1] तत्तदिन्द्रियानुभूतार्थेषु तत्तदिन्द्रियविनाशेऽपि स्मृतिदर्शनात् प्रत्यस्तम्, अन्यानुभूतेऽन्यस्य स्मरणासंभवात् । तथा नियतविषयग्राहकाणामिन्द्रियाणामनियतविषयावगन्त्रात्मत्वासम्भवात् । तच्च योऽहं चक्षुषा रूपमन्वभवं, सोऽहमिदानीं श्रोत्रेण शब्दमनुभवामीत्यनुसन्धानासिद्धमिति । नापि मन आत्मा, करणत्वात् कुठारवत्, तथा परिमितत्वात् कार्यत्वाच्च घटादिवत् । तथात्मनि सिद्धे[2] युगपदि[3]न्द्रियार्थेषु युगपज्ज्ञानानुत्पत्त्या मनसः पुनः सद्भावसिद्धेर्नात्मा मन इति । तथान्तःकरणवृत्तिरूपबुद्ध्यात्मत्वं बौद्धैः कल्पितं स्मरणासंभवप्रसङ्गेन निरसनीयम् । तथाहि — पूर्वबुद्ध्यनुभूतेऽर्थे बुद्ध्यन्तरस्यान्यत्वेनानुभवाभावात् स्मरणासंभवः । न चाननुभूतेऽर्थे स्मृतिः संभवति, अनुपलम्भात् । न च सा बुद्धिरवतिष्ठत एवेति वाच्यम् । बुद्धेः प्रतिक्षणविनाशस्य सर्ववादिसम्मतत्वात् । एकसन्तानत्वेन वासनानुगमात् तदुपपत्तिरिति चेत् । न । वासनासन्तानयोरपि क्षणिकत्वे पूर्वोक्तदोषापातात् । तथा तयोर्ज्ञानादव्यतिरेकेण परिहारः । अक्षणिकत्वे व्यतिरेके च स्वसिद्धान्तविरोधः । तदुक्तं न्यायविद्भिः —

"अथापि नित्यं परमार्थसन्तं सन्ताननामानमुपैषि[4] भावम् ।

१. 'वि' ख. पाठः. २. 'द्धे यु' ग. पाठः. ३. 'पज्ज्ञा', ४. 'ति' ख. पाठः.

उत्तिष्ठ भिक्षो! फलितास्तवाशाः सोऽयं समाप्तः क्षणभङ्गवादः॥"

इति । विषयानन्द(मा ? आ)त्मा अनन्यार्थत्वाद् अत्यन्तप्रियबुद्धिविषयत्वाच्चेति केचित् । तदपि विषयेन्द्रियमनोबुद्ध्यात्मसंबन्धेनोत्पद्यमानं बुद्धिकल्पमित्युपेक्षणीयमेवेति । तस्माद् बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्त आत्मा पाशबद्धत्वात् पशुरिति सिद्धम् । तदुक्तं श्रीवायवीये —

"बुद्धीन्द्रियशरीरेभ्यो व्यतिरिक्तो विभुर्ध्रुवः ।
अस्त्येव कल्पितात्मेति हेतुस्तत्र सुदुर्गमः ॥
बुद्धीन्द्रियशरीराणां नात्मता सद्भिरिष्यते ।
स्मृतेरनियतज्ञानादयावद्देहवेदनात् ॥"

इत्यादि । तदेवं प्रतिपादितानां पशूनां विभागमाह — त्रिविधा ज्ञेया इति । (त्रि)प्रकारा ज्ञातव्या इत्यर्थः । कथमित्यत आह — विज्ञानप्रलयाकलाः सकला इति । तेषां क्रमेण लक्षणमाह — मलयुक्तः मलपाशसंबद्धः । तत्र तेषां मध्ये । आद्यो विज्ञानकलः । मलकर्मयुतः मलकर्मात्मकपाशद्वयसंबद्धः द्वितीयः ॥ ८ ॥

सकल इति सकललक्षणपूर्वकं विज्ञानकलविभागमाह —

मलमायाकर्मयुतः सकलस्तेषु द्विधा भवेदाद्यः ।
आद्यः समाप्तकलुषोऽसमाप्तकलुषो द्वितीयः स्यात् ॥ ९ ॥

---

१. 'भावः ॥', २. 'षां' ख. पाठः.

मलेति । मलश्च माया च कर्म च मलमायाकर्माणि, तैर्युक्तः संबद्धः सकल इति तेषु त्रिषु आद्यो विज्ञानकलो द्विविधो भवति—समाप्तकलुषोऽसमाप्तकलुषश्चेति । तत्राद्यः प्रथमः, अणूनां प्रथमत्वात् । समाप्तकलुष इति । मलशक्तिः कालुष्यं तत् समाप्तं नष्टं यस्य स समाप्तकलुषः । असमाप्तकलुषो द्वितीयः । तेनासौ प्रच्छन्नज्ञानक्रियाशक्तिर्भवतीति ॥ ९ ॥

ननु विज्ञानकलस्य द्विविधस्यापि मलपाशसम्बन्धसद्भावात् तन्निवृत्त्यात्मकं न शिवसायुज्यं, नापि स्वर्गनरकमध्यस्थानेषु देवादिभेदेनावस्थानं, दीक्षया कर्मविनाशे सति श्रवणादिनानात्मन्यात्मबुद्धिरपाकृताविद्याकृतमायासम्बन्धाभावात् । अतः कुत्रास्यावस्थानमित्याशङ्क्याह—

आद्याननुगृह्य शिवो विद्येशत्वे नियोजयत्यष्टौ ।
मन्त्रांश्च करोत्यपरांस्ते चोक्ताः कोटयः सप्त ॥ १० ॥

आद्यानिति । आद्यान् समाप्तकलुषान् विज्ञानकलान् अनुगृह्य दीक्षापूर्वकश्रवणमननाभ्यां परोक्षज्ञानप्रदानात्मकमनुग्रहं कृत्वा । नापरोक्षज्ञानप्रदानात्मकं[1], तस्य निदिध्यासनमध्ये कर्मक्षयान्तरायनिपातेनोत्पातासंभवात्[2] । विद्येशत्वे विद्येश्वरपदेशत्वे मुक्तिकल्पे नियोजयत्यष्टौ विज्ञानकलान् । इतरान् मन्त्रान् मन्त्रदेवतारूपान् करोति भगवान् शिव इति । तदुक्तं सिद्धान्तहृदये—

"विद्येश्वरान् करोत्यष्टावीशोऽन्यान् मनुदेवताः"

---

१. 'न प' क. पाठः. २. 'त्प' ख. पाठः.

इति। कति मन्त्रा इत्याकांक्षायामाह — ते चोक्ताः कोटयः सप्तेति। ते च महामन्त्राः सप्तकोटिसंख्यया संख्याता इति॥

इदानीं प्रलयाकलसकलयोः स्वरूपनिर्णयार्थं श्लोकत्रयमाह —

प्रलयाकलेषु येषां पक्के मलकर्मणी व्रजन्त्यन्ये।
पुर्यष्टकदेहयुता योनिषु निखिलासु कर्मवशात्॥ ११॥
कांश्चिदनुगृह्य वितरति भुवनपतित्वं महेश्वरस्तेषाम्।
स्यात् पुर्यष्टकमन्तःकरणं धीकर्मकरणानि॥ १२॥
शेषा भवन्ति सकलाः कलादियोगादहर्मुखे काले।
शतमष्टादश तेषां कुरुते स्वयमेव मन्त्रेशान्॥ १३॥

इति।अयमभिप्रायः — प्रकर्षेण लयं गतं कालादिधरान्ततत्त्वात्मकं शरीरं येषां ते प्रलयाकलाः। प्रलयावस्थायां मलकर्ममात्रपाशसंबद्धा आत्मान इति यावत्। तेषु। येषां मलश्च कर्म च मलकर्मणी पक्के परिपाकं गते। ज्ञानाग्निना साहचर्यात्। तेषां महेश्वरो भुवनपतित्वं वितरति। तेभ्यः प्रयच्छति, ददातीत्यर्थः। तेषां तेष्वपि कांश्चित् पक्वकर्मकाननुगृह्य गणेशान् करोति। कांश्चित् पक्वमलान् मन्त्रतन्त्रेश्वरान् करोति द्रष्टृत्वेनेति। कति मन्त्रेश्वरा इत्याकाङ्क्षायां शतमष्टादशेति।स्वयमेवेति। ब्रह्मादिसहायान्तरमनपेक्ष्यैवेति। तदुक्तं लैङ्गे —

"नाधिकान् न च हीनांस्तान् मानसानात्मनः समान्।
सहस्रं हि सहस्राणामसृजत् कृत्तिवाससाम्॥"

---

१. 'न्त्रतन्त्रेशान्' ग. पाठः.

इत्यादि । एभ्योऽन्ये ये पक्वमलकर्माणः शेषाः शिष्टास्ते सकलाः भवन्ति, कलादितत्त्वयोगात् । अहर्मुखे काल इति । सृष्टिकाले सर्वमेतत् करोति भगवान् महेश्वर इति । पुर्यष्टकदेहयुतास्त एव निखिलासु योनिषु देवमनुष्यतिर्यगादिषु व्रजन्ति चरन्तीत्यर्थः । नन्वात्मनां व्यापकत्वादमूर्तत्वाच्च कथं निखिलयोनिगमनागमनसंभव इत्याशङ्कयाह— पुर्यष्टकदेहयुता इति । सूक्ष्मशरीरस्य पुर्यष्टकाख्यस्य जीवोपाधेः सं-भवात् तदनुसारेण पशोरपि क्षेत्रज्ञस्य गमनागमने संभवत एव । यथा घटाकाशस्य तदुपाधिभूतघटगमनागमनाभ्यां गमनागमने, तथात्राप्युपाधिधर्माणां गमनादीनामुपहिते क्षेत्रज्ञे संभव उपपद्यत एवेति । कर्मवशादिति । कर्मानुरूपेणेत्यर्थः । ननु जीवोपाधिभूतं पुर्यष्टकं किमित्याशङ्कयाह — स्यात् पुर्यष्टकमन्तःकरणं धीकर्मकरणानीति । पुरि स्थूलशरीरे वर्तमानं यदष्टकं तत् पुर्यष्टकम् । तत् किमित्यत आह — अन्तःकरणं धीकर्मकरणानीति । बुद्ध्यहंकारमनांस्यन्तःकरणं, धियः कर्म व्यापारो विषयनिश्चयो धीकर्म, तत्करणानि तन्निमित्तानि शब्दादीनि च पुर्यष्टकमिति केचित् । तदुक्तं—

"शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
मनो बुद्धिरहंकारः पुर्यष्टकमुदीरितम् ॥"

गुरवस्तु धीकर्म च करणानि च धीकर्मकरणानीति ब्रुवते । तत्राष्टकत्वं शब्दस्पर्शरूपरसगन्धबुद्धीन्द्रियकर्मेन्द्रियान्तः-

१. 'सद्भावा' क. ख. पाठः.

करणात्मना विभागाद् भवति । परे कर्मेन्द्रियबुद्धीन्द्रियान्तः-करणचतुष्टयप्राणादिपञ्च(क)तन्मात्रापञ्चककामकर्माविद्यात्म-नाष्टविधं पुर्यष्टकमित्याहुः । तथाचोक्तं —

"कर्मेन्द्रियाणि खलु पञ्च तथापराणि
बुद्धीन्द्रियाणि मनआदिचतुष्टयं च ।
प्राणादिपञ्चकमथो वियदादिकं च
कामश्च कर्म च तमः पुनरष्टमी पूः ॥"

इति ॥ ११, १२, १३ ॥

शतमष्टादश मन्त्रेश्वरा इत्युक्तम् । के त इत्याकाङ्क्षायामाह —

तत्राष्टौ मण्डलिनः क्रोधाद्यास्[1]तत्समाश्च वीरेशः ।
श्रीकण्ठः शतरुद्रः शतमित्यष्टौ दशाभ्यधिकम् ॥ १४ ॥

इति । तत्र मन्त्रेश्वराणां मध्येऽष्टौ मण्डलिनः, क्रोधाद्याः तत्समाः, अष्टावित्यर्थः । शिष्टा वीरेशादय इति । एतदुक्तं सिद्धान्तहृदये —

"त्रिविधास्ते च विज्ञानकलाश्च प्रलयाकलाः ।
सकलाश्चेति तेष्वाद्या मलमात्रयुताः परे ॥
मलकर्मयुता मायामलकर्मसमायुताः ।
सकला इति तेष्वाद्या द्विविधाः पक्वकल्मषाः ॥
अपक्वकल्मषाश्चेति अत्राद्याननुगृह्य तु ।
विद्येश्वरान्[2] करोत्यष्टावीशोऽन्यान् मनुदेवताः ॥

१. 'न्या', २. 'न्तरे ह्यष्टा' ग. पाठः.

द्व्येकपक्वद्विपक्वाः स्युश्चतुर्धा प्रलयाकलाः ।
पक्वोभयान् पुराधीशान् गणेशान् पक्वकर्मगान् ॥
रुद्रान् पक्वमलानन्यानष्टादशशताधिकान् ।
सकलस्त्वष्टधा त्रिद्व्येकपक्वाश्च त्र्यपक्वकाः ॥
हिरण्यगर्भः+++सनकाद्याश्च योगिनः ।
आचार्यांश्चैव देवांश्च क्रमात् तेष्वकरोत् प्रभुः ॥" (?)

इत्यादि । शैवरहस्ये च —

"विज्ञानकलसंज्ञः (?) प्रलयाकलसंज्ञकोऽथ सकलाख्यः ।
त्रिविधोऽयं पुरुषः स्यादेकोत्तरबन्धसंबन्धात् ॥"

इति ।

"विज्ञानकलसंज्ञान् (?) समाप्तकलुषान् करोति विद्येशान्
अष्टावनुगृह्य शिवो मन्त्रानपि सप्तकोटिभिदान् ॥
प्रलयाकलाश्च केचिद् भुवनेशाः पक्वकलुषकर्माणः ।
कर्मवशादवशिष्टा निखिलास्वपि योनिषु चरन्ति ॥
सकलाः कलादियोगात् सृष्टिदशायां त एव निर्दिष्टाः ।
शतमष्टादश तेष्वपि मन्त्राणामीशितारः स्युः ॥
शतरुद्राः क्रोधादिकमष्टकमङ्गुष्ठमात्रपूर्वमपि ।
वीरेशश्रीकण्ठौ मन्त्रेशत्वेन वर्तन्ते ॥"

इत्यादि ॥ १४ ॥

नन्वेवं संसरतां पशूनां तर्हि मोक्षमार्गेऽवतारो न स्यादित्याशङ्क्याह —

परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन ।
योजयति परे तत्त्वे स दीक्षयाचार्यमूर्तिस्थः ॥ १५ ॥

इति । द्विविधा हि परमेश्वरस्य शक्तिः, बन्धकरा मोचिका चेति । तयोराद्यानादिकालमेव प्रवृत्ता पशून् पाशजालैर्बध्नाति । तस्यां कालवशात् कर्मसाम्येन विरोधादुपरतव्यापारायां मोचिका शक्तिः स्वपतनकालमन्वेषयन्ती महेश्वरे वर्तमाना तेषु पशुषु निपतति । ततश्च संसारोत्सादनहेतुभूतशक्त्यां निपातितायां भगवानाचार्यमूर्तिमास्थाय दीक्षां कृत्वा मलादिपाकं विधाय परमेश्वरतत्त्वे संयोजयतीति नासंपाद्यो मोक्षमार्गेऽवतार इति । तदुक्तं —

"समे कर्मणि सञ्जाते कालान्तरवशात् पुनः ।
तीव्रशक्तिनिपातेन गुरुणा दीक्षितो यदा ॥
सर्वज्ञः स शिवो यद्वत् किञ्चिज्ज्ञत्वविवर्जितः ।
शिवत्वव्यक्तिसम्पूर्णः संसारी न पुनस्तदा ॥"

इत्यादि । शक्तिद्वयं च भगवतावधूतपादेनोक्तं —

बध्नाति काचिदपि शक्तिरलुप्तशक्तेः
क्षेत्रज्ञमप्रतिहता तव पाशजालैः ।
ज्ञानासिना च विनिकृत्य गुणानशेषा-
नन्या करोत्यभिमुखं पुरुषं विमुक्तौ ॥"

इति ॥ १५ ॥

इतराविनियोगपूर्वमुपसंहरति —

बद्धाञ्छेषानाखिलान् विनियुङ्क्ते भोगभुक्तये पुंसः ।
तत्कर्मणामनुगमादित्येवं कीर्तिताः पशवः ॥ १६ ॥

---

१. 'स्स' ख. पाठः.

इति । सूक्ष्मदेहेन च पुर्यष्टकाख्येन बद्धान् शेषान् सकलान् भोगभुक्तये विषयभुक्त्यर्थं विनियुङ्क्ते देवादिस्थानेषु स्थूलदेहेन संयोजयतीत्यर्थ इति ॥ १६ ॥

इदानीमवसरप्राप्तानां पाशानां लक्षणपरीक्षार्थमाह —

पाशाश्चतुर्विधाः स्युः पुंसो मलकर्मसंज्ञकौ प्रथमौ ।
मायीयतिरोधायकशिवशक्तिसमुद्भवौ चान्यौ ॥ १७ ॥

इति । पशूनां[1] बन्धकाः पाशाः । ते च चतुर्विधाः चतुष्प्रकाराः स्युः । पुंसः पुरुषस्य पशोः । तेषु प्रथमौ आद्यौ । मलकर्मसंज्ञकौ मलकर्माख्यौ । तत्रापि[2] मलः प्रथमः पाशः, तत्पूर्वकत्वात् कर्मादीनाम् । स तु ज्ञानप्रागभाव इत्येके । परे तिमिरसदृशो जडात्मको भावरूपो ज्ञाननिवर्त्य इति । गुरवस्तु अविद्यासंस्कारात्मक इत्याहुः । तदुक्तं "ज्ञानं बन्धः" इति शिवसूत्रवार्त्तिककृता —

"अहं ममेदमिति यज्ज्ञानं भेदप्रथात्मकम् ।
शब्दानुवेधतो जातं मायीयं मलकारणम् ॥
तद् बन्धनं समाख्यातमविद्यावृत्तिलक्षणम् ।"

इति । किरणे च —

"मलो ज्ञानं पशुत्वं च तिरस्कारकरस्तमः ।
अविद्या ह्याकृतिर्मूर्छा पर्यायास्तस्य वाचकाः ॥"

इति । द्वितीयः कर्माख्यः पाशः । मायीयो मायाजन्यः सूक्ष्मस्थूलात्मकशरीरादिरूपः । स तृतीयः । तिरोधायकशि-

१. 'पशूनां', २. 'कृत्वा विम' ख. पाठः

वशक्तिसमुद्भवस्तत्स्वरूपश्चतुर्थ इति । बन्धस्य संसारस्य जन्ममरणादिलक्षणस्य बन्धकाभावेऽसंभवात् पाशसद्भावसिद्धिः । बन्धस्तु श्रुत्यादिप्रमाणसिद्ध इति । ननु मायाकार्यत्वाद् मलकर्मणोर्मायायां प्रवृत्तायां तयोरुद्भवः, प्रथमभूतयोस्तयोरुद्भवे मायायाः प्रवृत्तिरितीतरेतराश्रयप्रसङ्ग इति चेन्न । वीजाङ्कुरवदनादित्वेन तत्परिहारोपपत्तेरिति ॥ १६ ॥

प्रथमोद्दिष्टस्य मलस्य लक्षणमाह —

एको ह्यनेकशक्तिर्दृक्क्रिययोश्छादको मलः पुंसाम् ।
तुषकम्बुकवज्ज्ञेयस्ताम्राश्रितकालिमावद् वा ॥ १७ ॥

इति । एकोऽनेकशक्तिरिति मलस्य लक्षणम् । कर्ममायीययोरनेकत्वात् तन्निवृत्त्यर्थमुक्तमेक इति । तिरोधायकशक्तेरपि पाशत्वे सत्येकत्वाद् मलत्वप्रसङ्ग इति तन्निवृत्त्यर्थमनेकशक्तिरिति पदम् । नन्वविद्यासंस्काररूपतायां मलस्यानेकत्वादयुक्तमेको मल इतीति चेन्न । जलनिधिनिमग्नानन्तनदीजलवदेषामप्यनन्तानां संसर्गादेवैकत्वोपपत्तेरित्येके । अन्ये तु जात्यपेक्षयैकत्ववचनम् । अवान्तरानेकजातिसद्भावान्मायाकर्मणोरनेकत्वम् । तदभावाद् वासनाया एकत्वमिति ब्रुवते । तथा ज्ञानाभावरूपतायां च जात्यपेक्षयैवैकत्ववचनम् । अन्यथा कस्यचिज्ज्ञानोदये सति ज्ञानप्रागभावनिवृत्तेः सकलजगन्मोक्षप्रसङ्गादिति । भावात्मकत्वे मुख्यमेवैकत्ववचनम् । एकस्य ज्ञानोदयेऽपि निवृत्त्यनिवृत्त्योस्तमोवदुपपत्तेः मलस्यानेकशक्तित्वाच्चैकस्य ज्ञानोदये तं

प्रत्येव प्रच्छादनशक्तेर्विनाशादितरेषामपवर्गाभावः संभवत्येव। तस्मादेकोऽनेकशक्तिर्मल इति । तदुक्तं किरणे —

"विभोरपि मलस्यास्य तच्छक्तेः क्रियते वधः ।
उपायाच्छक्तिसंरोधः कस्मिंश्चित् क्रियते मले ॥
शिवज्ञानं तथा तस्य शक्तिसंरोधकारकम् ।
यथाग्नेर्दाहिका शक्तिर्मन्त्रेणाशु निरुध्यते ॥
तद्वत् तच्छक्तिसंरोधः"

इत्यादि । दृक्क्रिययोश्छादको मलः पुंसाम् । तुषकम्बुकवज्ज्ञेय इति । यथा तुषकम्बुकौ तण्डुलेन सहैकीभूतौ मूलाङ्कुराद्युत्पत्तेः कारणं, तथा मलोऽपि पशूनां स्वरूपभूतज्ञानक्रियाप्रच्छादकत्वेन कर्ममायादिमूलाङ्कुराद्युत्पत्तिकारणतयात्मना सहैकीभूतस्तिष्ठतीति । तदुक्तं किरणे —

"मलश्चिच्छादको नैजो[1] विशुद्धिः शिवता स्वतः"

इति । ताम्राश्रितकालिमावद्वेति । यथा ताम्राश्रिता कालिमा सहजातस्य स्वरूपभूतस्वर्णतां प्रच्छाद्य ताम्रतामभिव्यज्य चावतिष्ठते, तथा मलोऽप्यात्मनो ज्ञानक्रियात्मकं[2] स्वरूपं प्रच्छाद्य पशुत्वं चाभिव्यञ्जयन्नवतिष्ठत इति । ननु मलस्य सहजत्वे तत्क्षये तद्वतोऽपि विनाशप्रसङ्ग इति चेत्। नैवम् । ताम्राश्रितकालिमाविनाशे तत्स्वरूपाविनाशवत् सहजमलविनाशेऽप्यात्मस्वरूपाविनाशोपपत्तेः । तदुक्तं—

"सहजा कालिमा ताम्रे तत्क्षयान्न च तत्क्षयः ।
क्षयस्ताम्रस्य यद्वत् स्यात् पुरुषस्य मलक्षयः ॥

---

१. 'फो' ग.. पाठः. २. 'नो' ख. ग. पाठः.

यथा तण्डुलकम्बूके प्रक्षीणे न च तत्क्षयः ।”

इत्यादि ॥ १७ ॥

मलानन्तरं कर्ममायात्मकं पाशद्वयमुत्तरश्लोकपूर्वापरार्धाभ्यां निरूपयति —

कर्मानादि प्रोक्तं धर्माधर्मात्मकं विचित्रं च ।
माया च वस्तुरूपा मूलं विश्वस्य नित्या सा ॥१८॥

इति । कर्मानादि । प्रवाहरूपेण, न चैकस्यैव कर्मणः सर्वदावस्थानेन । तथा सति भावरूपस्य कर्मणोऽनादित्वेनात्मवन्नित्यतयानिर्मोक्षप्रसङ्गात् । न हि कर्माविनाशे संसारनिवृत्तिः संभवति । इत्येवं प्रोक्तं तत्त्वज्ञैः । धर्माधर्मात्मकमिति धर्माधर्मरूपेण द्विविधमिति । विचित्रं चेति विविधफलहेतुत्वाद् विचित्रमित्यर्थः । तथाहि — सुखासाधारणकारणं धर्मः, दुःखासाधारणकारणमधर्म इत्येके । अन्ये तु चोदनालक्षणोऽर्थो धर्मः, तल्लक्षणोऽनर्थोऽधर्म इति ब्रुवते । अपरे धर्मः पुरुषगुणः कर्तुः प्रियहितमोक्षहेतुः, तद्विपरीतोऽधर्म इति । अहिंसालक्षणो धर्म इति केचित् । चैत्यवन्दनादिलक्षणो धर्म इति बौद्धाः । परे परोपकारलक्षणो धर्म इति । तत्रान्त्यं त्रयमनुपपन्नं, प्रमाणाभावात् । न च बौद्धाद्यागमाः प्रमाणं, तेषां पौरुषेयतया मूलप्रमाणाभावे प्रामाण्याभावात् । न चैषां मूलप्रमाणं किञ्चिदुपलभ्यते । प्रत्यक्षादेर्धर्मं प्रति प्रामाण्यासंभवस्योक्तत्वात् । न चोपकारलक्षणस्य

धर्मत्वं, ब्राह्मणादिहिंसादेरपि तच्छत्रूपकारादिना धर्मत्वप्रसङ्गात् । नापि हिंसाया अधर्मत्वं, व्रीह्यवघातदुष्टनिग्रहाग्नीषोमीयपशुहिंसादेरधर्मत्वप्रसङ्गादिति । स धर्मस्त्रिविधः, नित्यनैमित्तिककाम्यात्मना तस्य भेदात् । तत्र 'यावज्जीवमग्निहोत्रं जुहुयात्', 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत', 'यावज्जीवं ज्योतिष्टोमेन यजेते'त्येवमादिवाक्यैर्नियमेन विहिता नित्याः । निमित्तादुपजायमाना नैमित्तिकाः । तद्यथा— 'वैश्वानरं द्वादशकपालं निर्वपेत', 'पुत्रे जातेऽष्टका कर्तव्ये'त्येवमादिविहिता जातेष्ट्यादयः । कामनापूर्वकाः काम्याः । 'अग्निहोत्रं जुहुयात् स्वर्गकामः', 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्येवमादिवाक्यविहिताः । ते द्विविधाः—सविद्याः केवलाश्चेति । सविद्या ईश्वरस्मरणपूर्वकाः । इतरास्तद्रहिता इति । एवंलक्षणो धर्मो द्विविधः—इष्टः पूर्तश्चेति । तत्रेष्टो वैदिकः, पूर्तस्तान्त्रिक इति । प्रतिषिद्धोऽधर्मः । तद्यथा— 'ब्राह्मणो न हन्तव्यः', 'सुरां न पिबेत्', 'न शङ्खेन पिबेत् तोयम्' इत्यादिवाक्यनिषिद्धो ब्राह्मणहिंसादयः । अपरे त्वधर्मश्च त्रिविध इत्याहुः । नित्याकरणं नैमित्तिकाकरणं प्रतिषिद्धकरणं चेति । नित्यनैमित्तिकाभ्यां प्रत्यवायपरिहारः काम्यात् स्वर्गादिप्राप्तिः । अधर्मान्नरकादिगमनमिति । एतदुक्तं सिद्धान्तहृदये—

"क्रियायाः सूक्ष्मरूपं हि कर्माहुर्द्विविधं च तत् ।
इष्टं पूर्तं च तत्रेष्टं वैदिकं तान्त्रिकं तथा ॥

१. 'त्यादि', २. 'द्व' ग. पाठः

पूर्तमित्युच्यते सद्भिस्तत् पुनस्त्रिविधं मतम् ।
धर्मोऽधर्मस्तथा चित्रमिति धर्मो विधेः पदम् ॥
स पुनस्त्रिविधः काम्यनित्यनैमित्तिकात्मना ।
निषिद्धोऽधर्म इतरच्चित्रं काम्यं पुनर्द्विधा ॥
सविद्यं केवलं चेति विद्या चेश्वरचिन्तनम् ।
प्रत्यवायहतिर्वा स्यादुपात्तदुरितक्षयः ॥
नित्यनैमित्तिकाभ्यां स्यादधर्मान्नारकी गतिः ।
अर्वाचीना [1]मनुष्यात्तु पाषाणान्ता सुदुस्तरा ॥
काम्यात् स्वर्गगतिस्तस्मादूर्ध्वा ब्रह्मावसानिका ।
सविद्या देवयानेन पुनरावृत्तिवर्जिता ॥
केवला पितृयानेन गतिः संसरणात्मिका ।
धर्माधर्माख्ययोः साम्ये मानुष्यं लभते पुमान् ॥
कर्मणोः सर्वगामी स्याच्चित्राचित्रफलोदयः ।
कर्माख्योऽयं महापाशो दुर्मोचस्तेन जन्तवः ॥
इतस्ततः समाकृष्य नीयन्ते पशवो यथा ।"

इत्यादि । एवं मलकर्मवशाद् महेश्वरेच्छया[2] माया [3]पुण्यापुण्यफलानुभवाय त्रिस्थानेषु देवादिशरीरेन्द्रियविषयात्मना पुनः पुनः परिणमते । तदुक्तं —

"मलात् कर्तृत्वभोक्तृत्वे कर्तृत्वात् कर्म कर्मणः ।
भोगस्तदाक्षेपवशान्मायाबन्धस्ततस्तनुः ॥
भोगाधिकरणं भोग्या लोकाश्च करणानि च ।
इन्द्रियाणीति जायन्ते भोगसिद्ध्यै ततो मलः ॥

१. 'तु मानुष्यात् पा' ग. पाठः. २. 'या पु' क., ३. 'पुण्य' ख. ग. पाठः.

अभिलाषात्मकश्चेति बीजाङ्कुरफलादिवत् ।
अनादिः पाशजालोऽणून् बध्नाति भवचक्रके ॥"

इत्यादि । विचित्रं चेत्यनेन कर्मसद्भावे प्रमाणमप्युक्तम् । तथाहि—ईश्वरदरिद्रादिभेदभिन्नं विचित्रं जगद् विचित्रकारणं विना[1] न संभवति । तच्च न दृष्टमुपलभ्यत इत्यदृष्टकारणकल्पनेति तत्सिद्धिः । तदुक्तं मातङ्गे—

"जगतः सुप्रसिद्धे द्वे धर्माधर्मौ तु कर्मणी ।
अनादिकालसंरूढे ताभ्यां पुं वासितः सदा ॥"

इत्यादि । तस्या मायायाश्च लक्षणमाह—विश्वस्य मूलमिति । विश्वस्य व्यक्तजातस्य कालादेर्मूलभूता उपादानभूता सा मायेति । तदुक्तं—'कालादीनां तत्त्वानामविवेको माये'ति । लक्षणपदेनैव तस्यां प्रमाणमप्युक्तम् । तथाहि—विश्वं जगद् एकोपादानजन्यम् एकाकारत्वाद् यद्यदेकाकारं तत्तदेकोपादानजन्यं, यथा घटकुम्भमृदङ्गशरावकुड्यवल्मीकादयः एकाकारा एकमृदुपादानजन्याः । तथेदमपि जडत्वादिनैकाकारं, तस्माद् एकोपादानजन्यमिति । यदत्र सकलकालाद्यवनिपर्यन्ततत्त्वजाताविवेकात्मकमुपादानं, सा मायेति तत्सिद्धिः । विस्तरेणैतदुपरिष्टादुपपादयिष्यामः । मायाशब्दवाच्यतया तस्यापरमार्थत्वशङ्का स्यादिति तन्निवृत्त्यर्थमाह—

---

१. 'ना सं' क. ग. पाठः.

वस्तुरूपेति । सा माया वस्तुरूपा परमार्थभूता विश्वमूलत्वादीश्वरवदिति । नित्या च सा माया । विश्वमूलत्वादीश्वरवदेवेति । अनित्यत्वे तस्या मूलान्तराभ्युपगमे विश्वमूलत्वाभावात् । न च माया महेश्वरमायाऽव्यतिरिक्तानामेव मूलमिति विश्वमूलत्वाभावस्तस्या इति वाच्यं, जन्यस्यैव मूलापेक्षत्वादजन्यमूलत्वाभावे विरोधाभावादिति । न च परमेश्वरस्य विश्वमूलत्वे प्रमाणाभावात् साधनहीनमुदाहरणमिति वाच्यं, तस्य विश्वमूलत्वश्रवणात् । तथाहि — 'यतो वा इमानि भूतानि जायन्ते', 'स इमाँल्लोकानसृजत', 'आत्मन आकाशः सम्भूतः' इत्यादिभिर्वेदवाक्यैः परमेश्वरस्य जगन्मूलत्वमवगम्यते । ततो न साधनविकलमुदाहरणमिति । तथा परमर्षिणा वेदव्यासेन सूत्रकृता परमेश्वरस्य[1] विश्वमूलत्वं 'जन्माद्यस्य यतः' (ब्र० १. १. २) 'शास्त्रयोनित्वात्' (ब्र० १. १. ३) इति सूत्रद्वयेनोपवर्णितमिति । ननु तर्हि न मायाया विश्वमूलत्वं, परमेश्वरस्यैव विश्वमूलत्वादिति चेत् । नैवम् । परस्परसंसृष्टयोरेव मायामहेश्वरयोर्विश्वमूलत्वेनोभयोरपि तदुपपत्तेः । तथाहि — माया तावन्न परमेश्वरानधिष्ठिता जडा जगदुपादानं भवति । महेश्वरश्च चेतनोऽपि न मायां विना विश्वमूलतां भजते, निर्व्यापारोदासीनमात्रत्वादिति तयोः संसृष्टयोरेव जगन्मूलत्वम् अयःपिण्डाग्न्योरिव कार्यकारणो[2]दीति । माया चेति चशब्देन मायाकार्यस्य विश्वस्य वस्तुरूपत्वमुपवर्णितम् । न च प्रप-

१. 'स्यविश्वस्यवि', २. 'णा इति' क. पाठः.

ञ्चस्य मिथ्यात्वाद् एतदनुपपन्नमिति वाच्यं, तत्र प्रमाणाभावात् । ननु विमतः प्रपञ्चो मिथ्या, दृश्यत्वाद् यद्यद् दृश्यं तत्तन्मिथ्या, यथा शुक्तिरजतं, तथायमपि दृश्यः, तस्मान्मिथ्येत्यनुमानात् प्रपञ्चमिथ्यात्वसिद्धिरिति चेत् । नैवम् । शुक्तिरजतस्य तद्व्यतिरिक्तस्येदं रजतमिति भ्रान्तिगोचरस्यापरमार्थभूतस्य सद्भावे प्रमाणाभावात् । ननु विमतं रजतज्ञानं रजतविषयं रजतज्ञानत्वात् सम्यग्रजतज्ञानवदित्यनुमानात् तत्र शुक्तौ रजतसद्भावः सिद्धः । नासौ सत्, तदानीं भ्रान्तत्वबाध्यत्वयोरसंभवात् सम्यग्रजतवत् । नाप्यसत्, शशविषाण इव ख्यातिबाधयोरसंभवप्रसङ्गात् । नापि सदसद्, विरुद्धत्वादिति सिद्धं तस्य सदसद्विलक्षणत्वम् । तदेवानिरूपितरूपत्वं मिथ्यात्वं चेति । तदुक्तं—

"सत्त्वे न भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधकौ ।
सदसद्भ्यामनिर्वाच्याविद्या वेद्यैः सहभ्रमा ॥"

इति । तदेतदसारम् । अलौकिकस्य रजतस्य परमार्थभूतस्य तत्र प्रतिभासात् । तथाहि—द्विविधं[1] हि रजतं लौकिकमलौकिकं चेति । तत्र लौकिकं वलयकरणादिसमर्थम् । अलौकिकमत्र प्रतिभासमानं तदसमर्थम् । तस्य च द्वित्वादिसाम्येन परमार्थत्वान्न मिथ्यात्वम् । न च नेदं रजतमिति ज्ञानेनास्य बाधः, अपेक्षितलौकिकरजतविवेकख्यापकत्वेना[2]स्याबाधकत्वात् । अथालौकिकरजतावबोधे लौकिकरजतार्थिनस्तत्र प्रवृत्त्यभावप्रसङ्ग इति चेन्न । अलौकिकस्यापि

१. 'धं र', २. 'न' ख. पाठः.

लौकिकभेदाग्रहणेन प्रवृत्त्युपपत्तेः। अथवालौकिकस्य लौकिकतां मन्यमानस्तत्र प्रवर्तेत इति । तथानिर्वचनीयरजतावबोधे च प्रवृत्त्यसम्भवाद् भवता च मदुक्तमार्गानुसार आश्रयणीय एव । अतो नानिर्वचनीयापरमार्थरजतसद्भाव इति दृष्टान्ताभावान्न प्रपञ्चमिथ्यात्वसिद्धिः । ननु भेदाग्रहणस्य प्रवर्तकत्वे नालौकिकरजतकल्पना सङ्गच्छते। शुक्तिरजतयोरेव गृह्यमाणस्मर्यमाणयोर्भेदाग्रहणाद् रजतार्थिनस्तत्र प्रवृत्त्युपपत्तेः कल्पनागौरवप्रसङ्गात् । तथाहि — इदं रजतमित्यत्र इदमनुभवः[1] पुरोवर्तिशुक्तिविषयः । रजतमिति तु सदृशदर्शनसमुद्बुद्धसंस्कारजं देशान्तरगतरजतविषयं स्मरणम्। तत्रानुभूयमानस्मर्यमाणयोः शुक्तिरजतयोर्भेदाग्रहणादेव रजतार्थिनः पुरोवर्तिनि शुक्तिरजते प्रवृत्त्युपपत्तेर्नालौकिकरजतकल्पनमुपपन्नमिति । तत्र च न मिथ्याभूतं किञ्चिदस्तीति प्रपञ्चमिथ्यात्वानुमानस्य दृष्टान्ताभावादप्रामाण्यमिति । नैवम् । तच्छब्दोल्लेखनशून्यतया रजतज्ञानस्य स्मृतिरूपत्वासंभवात् । तस्मादत्रालौकिकं रजतं भासत इति। नैतदेवम्। अलौकिकरजतग्रहणस्य प्रवर्तकत्वानुपपत्तेः। न चालौकिकस्य लौकिकतां मन्यमानः प्रवर्तेत इति वाच्यम्। अन्यथाख्यातिवादप्रसङ्गात्। न च लौकिकभेदाग्रहणात् प्रवृत्तिः। स्वर्णभेदाग्रहणेन तदर्थिनस्तत्र प्रवृत्तिप्रसङ्गात्। न च गृह्यमाणयोर्भेदाग्रहणं प्रवर्तकमिति स्वर्णाग्रहणेन तदर्थिनस्तत्र प्रवृत्त्यभाव इति वाच्यम्। लौकिकर-

१. 'मित्यनु' ग. पाठः.

जतस्याप्यगृह्यमाणतया तदर्थिनस्तत्र प्रवृत्त्यसंभवात् । न चानेन रजतज्ञानेन तस्यापि ग्रहणमिति वाच्यं, देशान्तरस्थतयेन्द्रियगोचरत्वासंभवात् । न चेदं स्मृत्यनुभवात्मकं पुरोवर्तिदेशान्तरगतरजतद्वयविषयं[1] विज्ञानद्वयमिति वाच्यम्, इन्द्रियसंप्रयोगजन्यत्वात् तच्छब्दोल्लेखशून्यत्वाच्च रजतज्ञानस्य स्मृतित्वासंभवात् । तस्मादत्र भासमानं रजतमसदिति शून्यवादिनो मिथ्यात्वं चासद्विषयत्वमिति प्रपञ्चमिथ्यात्वानुमानात् प्रपञ्चस्याप्यसत्त्वमिति । नैतदेवम् । असद्रजतावबोधे रजतार्थिनस्तत्र प्रवृत्त्यनुपपत्तेः । अथासद्रजतस्य सद्रजतभेदाग्रहात् तदभेदग्रहाद्वा प्रवृत्त्युपपत्तिरिति चेत् । नैवम् । रजतशुक्त्योरेव भेदाग्रहणादभेदग्रहणाद्वा प्रवृत्त्युपपत्तौ तद्व्यतिरिक्तासद्रजतकल्पनासंभवात् । तस्मादत्र रजतज्ञानं स्वगतं रजताकारं बहिः शुक्तिमस्तके प्रकाशयतीत्यात्मख्यातिवादिनः, असतः ख्यानायोगात् सतश्च देशान्तरस्थत्वाद् अरजतस्य रजतधीगोचरत्वासंभवाच्च ज्ञानगतरजताकारस्य बाह्यतयावभासो भ्रम इति । जाग्रज्ज्ञानानि च स्वाकारव्यतिरिक्तार्थशून्यानि ज्ञानत्वात् स्वप्नज्ञानवदिति ज्ञानाद्वैतवादी, ज्ञानमात्रं सर्वं तदन्यासत्त्वस्यानेनानुमानेनावगतत्वादिति । नैवम् । अस्यानुमानस्य पक्षहेतुदृष्टान्तादिग्राहकज्ञानैः स्वव्यतिरिक्तार्थवद्भिर्व्यभिचारात् । तेषामग्राह्यत्वेऽस्यानुमानस्याश्रयासिद्धिस्वरूपासिद्धिधर्म्य(?)सिद्धदृष्टान्तत्वादि-

१. 'यं ज्ञा' क. पाठः.

दोषप्रसङ्गः। न च स्वप्नज्ञानानां स्वाकारग्राहकत्वं, विज्ञानानां साकारत्वे प्रमाणाभावात्। न च नीलज्ञानं पीतज्ञानमित्यादिप्रातिकर्मव्यवस्थान्यथानुपपत्त्या तज्ज्ञानानां नीलपीताद्याकारवत्त्वसिद्धिः। नीलपीतादेः कर्मकारकतया प्रामाण्यात्। तस्मात् स्वाकारं बहीरूपतया न ख्यापयन्ति भ्रान्तय इत्यात्मख्यात्यसंभवः। किं तर्हि भ्रान्तिज्ञानानां भ्रान्तत्वम्, अनादिवृद्धव्यवहारावगतस्वविषयपरित्यागेन विषयान्तरोपसर्पणमिति ब्रूमः। तत्र च प्रमाणं नेदं रजतम्, अपि तु शुक्तिकेति बाधकप्रत्ययानन्तरमिदं शुक्तिशकलं रजतरूपेण मया प्रत्याकलितमित्यबाध्यमानं प्रत्यभिज्ञात्मकं प्रत्यक्षमुपलभ्यत इति। तद्विपरीतानिर्वचनीयालौकिकाख्यात्यसत्ख्यात्यात्मख्यात्यादिप्रतिपादकानां प्रमाणानामग्न्यनुष्णत्वप्रतिपादककृतकत्वानुमानवदप्रामाण्यमिति। तदुक्तं न्यायविद्भिः—

"विज्ञानानां यथार्थत्वं सर्वेषां केचिदूचिरे।
तदसाध्वन्यथाख्यातिर्मानस्या मीयते धिया॥"

इति। तथा अनुमानादप्यन्यथाख्यातिरत्रावगम्यते। तथाहि—विमता रजतार्थिनां पुरोवर्तिनि शुक्तिशकले प्रवृत्तिः स्वगोचरे रजतज्ञानपूर्विका, रजतादित्साधीनप्रवृत्तित्वात्, सम्यग्रजतप्रवृत्तिवदिति। शुक्तिशकलं वा रजतज्ञानविषयः, रजतादित्साधीनप्रवृत्तिविषयत्वात्, सम्यग्रजतवदिति। तथा नेदं रजतम्, अपितु शुक्तिकेति बाधकप्रत्ययश्च पक्षान्तरेषु नोपपद्यते। शुक्तेः रजतरूपताप्राप्त्यभावात्। प्रकारा-

न्तरेण बाधकप्रत्ययप्रसङ्गश्च—नेदं सद्रजतम्, अपित्वसद्रजतमिति, नात्र सद्रजतमस्ति, अपित्वन्यत्रेति वानिर्वचनीयख्यातिपक्षे, नात्र वलयकरणसमर्थं रजतमस्ति (अपि ?) अपित्वन्यत्रेति, नेदं वलयकरणसमर्थं रजतमपित्वलौकिकमिति वा प्राभाकरैकदेशी(या ? यमीमां)सकपक्षे, नेदं सद्रजतम् अपि त्वसद्रजतमिति नात्र सद्रजतमस्ति अपित्वन्यत्रेति वासत्ख्यातिपक्षे, नात्र रजतमस्त्यपित्वान्तरमित्यात्मख्यातिपक्षे, रजताद् भिन्नमिदं शुक्तिशकलमिति भेदाग्रहणपक्षे भवेदिति। तस्मादन्यथाख्यातिव्यतिरिक्तख्यातीनामसंभव इति। रजतार्थिप्रवृत्त्यसंभवाच्च ख्यात्यन्तरासंभवः। अनन्तवस्तुभेदाग्रहणसद्भावात् पुरोवर्तिनि तदर्थिनां प्रवृत्तिप्रसङ्गः। न च गृह्यमाणयोर्भेदाग्रहणात् प्रवृत्तिः। घटपटयोर्गृह्यमाणयोस्तदानीम् भेदग्रहणाभावेन घटार्थिनः पटे प्रवृत्तिप्रसङ्गात्। न च धर्मिप्रतियोगिग्रहणवेलायां तद्भेदग्रहणोपपत्तिः। उभयग्रहणपूर्वकत्वाद् भेदप्रवृत्तेरिति। अथ भेदस्य स्वरूपत्वात् स्वरूपग्रहणेन भेदस्यापि गृहीतत्वाद् भेदाग्रहणाभावेनाप्रवृत्तिरिति चेत्। न तर्हि रजतार्थिनः पुरोवर्तिनि शुक्तिशकले प्रवृत्तिः। स्वयम्प्रकाशमानयोर्ग्रहणस्मरणयोरिदं रजतमिति ज्ञानयोर्गृह्यमाणस्मर्यमाणयोश्च शुक्तिरजतयोः स्वरूपाग्रहणेन भेदाग्रहणासंभवात्। किञ्च भेदाग्रहणस्य प्रवर्तकत्वे शब्दार्थसंबन्धग्रहणासंभवप्रसङ्गः। तथाहि— गामानयेति प्रयोजकवाक्यश्रवणसमनन्तरं प्र-

१. 'त्वपरमार्थमि' ख. ग. पाठः. २. 'घ' ग. पाठः.

योऽग्रवृद्धप्रवृत्तिमुपलभमानो बाल एवमवगच्छति — अस्य गमनक्रियाहेतुः प्रयत्नो जात इति, स्वात्मनि गमनादिक्रियायाः प्रयत्नपूर्वकत्वदर्शनात् । प्रयत्नकारणत्वेनेच्छां गमनानुमितप्रयत्नेनानुमिनोति, इच्छाकारणत्वेन चेष्टसाधनज्ञानकारणत्वेन च प्रयोजकवृद्धवाक्यं ज्ञानपूर्वकालवर्ति, तत्कारणवस्त्वन्तराभावात् । तत आनीयमानमर्थमुपलभमानोऽयमर्थसमुदायोऽनेन शब्दसमुदायादवगत इति जानाति। पश्चादावापोद्वापाभ्यां विशेषतोऽध्यवस्यति — अस्यार्थविशेषस्यायं शब्दविशेषो वाचकः, अस्य पदविशेषस्यायमर्थविशेषो वाच्य इति वा । अत्राग्रहणस्य ज्ञानप्रागभावरूपतयाशब्दजन्यत्वाच्छब्दशक्तिकल्पनानवकाशः, ज्ञानद्वारेणेच्छाप्रयत्नावुत्पाद्य शब्दस्य प्रवर्तकत्वादिति चन्द्रद्वित्वशङ्खपीतिमादिभ्रमादिषु न भेदाग्रहणसंभव इति । तस्मान्न भेदाग्रहणात् प्रवृत्तिः, अपित्वन्यथाग्रहणादिति ब्रूमः । ननु शैवैः शास्त्रेऽन्यथाख्यातिराश्रीयत इति कुतोऽवगतं, भूतशुद्धितन्त्रे उक्तत्वात् । तथाहि —

"अन्यथाख्यामुपाश्रित्य सांख्यवच्छिवशासनम् ।
या अनिर्वचनीयेति तथा सिद्धान्तवादतः ॥
वेदान्तवादिनां दृष्टिमाश्रितं वैष्णवं मतम् ।"

इति । सांख्यमिति च सेश्वरसांख्यं विवक्षितम् । इतरस्याख्यातिवादित्वात् । तथाप्युक्तं सांख्याचार्यैः — "विपर्ययो

---

१. 'जायत' ग. पाठः.

मिथ्याज्ञानमतद्रूपप्रतिष्ठमि"ति सूत्रेणान्यथाख्यातिप्रतिपादनात्। तस्माच्छुक्त्यविद्यासमुद्भूतस्य शुक्त्यधिष्ठितस्य शुक्तिव्यतिरिक्तस्याधिष्ठानयाथात्म्यज्ञाननिवर्त्यस्य[1] मिथ्याभूतस्य रजतस्याभावात् प्रपञ्चमिथ्यात्वानुमानं धर्म्यसिद्धदृष्टा[2]न्ततया न प्रामाण्यसंपदमधिगच्छतीति। तथात्मनोऽपि स्वतः सिद्धस्य श्रुतिप्रमाणदृश्यत्वाद्धेतोर्व्यभिचारः। किञ्च प्रपञ्चस्य धर्मिणो दृश्यत्वेन हेतुना यथा साध्यते, तथा दृश्यत्वस्य हेतोर्मिथ्यात्वस्य साध्यधर्मस्य मिथ्यात्वं यद्यनेनैवानुमानेन साध्येत, तदा हेतोः पक्षैकदेशतया पक्षे वृत्त्यभावादनिश्चितपक्षवृत्तिरसिद्ध इत्यसिद्धत्वं प्रपञ्चमिथ्यात्वस्य धर्मिणोऽन्यत्र[3] प्रपञ्चवदसिद्धेराश्रयैकदेशासिद्धत्वं च प्रसज्यते। तद्द्वयस्य मिथ्यात्वासाधने तत्र वर्तमानत्वाद् दृश्यत्वस्य व्यभिचारः। प्रमाणान्तरेण तन्मिथ्यात्वसाधने तन्मिथ्यात्वस्य मिथ्यात्वासाधनात् तत्र द्वयोर्व्यभिचारः। तस्यापि मिथ्यात्वसाधनेऽन्तिमस्य मिथ्यात्वस्य मिथ्यात्वासाधनात् तत्र द्वयोर्व्यभिचारः। तस्यापि मिथ्यात्वासाधनेऽन्तिमस्य मिथ्यात्वस्य मिथ्यात्वासाधनात् तत्र वर्तमानतया हेतोर्व्यभिचारः। तथा मिथ्यात्वं यद्यसत्त्वं तदा सन् घटः सन् पट इत्यादिप्रत्यक्षबाधः। प्रपञ्चस्य धर्मिणो मिथ्यात्वस्य धर्मस्य हेतोर्दृश्यत्वस्य शुक्तिरजतस्य दृष्टान्तस्य च शशविषाणकल्पत्वेनाश्रयासिद्ध्यादिदोषप्रसङ्गः। तेषां सद्भावे हेतोर्व्यभिचारः। इत्युभयथा शून्यवादिनां न वादेऽधिकारः। तदुक्तम्—

१. 'ष्ठितमिति', २. 'र्मसिद्धं दृ' ग. पाठः. ३. 'न्यम' ख. पाठः.

"अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः"

इति। यदि ज्ञाननिवर्त्यत्वं, तदा च प्रत्यक्षादिविरोधः। प्रत्यक्षादिना मुद्गरप्रहारादिनिवर्त्यत्वोपलम्भेन कार्यकल्प्यज्ञाननिवर्तनयोग्यताया असंभवात्। न च कल्पकोटिशतसहस्रवर्तिनां पदार्थानां कारणान्तरविनष्टानामज्ञानादविनाशो घटत इति। यदि सदसद्विलक्षणत्वं मिथ्यात्वं, तदापि प्रत्यक्षादिविरोधः। प्रत्यक्षादिना पदार्थानां सत्त्वासत्त्वयोरुपलम्भात्। तथा विरुद्धत्वाच्च सदसत्त्ववदेकस्य पदार्थस्य न सदसद्वैलक्षण्योपपत्तिः। देशकालभेदेन त्वर्थानां सदसत्त्वयोरुपपत्तिः। उभयवैलक्षण्यं तु न कथञ्चिदुपपद्यत इति। अथ बाध्यत्वमिति चेदस्तु। बाध्यत्वं यदि नाशित्वं, तदांशे सिद्धसाध्यतांशे धर्मिग्राहकप्रमाणबाधा च। कालाद्यवनिपर्यन्ततत्त्वानां तत्कार्याणां च विनाशित्वस्य सिद्धत्वाद् मायायाः स्वग्राहकप्रमाणेन नित्यत्वस्य सिद्धत्वाच्चेति विश्वकार्यकलापस्य कारणापेक्षायां तन्मूलतया[2] मायासद्भावसिद्धिः। अतस्तस्या नित्यत्वं, विश्वकार्यकारणतयाकार्यत्वेनानित्यत्वासंभवात्[3] तस्याश्च कारणान्तरकल्पनायामनवस्थाप्रसङ्गाच्च। नित्यत्वं कस्यचिदाश्रयणीयम्। तत् कल्पनागौरवपरिहाराय प्रथमभूताया मायाया एवाभ्युपगतमिति धर्मिग्राहकेणैव प्रमाणेन तन्नित्यत्वमपि सिद्धमिति (न) धर्मिग्राहकप्रमाणविरोधः। न चानेन तस्य बाधासंभवः। अस्य तन्मूलतया तदभावे मायासद्भा-

१. 'वादत्वा', २. 'ता' क. पाठः. ३. 'नासद्भत्वा' ख. पाठः.

वसिद्धेराश्रयासिद्धिदोषप्रसङ्गात् । अथ बाधात्मकबोधविषयत्वं बाध्यत्वं, तस्य शुक्तिरज्ज्वादावुपजातरजतसर्पादिज्ञानेऽप्य[1]स्तीति न साध्यहीनमुदाहरणम् । तथाहि — अनादिसिद्धस्वविषयरजतादिपरित्यागेन विषयान्तरे शुक्त्यादावुपसर्पणान्मिथ्येदं ममोत्पन्नं रजतादिज्ञानमिति बाधात्मकबोधविषयता रजतादिज्ञानानामुपलभ्यते । तद्दृष्टान्तबलात् प्रपञ्चस्यापि बाधात्मकबोधविषयत्वं साध्यत इति न कश्चिद् दोष इति चेत् । नैवम् । सिद्धसाध्यताप्रसङ्गात् । तथाहि — "सर्वो वै रुद्रः" इत्यादिश्रुतेः,

"विचारतस्तु रुद्रस्य स्थूलमेतच्चराचरम् ।"

इत्यादिस्मृतेश्च शरीरशरीरिरूपतया सर्वस्य रुद्रात्मकत्वावगमात् सर्वेषामपि पदार्थानां रुद्रात्मकत्वावभासस्य भ्रमरूपत्वं, तेन नायं प्रपञ्चोऽशिवात्मकः, किन्तु रुद्रात्मक एवेति बाधात्मकबोधविषयत्वस्य सिद्धत्वात् सिद्धसाध्यताप्रसङ्ग इति । अथाशिवात्मतागोचरा ये प्रत्ययाः प्रपञ्चविषयास्तेषां मिथ्यात्वमन्यथाख्यातिरूपत्वं साध्यत इति चेत् । तर्हि सिद्धं नः समीहितं, प्रपञ्चसत्यत्वाविरोधात् । नहि रज्जौ सर्पज्ञानोत्पादेन रज्जुसत्यत्वं विरुध्यत इति । तस्माद् युक्तमुक्तं माया च वस्तुरूपेति । अपरमार्थात् परमार्थवस्तूत्पादासम्भवाच्चेति । अपरे पुनर्माया च वस्तुरूपेत्येतद् वाक्यमन्यथा व्याचचक्षिरे । तथाहि — माया वस्तुरूपा शिवरूपा तत्का(र्य-त्वं ? र्यं) च जगच्छिवरूपम् । शिवाद् भिन्नस्य कस्यचि-

---

१. 'नेष्वप्य' ख. पाठः.

दसंभवात् । तथाहि — ज्ञानस्वभाव एवायमात्मा शिवो मायातत्कार्यात्मनावभासते । ततः स एव तदुभयमिति । न च तथा सति शिवस्य परिणामित्वमिति वाच्यं, विवर्तवादाश्रयणात् । अप्रच्युतस्वस्वभावस्य वस्तुनोऽन्यथाभावो विवर्तः । यथा रज्जोः[1] सर्पत्वम् । न हि रज्जौ सर्पभावकाले परिणामादि दृष्टमिति महेश्वरस्यापि जगद्रूपत्वे तद्वदेव परिणामादिकासंभव इति शिव एव मायातत्कार्यात्मना भासत इति । तदुक्तमीश्वरगीतायां —

"स एव मूलप्रकृतिः प्रधानः पुरुषोऽपि च ।
विकारा महदादीनि देवदेवः सनातनः ॥"

इति । नहि रजतादेरन्यत्र विद्यमानस्य शुक्तिकादौ भ्रमदर्शनादस्य प्रपञ्चस्यान्यत्रासंभवाद् भ्रमरूपत्वासंभव इति वाच्यम् । पूर्वदर्शनमात्रस्य भ्रमहेतुसंस्कारहेतुतया प्रयोजकत्वेनान्यत्र विद्यमानतया अप्रयोजकत्वात् । तस्मात् पूर्वपू[2]र्वदिवसजन्मकल्पादि[3]ष्वनुभूतस्योत्तरोत्तरदिवसजन्मकल्पादि[4]षु भ्रमसंभव इति न कश्चिद् दोषः । तदुक्तं शतककारेण—

"सर्वविकल्पविहीनं शुद्धं शान्तं व्ययोदयविहीनम् ।
यत् परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्म जगत् ॥
दर्पणबिम्बे यद्वन्नगरग्रामादि चित्रमविभागि ।
भाति विभागेनैव च परस्परं दर्पणादपि च ॥

---

१. 'ज्जौ', २. 'र्वदि', ३. 'कल्मषादि' ख. पाठः.
४. 'कल्मषादि' क. पाठः.

विमलतरपरमशाम्भवबोधात् तद्वद्विभागशून्यमपि ।
अन्योन्यं च ततोऽपि च विभक्तमाभाति शिवरूपम् ॥"

इति ॥ १८ ॥

इदानीं शक्तिगणं निरूपयति—

**पाशानुग्राहित्वात् पुरुषतिरोधायिका विभोः शक्तिः ।
पाशत्वेनाभिहिता पाशाश्च चतुर्विधास्त्वेवम् ॥ १९ ॥**

इति । मलकर्ममायाकार्याणां पाशानामचेतनतया परमेश्वरशक्त्यावेशं विना पशुबन्धनसामर्थ्याभावात् स्वावेशेन पाशानुग्रहं स्वकार्ये प्रवर्तनं कुर्वती पुरुषतिरोधायिका पुरुषाच्छादिका विभोः परमेश्वरस्य शक्तिः पाशतयोक्ता तत्त्वज्ञैरिति। पाशाश्च चतुर्विधास्त्वेवमित्युपसंहरति । एवमुक्तेन प्रकारेण पाशाश्चतुर्विधा इत्यर्थः । नन्वर्थपञ्चकं पाश इत्युपक्रम्य पाशाश्चतुर्विधा इत्युपसंहारे पूर्वापरविरोध इति चेन्नैवम् । स्थूलसूक्ष्मविभागेनोक्ताया मायाया एकत्वविवक्षया चातुर्विध्याभिधानादिति। पाशाश्च चतुर्विधास्त्वेवमित्युपसंहारवाक्यस्थेन चशब्देन शास्त्रार्थोपसंहारो द्योतितः। एवं त्रिविधं तत्त्वमिति ॥ १९ ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायां पतिपशुपाशात्मकविचारः

प्रथमः परिच्छेदः ।

---

१. 'पूर्वम्' क. पाठः.

अथ द्वितीयः परिच्छेदः ।

अथ संक्षेपेणोक्तानां पतिपशुपाशानां विस्तारमुपदिशति—

शुद्धानि पञ्च तत्त्वान्याद्यन्तेषु स्मरन्ति शिवतत्त्वम् ।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च ॥ १ ॥

पुंसो ज्ञकर्तृतार्थं मायातस्तत्त्वपञ्चकं भवति ।
कालो नियतिश्च तथा कला च विद्या च रागश्च ॥ २॥

अव्यक्तं मायातो गुणतत्त्वं तदनु बुद्ध्यहंकारौ ।
चेतोधीकर्मेन्द्रियतन्मात्राण्यपि च भूतानि ॥ ३ ॥

इति । अत्राद्यं पञ्चकं शिवस्वरूपत्वाच्छुद्धं, मध्यमं सप्तकं शुद्धाशुद्धं, पशुरूपत्वात् । कथमत्र सप्तकत्वमित्यत आह— पुंसो ज्ञकर्तृतार्थं मायातस्तत्त्वपञ्चकं भवतीति । पुरुषस्य ज्ञानार्थं कर्तृत्वार्थं च मायातः तत्त्वपञ्चकमुत्पद्यते । तेन कारणभूता माया कार्यभूतं पञ्चकं तदुपहितः पुरुषः सप्तमः इति सप्तकत्वम् । तदुक्तं शैवरहस्ये—

"माया कालो नियतिः कला च विद्याभिलाषकृत् पुरुषः ।
क्लृप्तानि सप्तधैवं शुद्धाशुद्धानि तत्त्वानि ॥"

इति । शिष्टं केवलाशुद्धम् अव्यक्तादिपृथिव्यन्तम् । अव्यक्तस्य मायात उद्भवः, अव्यक्ताद् गुणतत्त्वस्य, गुणतत्त्वाद् बुद्धेः, बुद्धितत्त्वादहंकारस्य, अहंकारान्मनोबुद्धीन्द्रियकर्मेन्द्रियतन्मात्राणामुद्भवः, तन्मात्रेभ्य आकाशादिपृथिव्यन्तानामिति ॥ १, २, ३ ॥

किमर्थमेषामुत्पादः कृतो भगवता महेश्वरेणेत्याशङ्क्याह—

पुरुषस्य हि भोगार्थं प्रधानतो विंशतिर्भवेत् त्र्यधिका।
यस्मात् प्रकृतिगुणानां नात्यन्तं वस्तुतो भेदः ॥ ४ ॥

इति । पुरुषस्य पशोः स्वकृतपुण्यापुण्यफलभूतसुखदुःखानुभवार्थमेषामुत्पत्तिः। भोगस्तु भोगायतनं भूतात्मकं शरीरं भोगसाधनानीन्द्रियाणि भोग्यान् शब्दादिविषयान् विना न संभवतीति भोगार्थमेषां जन्मेति सिद्धम् । अव्यक्तगुणतत्त्वयोरत्यन्तभेदाभावाद् न च तत्त्वाधिक्यमिति । एतदुक्तं शैवरहस्ये —

"अव्यक्तबुद्ध्यहंकृतिमनांसि चत्वारि शब्दमात्राद्यम् ।
श्रोत्राद्यं वागाद्यं वियदाद्यं पञ्चकं च पृथक् ॥
तत्त्वचतुर्विंशतिकं त्रिगुणात्मतयैव केवलाशुद्धम् ।"

इति ॥ ४ ॥

प्रथमोद्दिष्टं शिवतत्त्वं लक्षयति —

व्यापकमेकं नित्यं कारणमखिलस्य तत्त्वजातस्य।
ज्ञानक्रियास्वभावं शिवतत्त्वं जगदुराचार्याः ॥ ५ ॥

इति । व्यापकं, व्याप्तं सर्वगतमित्यर्थः । एकमद्वितीयं, सर्वभूतस्वरूपेणावस्थितमित्यर्थः । नित्यम् अनश्वरम् । अखिलतत्त्वजातस्य कालादिपृथिव्यन्तस्य कारणमुत्पादकम्। ज्ञानक्रियास्वभावमिति । ज्ञानमात्रं क्रिया व्यापारः साक्षित्वं स्वभावो यस्य तत्त्वस्य, तत् शिवतत्त्वमिति तल्लक्षणम् । जगदुराहुः आचार्याः आगमविद इति । अथवा स्वव्यतिरिक्तमस्ति चेत् तदखिलं व्याप्नोतीति व्यापकमित्युक्तम् । स्वसमानासमानपुरुषान्तराभावादेकत्वम् । व्याप्त्येकत्वे चा-

काशस्यापि स्त इति तन्निवृत्त्यर्थं नित्यपदोपादानम् । व्याप्तिनित्यत्वैकत्वानि पशोरपि विद्यन्त इति तन्निवृत्त्यर्थं कारणमखिलस्य तत्त्वजातस्येति पदम् । मायायाश्च व्यापकनित्यत्वैकत्वाखिलकारणत्वसद्भावात् तन्निवृत्त्यर्थं ज्ञानक्रियास्वभावमित्युक्तम् । अतो यद् व्यापकमेकं नित्यमखिलतत्त्वकारणं ज्ञानक्रियास्वभावं, तच्छिवतत्त्वमिति । एतदुक्तं श्वेताश्वतरे—

"सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिवः ॥"

इति । शिवधर्मोत्तरे च—

"आदिमध्यान्तनिर्मुक्तः स्वभावविमलः प्रभुः ।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयः शिवागमे ॥"

इति । सिद्धान्तहृदये च—

"कूटस्थममृतं ब्रह्म सत्यमेकमविक्रियम् ।
निष्प्रत्यनीकं चित्सौख्यं नित्यतृप्तमलुप्तदृक् ॥
अध्वातीतं परं व्योम विश्वव्यापि निरामयम् ।
अणीयोऽणोरजं नित्यमुक्तं च महतो महत् ॥
अप्रतर्क्यमरूपादि निरौपम्यमलक्षणम् ।
सदात्मकं स्वयंज्योतिरवाङ्मनसगोचरम् ॥
अतन्निषेधमार्गेण ज्ञायते यच्च सूरिभिः ।
यच्च भ्रामकवत् कर्तृ ज्ञापकं च प्रदीपवत् ॥

१. 'न्तफलोद' ख. पाठः.

मायासहायं तत् प्राहुः शिवतत्त्वं मनीषिणः ।”

इति ॥ ५ ॥

ननु निष्क्रियस्य शिवतत्त्वस्य कथं निखिलतत्त्वकारणत्वमित्याशङ्क्याह —

अस्मिन्निलीय निखिला इच्छाद्याः शक्तयः स्वकं कृत्यम् ।
कुर्वन्ति तेन तदिदं सर्वानुग्राहकं प्राहुः ॥ ६ ॥

इति । अस्मिन् परमेश्वरतत्त्वे निलीनास्तत्तत्त्वमवलम्ब्य स्थिता इच्छाद्याः शक्तयः स्वकार्यं कुर्वन्ति, न स्वातन्त्र्येण । तासां शिवसामर्थ्यरूपत्वात् । तेनासौ शिवो निखिलतत्त्वकारणम्, अत एव सर्वानुग्राहकश्च भवतीति । अस्य शिवतत्त्वस्य षडध्वव्याप्तिः ।

स्वराः षोडश वर्णाध्वा ताराद्यं नवकं पदम् ।
मन्त्रौ षड्वर्णपञ्चार्णौ तत्त्वं तत्र शिवात्मकम् ॥
नेन्तं नमःपरायाद्यं त्रिपञ्चभुवनान्यपि ।
निवृत्त्यादीनि पञ्चात्र शान्त्यतीतादयः कलाः ॥
सर्वत्रान्ते पदं योज्यं स्यात् षडध्वात्मने नमः ॥ ६ ॥

अथ शक्तितत्त्वमाह —

चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव ॥ ७ ॥

इति । अयमर्थः — पशुपाशानुग्रहार्थं सिसृक्षोः परमेश्वरस्याद्यो य उन्मेषः उन्निद्रभावः, ईक्षणमिति यावत् । तच्छ-

१. ‘प’ ख. ग. पाठः.

क्तितत्त्वमित्युक्तं, शिवतत्त्वादभिन्नं च, शक्तितद्वतोर्भेदासंभवादिति। ननु कथं शक्तेः सद्भावावगमः। कार्यानुपपत्त्येति ब्रूमः। निष्क्रियस्य शिवस्य जगत्सृष्ट्यादिकं शक्त्यभावे न[1] संभवतीति त[2]त्सिद्धिः। तथाहि—यथाग्नेरङ्गुलिसंयोगे विद्यमानेऽपि (बन्धा? मण्या)दिप्रतिबन्धकसद्भावदशायां स्फोटकार्यानुद्भवादग्न्यङ्गुलिसंयोगव्यतिरिक्ता दाहिका शक्तिः कल्प्यते, तथात्रापि पञ्चविधकार्यान्यथानुपपत्त्या शक्तिसद्भावसिद्धिः। न चाग्न्यङ्गुलिसंयोग एव स्फोटहेतुरिति वाच्यम्। तस्य प्रतिबन्धाप्रतिबन्धावस्थयोः सद्भावेनाविशेषेण स्फोटकार्योदयप्रसङ्गात्। न च प्रतिबन्धकाभावात्मककारणाभावात् तदानीं कार्यानुदयो न शक्त्यभावादिति वाच्यम्। प्रतिबन्धकाभावस्याकारणत्वात्। भूतानां भविष्यतां देशान्तरे वर्तमानानां च प्रतिबन्धकानामभावसद्भावेऽपि स्फोटकार्यानु[3]त्पत्तेस्तस्याकारणत्वसिद्धिः। न चैतस्य प्रतिबन्धकाभावस्य कारणत्वेन तद्व्यतिरिक्ताभावसद्भावेऽपि कार्यानुदयो घटत इति वाच्यम्। एतदभावस्य कारणत्वे प्रमाणाभावाद् विपरीतप्रमाणसद्भावाच्च। तथाहि—विमतो भावः स्फोटाजनकः प्रतिबन्धकाभावत्वात् तदन्याभाववदिति। तथैतत्प्रतिबन्धकविगमने एतदभावसद्भावेऽपि प्रतिबन्धकान्तरसद्भावे स्फोटकार्यानुदयाच्चैतस्याकारणत्वसिद्धिः। न च सर्वेषां प्रतिबन्धकानामभावः कारणम्। उपरिदीपनयनस्याङ्कुरोत्पत्ति-

---

१. 'न तत् सं', २. 'ति त' ग. पाठः. ३. 'नुपपत्ते' ख. पाठः.

प्रतिबन्धकस्यापनयने बीजादङ्कुरोत्पत्तिप्रसङ्गात् । अथ (न) दीपनयनप्रध्वंसः कारणं, तत्प्रागभावस्य कारणत्वात् । स चात्र नास्तीति तस्य तत्र नीतत्वादिति चेद् । नैवम् । उपरिदीपनयनप्रागभावान्तरसद्भावेनाङ्कुरोत्पादप्रसङ्गात् । न चासावेव कारणमिति वाच्यम् । उपरिनीतदीपेषु बीजाङ्कुरेष्वेतद्दीपनयनप्रागभावस्य सद्भावात् तेभ्यो बीजेभ्योऽङ्कुरोत्पत्तिप्रसङ्गात् । अतो दीपनयनादतीन्द्रियं किमपि कारणं नष्टमित्यवगम्यते । तदभावाप्रतिबन्धावस्थायां कार्यानुदयनप्रतिबन्धकाभावस्याभावादिति । ननु शक्तेर्विनाशे कारणाभावात् प्रतिबन्धकावगमेऽग्नेः स्फोटकार्याभावो गतिस्तम्भने च सर्पादेर्गमनाभावश्च प्रसज्यते । मन्त्रेण नष्टशक्तित्वादिति चेद् । नैवम् । नष्टशक्तिज्वालानाशे पुनरुत्पद्यमानज्वालायाः शक्तिनाशाभावेन स्फोटोदयोपपत्तेः । सर्पस्य तु ध्यातभारवशात् गमनाभावः, न शक्तिनाशादिति पुनर्गमनोपपत्तेः । तस्माद् कार्यान्यथानुपपत्त्या शक्तिसद्भावसिद्धिः । तदुक्तं भट्टपादेन—

"शक्तयः सर्वभावानां कार्यार्थापत्तिगोचराः"

इति । सेयं परा शक्तिः परमेश्वरादभिन्ना । तस्या विकारा इच्छाद्याः शक्तयस्तदभिन्ना इति । तदुक्तं मातङ्गे—

"पत्युः शक्तिः परा सूक्ष्मा जाग्रतो द्योतनक्षमा ।
तया प्रभुः प्रबुद्धात्मा स्वतन्त्रः स सदाशिवः ॥"

---

१. 'प' ख. पाठः.

इति । अस्य शक्तितत्त्वस्य षडध्वव्याप्तिः—

"अनन्तायेति[1] पूर्वं यत् पदानां तु चतुष्टयम् ।
तत्त्वशक्तिः कलातीता पूर्वस्मात्तु विशिष्यते" ॥ ७ ॥

अथेदानीं सदाशिवादिशुद्धतत्त्वानां स्वरूपं निरूपयितुमाह—

ज्ञानक्रियाख्यशक्त्योरुत्कर्षनिकर्षयोरभावेन ।
यः प्रसरस्तं प्राहुः सदाशिवाख्यं बुधास्तत्त्वम् ॥ ८ ॥

इति । अयमभिप्रायः—पराशक्तिविकारभूतज्ञानेच्छाक्रियाशक्तीनां प्रसरावस्थायां ज्ञानक्रियात्मकशक्तिद्वयसाम्ये सतीच्छोद्रेको यदा विवक्ष्यते, तदा शिवतत्त्वं सदाशिवाभिधानमिति । तदुक्तं सिद्धान्तहृदये—

"ज्ञानक्रियाख्ये न्यक्तुल्ये शक्तीच्छोद्रेकमश्नुते ।
यदा सदाशिवाख्यस्तु तदासौ शिव उच्यते ॥"

इति । तत् तत्त्वं स्फटिकनिभम् । तदुक्तं चन्द्रज्ञाने—

"सदाशिवाख्यं विमलं शुद्धस्फटिकसन्निभम्"

इति । अस्य सदाशिवतत्त्वस्य षडध्वव्याप्तिः ।

वर्णाध्वात्र ककारः स्याच्छाश्वेतायादिकं[2] त्रिकम् ।
पदाध्वा च स्वयं तत्त्वभुवने शान्तिरेव च ॥ ८ ॥

ईश्वरतत्त्वनिरूपणार्थमाह—

न्यग्भवति यत्र शक्तिर्ज्ञानाख्योद्रिक्ततां क्रिया भजते ।
ईश्वरतत्त्वं तदिह प्रोक्तं सर्वार्थकर्तृ सदा ॥ ९ ॥

---

१. 'ति तन् पूर्वं प', २. 'स्व' ग. पाठः.

इति। न्यग्भूतज्ञानेच्छात्मकशक्तिद्वयसाम्ये सति यदा क्रियोद्रेको भवति, तदा शिवतत्त्वमीश्वराभिधानं भवति। तत् सर्वतत्त्वानां कर्तृस्वभावं, क्रियोद्रेकात्। तत् पावकाभम्। तदुक्तम्—

"अत ऊर्ध्वं भवेदन्यदीश्वरावरणं महत्।
दीप्तपावकवर्णाभं विद्येशास्तत्र संस्थिताः॥"

इति। ननु ज्ञानेच्छान्यग्भावे क्रियाशक्तेरसंभवः, तत्पूर्वकत्वात् क्रियाया इति चेत्। नैवम्। ज्ञानेच्छान्यग्भावस्य स्वविषयं प्रकाश्य तूष्णीम्भावरूपत्वेनासत्त्वरूपत्वाभावात्। तदुक्तं सिद्धान्तहृदये[1]—

"ज्ञानेच्छे न्यक्समे शक्ती क्रियाधिक्यं यदाश्नुते।
तदासावीश्वराख्यां तु लभते परमेश्वरः॥"

इति। अस्य षडध्वव्याप्तिः—खकारो वर्णाध्वा। ध्यानाहारायेत्यादीनि त्रीणि पदानि। 'नं ईशानमूर्ध्ने', 'नमः शिवाये'ति मन्त्रौ। स्वयं तत्त्वाध्वा। अनन्तादि[2]शिखण्ड्यन्तानि भुवनानि। विद्या कलाध्वा॥ ९॥

विद्यातत्त्वं वर्णयति—

न्यग्भवति कर्तृशक्तिर्ज्ञानाख्योद्रेकमश्नुते यत्र।
तत् तत्त्वं विद्याख्यं प्रकाशकं ज्ञानरूपत्वात्॥ १०॥

इति। न्यग्भूतेच्छाक्रियाशक्तिसाम्ये सति यदा ज्ञानोद्रेको भवति, तदा शिवतत्त्वं विद्याख्यं भवति। तदप्युक्तम्—

१. 'सिद्धत्व' ग. पाठः. २. 'नादि' क. पाठः.

"उद्रिच्यते ज्ञानशक्तिः क्रियेच्छे न्यक्समे यदा ।
तदासौ शुद्धविद्याख्यः सर्वविद्यानिधिः शिवः ॥"

इति । प्रयोजनमाह — प्रकाशकमिति । तत्र हेतुमाह — ज्ञानरूपत्वादिति । पद्मरागसमानवर्णा । तदुक्तं —

"तद्बाह्ये शुद्धविद्या स्यात् कोटीनां शतलक्षका ।
सुदीप्ता निर्मला सूक्ष्मा पद्मरागसमप्रभा ॥"

इति । अस्याः षडध्वव्याप्तिः — गकारो वर्णः । शिवायेत्यादीनि त्रीणि पदानि । 'मं तत्पुरुषवक्त्राये'ति 'नमः शिवाये'ति मन्त्रौ । शुद्धविद्या तत्त्वम् । वामाद्या नव भुवनानि । प्रतिष्ठा कला ॥ १० ॥

ननु नादबिन्दू शास्त्रान्तरे तत्त्वमध्ये कथितौ । अतस्तत्त्वाधिक्यमनयोरन्तर्भावो वा वक्तव्यः । तथाहि—

"तदूर्ध्वं बैन्दवं तत्त्वं निर्मलं सर्वतोमुखम् ।
परमं सर्वतत्त्वानामनन्तं ज्योतिरव्ययम् ॥"

इत्यादि । तथा विद्येश्वरविद्यामन्त्राणां सदाशिवे वृत्तिमन्ये मन्यन्ते । ततस्तन्निरासार्थं तयोरन्तर्भावार्थं चाह —

नादो बिन्दुः सकलौ सदा शिवं तत्त्वमाश्रितौ कथितौ ।
विद्येशाः पुनरीशे मन्त्रा विद्याश्च विद्याख्ये ॥ ११ ॥

इति । अयमभिप्रायः — नादबिन्दू कलावत्तया सकलौ सदा सर्वदा शिवाख्यं तत्त्वमाश्रितौ, तदभिन्नौ कथितावित्यर्थः । केचित् सदाशिवं तत्त्वमाश्रितावित्याहुः । विद्येशानन्तादयः ईश्वरतत्त्वे वर्तन्ते । तदुक्तं सिद्धान्तागमे—

"अनन्तसूक्ष्मौ शिवतमैकनेत्रैकरुद्रकाः ।
त्रिमूर्तिपूर्वः श्रीकण्ठः शिखण्डी च ततोऽष्टमः ॥
एते विद्येश्वरास्त्वष्टावीश्वरे संप्रकीर्तिताः ।"

इति । मन्त्राश्च विद्याश्च प्रकाशकतया प्रकाशकं विद्यातत्त्वमाश्रित्य वर्तन्त इति । तदुक्तं—

"मन्त्रा विद्याश्च विद्यायां बीजभूता भवन्ति हि"

इति ॥ ११ ॥

ननु नित्यतया विभुत्वेन चैषां क्रमासंभवात् कथं तत्सद्भावप्रतिपादनमित्याशङ्कयाह—

**पञ्चानामप्येषां[1] न हि क्रमोऽस्तीह कालरहितत्वात् ।
व्यापारवशादेषां विहिता खलु कल्पना शास्त्रे ॥ १२ ॥**

इति । अयमभिप्रायः—देशकालकृतस्य प्रथमचरमभावात्मकस्य क्रमस्यासंभवे(ति ? ऽपि) शक्तिव्यापारभेदोन्नेयभेदवशादेषां तत्त्वानां सद्भाव आश्रीयत इति ॥ १२ ॥

ननु किमर्थं परमेश्वरतत्त्वस्य स्वत एवामी भेदा नाभ्युपगम्यन्ते, येन शक्तिव्यापारोपाधिकृतभेदाश्रयणमित्याशङ्कयाह—

**तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिशतखचितम् ।
शक्तिव्यापृतिभेदात् तस्यैते कल्पिता भेदाः ॥ १३ ॥**

इति । यतः शिवतत्त्वस्य परमार्थतो भेदासंभवस्ततः शक्तिव्यापारोपाधिकृता एवामी पञ्च भेदाः । तद्भेदासंभवश्च ईश्वरानेकत्वकल्पनासंभवादिति । भेदस्वरूपासंभवाद्वा । स

---

१. 'न्ये' ख. पाठः.

चाश्रयासंभवात् । तथाहि — कोऽयं भेदाश्रयः । भिन्नो वा स्यादभिन्नो वा । यद्यभिन्ने वस्तुनि भेदस्य वृत्तिः, तदैकपदार्थाभावप्रसङ्गः, भेदसमावेशात् । यदि भिन्ने भेदस्य वृत्तिः, किं तर्हि भेदेन प्रयोजनम् । वस्तुनः पूर्वमेव भिन्नत्वात् । अस्तु भेदवति भेदस्य वृत्तिः । तत्र यदि भेदान्तरेण भिन्ने तद्वृत्त्यभ्युपगमः तदानवस्था । भेदान्तरस्यापि भिन्नवृत्तित्वात् । न च स्वेनैव भिन्ने स्वयं वर्तत इति वाच्यम् । आत्माश्रयप्रसङ्गात् । तस्मादभिन्न एव वस्तुनि भेदस्य वृत्तिरभ्युपगमनीया । तदा च तस्य चन्द्रभेदवदपरमार्थत्वम्, अभिन्नवृत्तित्वादिति । न च स्वरूपमेव भेदः । अयमस्माद् भिन्न इति सापेक्षस्य भेदप्रतिभासस्याभावप्रसङ्गात् । न च घट इत्यघटव्यावृत्तेरप्यवभास इति वाच्यं, पदार्थेषु वर्तमानताद्यवभासेनावर्तमानतादिव्यावृत्त्या क्षणिकत्वादिप्रसङ्गात् । तत्त्वं वस्तुतः परमार्थतः एकम् अभिन्नम् अद्वितीयम् । किं तदित्यत आह — शिवसंज्ञं शिवाख्यम् । "प्रमाता प्रमितं च विश्वम् शिवः सदैको बहुधा चाकशीती"ति श्रुतेः । चित्रशक्तिशतखचितमिति नानारूपशक्तिसहस्रमुद्रितम् । तदुक्तमध्वसिद्धौ —

"चित्रशक्तिसहस्राढ्यं शिवतत्त्वं समातिगम ।
विभक्तं पञ्चधा चैकं शक्त्युल्लासविभेदतः ॥"

इति । तस्माच्छक्तिव्यापारभेदादेव तस्य महेश्वरस्यैते सदाशिवादिभेदा इति ॥ १३ ॥

---

१. 'था हि त' ग. पाठः.

ननु किमर्थमेतानि रूपाणि करोति भगवानित्याशङ्कयाह —

चिदचिदनुग्रहहेतो रूपाण्येतानि स प्रभुः कृत्वा ।
कुरुते चितामनुग्रहमनादिमलरुद्धशक्तीनाम् ॥ १४ ॥

इति । अनादिमलप्रच्छादितशिवस्वभावानां पशूनां पाशानां जडानां चानुग्रहं कर्तुमेतानि रूपाणि स भगवान् करोतीत्यर्थः । तदुक्तं —

"शिवात्मकमिदं विश्वं शिव आधारकारणम् ।
अस्य शक्तिर्विपञ्ची स्यान्नियन्ता च सदाशिवः ॥
ईशः कर्ता कारकश्च शुद्धविद्या प्रकाशिका ।
एभिरीशोऽनुगृह्णाति क्लृप्तैर्भेदैश्चराचरम् ॥"

इति ॥ १४ ॥

चितामचितां च कीदृशम् अनुग्रहं करोति भगवानित्याशङ्कयाह —

भुक्तिं मुक्तिमणूनां स्वव्यापारे समर्थताधानम् ।
जडवर्गस्य विधत्ते सर्वानुग्राहकः शम्भुः ॥ १५ ॥

इति । भुक्तिं सुखदुःखानुभवरूपां मुक्तिं नित्यानन्दानुभवलक्षणां च अणूनां संसार्यात्मनाम् । स्वव्यापारसमर्थताधानं जडवर्गस्य पाशवर्गस्य विधत्ते करोति । सर्वानुग्राहकः । अतः कारणाच्छंभुरिति । ननु सुखदुःखानुभवप्रदानस्य कथमनुग्रहरूपत्वं, नित्यनिरतिशयानन्दे विद्यमाने विषदूषितमध्वन्नकल्पसुखलेशप्रदानस्यानुग्रहरूपत्वासम्भवात् । दुःखानुभवप्रदानस्याननुग्रहरूपत्वं सर्वेषां सम्मतमेवेति चेत । उच्यते । सुखानु-

---

१. 'प' ख. पाठः.

भवस्य तथाभूतस्यापि नित्यसुखरागोत्पादद्वारेणापवर्गहेतुतयानुग्रहरूपत्वम् । दुःखानुभवस्यापि संसारवैराग्योद्वेगजननद्वारेणापवर्गहेतुतयानुग्रहरूपत्वमिति तत्प्रदातुरनुग्राहकत्वम्। ननु तथाप्यस्य न सर्वानुग्राहकत्वं, दक्षाध्वरादौ दक्षादिनिग्रहश्रवणात् । घृणानिधित्वं च तेनैव बाधितम् । नहि घृणावतः कदाचिदपि प्राणिहिंसा दृष्टेति । रागादिमत्त्वं च तेनैवानुमितम् । नहि रागादिरहितस्य प्राणिहिंसा दृष्टेति । नैवम् । तन्निग्रहस्य दोषनिर्हरणार्थतया सर्वलोकपथ्यतया चानुग्रहरूपत्वात् । तदुक्तं श्रीवायवीये —

"ये के च निग्रहा लोके ब्रह्मादिषु निदर्शिताः ।
तेऽपि लोकहितायैव कृताः श्रीकण्ठमूर्तिना ॥
सदोषा एव देवाद्या निगृहीता यथोचितम् ।
अतस्तेऽपि विपाप्मानः प्रजाश्च विगतज्वराः ॥"

इति । अत्रेश्वरनिन्दा दक्षादीनां दोषः । तस्या दोषत्वं "अथ य एनं द्वेष्टि, स एव पापीयान् भवती"त्यादिश्रुतेरवगम्यते । एवेत्यवधारणा । अनन्तफलत्वं च तथा ।

"शिवनिन्दा गुरोर्निन्दा शिवज्ञानस्य दूषणम् ।
देवद्रव्यापहरणं गुरुद्रव्यविनाशनम् ॥
हरन्ति ये च संमूढाः शिवज्ञानस्य पुस्तकम् ।
सुमहापातकान्याहुरित्यनन्तफलानि षट् ॥"

इति शिवधर्मोत्तरागमाच्च तदवगमः । अतोऽनन्तफलस्यै शिवनिन्दादोषस्य फलानुभवलक्षणेन यमदण्डेन विनाशा-

१. 'म' क. पाठः. २. 'कं न' ग. पाठः. ३. 'नु' क. पाठः. ४. 'स्य नि' ख. पाठः.

संभवं मन्यमानो भगवान् करुणानुन्नहृदयो[1] निग्रहेण दक्षादीन् स्ववशान् कृत्वा स्वप्रणामात्मकं स्वनिन्दाप्रायश्चित्तं कारयामास । नहि प्रायश्चित्तान्तरैः खद्योतकल्पैर्नैशतमःकल्पमहेश्वरनिन्दादोषपरिहारो घटते । तेषां परिमितविषयतया परिमितानामपरिमितमहेश्वरविषयापरिमितनिन्दा[2]परिहारासंभवात् । यथा नैशतमसोऽनन्तस्याप्यनन्तादित्योदयेन प्रबलेन विनाशस्तथा महेश्वरप्रणामेनानन्तेनानन्ततन्निन्दाप्रतिक्षेप इति । तदुक्तं श्रीवायवीये—

"निग्रहोऽपि स्वरूपेण विदुषां न जुगुप्सितः ।
अत एव हि दण्ड्येषु दण्डो राज्ञां प्रशस्तये ॥
सर्वोऽपि निग्रहो लोके न च विद्वेषपूर्वकः ।
नहि द्वेष्टि पिता पुत्रं यो निगृह्यापि शिक्षयेत् ॥
निदानज्ञस्य भिषजो रुग्णे हिंसां प्रयुञ्जतः ।
न किञ्चिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका ॥"

इति । तस्मादुपपन्नं सर्वानुग्राहक इति ॥ १५ ॥

ननु तर्हि भुक्तिमुक्त्योरनुग्रहयोर्मुख्यतमं निःश्रेयसमेवासौ विदध्यात् । नामुख्यं भोगात्मकमित्याशङ्क्याह—

चिदनुग्रहस्त्वयं किल यन्मोक्षः शिवसमानतारूपः ।
सोऽनादित्वात्कर्मण इह भोगमृते न याति संसिद्धिम् ॥

इति । सत्यं संसारनिवृत्त्यात्मकापवर्गप्रदानमेव मुख्यानुग्रहो न भोगप्रदानम् । तथापि जात्यायुर्भोगफलानां कर्मणामनादिभूतानां फलभोगं विना नाशासंभवात् तन्नाशं विना

---

१. 'नन्दह्व', २. 'यतयाप' ख. पाठः.

निःश्रेयसानुपपत्तेस्तदर्थमेव भोगप्रदानमाश्रयणीयम्। स मोक्षः किमात्मक इत्याशङ्क्याह — शिवसमानतारूप इति। शिवेन समानता निर्विशेषताविवेकता रूपं स्वरूपं यस्य स शिवसमानतारूपः, सायुज्यलक्षण इति यावत् ॥ १६ ॥

ननु तर्हि कर्मफलभोग एव विधातव्यः, न जगदारम्भमित्याशङ्क्याह —

तेन विभुस्तद्भुक्त्यै कुरुते तनुकरणभुवननिष्पत्तिम्।
कर्त्रा विना न कार्यं न तथोपादानकरणाभ्याम् ॥ १७ ॥

इति। यतो भोगं विना न कर्मनाशः, अतस्तद्भुक्त्यै भगवांस्तनुकरणभुवननिष्पादं[1] करोति। तनुः शरीरं, सूक्ष्मस्थूलात्मना द्विप्रकारम्। करणं च द्विविधं बाह्यमान्तरं चेति। तत्र बाह्यं कर्मेन्द्रियज्ञानेन्द्रियात्मना दशविधम्। अन्तःकरणं त्रिविधं मनोऽहंकारो बुद्धिश्चेति। भुवनशब्देन चतुर्विंशत्यधिकशतद्वयलोका उच्यन्ते। तान्येतानि भगवान् महेश्वरः करोति भोगार्थमिति। ननु कस्मान्महेश्वरस्तानि[2] भुवनानि कृतवानित्युच्यते। भवतु तेषां सर्वेश्वरेण विनोत्पाद इत्यत आह — कर्त्रा विना न कार्यं न तथोपादानकरणाभ्यामिति। यतः कर्तुरभावे न कार्यसंभवोऽतो महेश्वरस्तनुकरणभुवनानि कृतवानित्युच्यते। तथा तद्वदुपादानकारणाभावे च न कार्यं जायेत। अतस्तत्रोपादानकारणमपि किञ्चिदाश्रयणीयम्। एवं करणाभावे न कार्यसंभव इति करणं चात्र किञ्चिदभ्यु-

१. 'का' क. पाठः. २. 'नि कृ' क. ग. पाठः.

पेयमिति। तथाहि—घटाद्युत्पत्तौ तावत् कुलालादिः कर्ता, हस्तपादादिकं करणं, मृदाद्युपादानं, चक्राद्युपकरणमिति दृष्टं, तेषामेकस्याप्यभावे कार्यस्य घटादेरुत्पादासंभवात्। अतोऽत्रापि तान्यवश्याश्रयणीयानि। अन्यथा जगदात्मकस्य कार्यस्योत्पादासंभवादिति। ननु किं जगत्कर्तृसद्भावे प्रमाणम्। अनुमानागमावस्मदादीनाम्। अस्मद्विलक्षणानां योगिनां प्रत्यक्षमपीति ब्रूमः। तथाहि—विमतं कालाद्यवनिपर्यन्तं कार्यजातं बुद्धिमत्कारणकं, कार्यत्वाद्, यद्यत् कार्यं तत्तद् बुद्धिमत्कारणकं दृष्टं, यथा घटः, तथेदं कालाद्यवनिपर्यन्तं कार्यं, तस्माद् बुद्धिमत्कारणकमिति। न च क्षित्यादीनां कार्यत्वस्यानुपलम्भादनिश्चितपक्षवृत्तिरसिद्ध इत्यसिद्धत्वं हेतोरिति वाच्यम्। अनुमानागमाभ्यां तत्कार्यत्वसिद्धेः। तथाहि—क्षित्यादि कार्यं, मूलोपादानव्यतिरिक्तजडत्वाद्, यद्यन्मूलोपादानव्यतिरिक्तं जडं तत्तत् कार्यं, यथा घटः, तथेदं, तस्मात् तथेति। न च क्षित्यादेरेव परमाणुभावापन्नस्य मूलोपादानत्वाभ्युपगमादसिद्धमस्माकं मूलोपादनातिरेकित्वविशेषणमिति वाच्यम्। परमाणोर्मूलत्वप्रतिषेधस्य वक्ष्यमाणत्वात्। तथा क्षित्यादि कार्यं, परतन्त्रत्वात्, त्रिगुणात्मकत्वात्, आत्ममूलान्यवस्तुत्वाच्च, घटादिवदिति। तथा "आत्मन आकाशः संभूतः, आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी"त्यादिनागमेन क्षित्यादेः कार्यत्वमवगम्यते। तथा आत्मव्यतिरिक्तस्य सर्वस्य मायामूलत्वप्रतिपादनाच्च। तथाहीश्वरगीतायां—

“चतुर्विंशतितत्त्वानि मायाकर्मगुणा इति ।
एते पाशाः पशुपतेः क्लेशाश्च पशुबन्धनाः ॥
एतेषामेव पाशानां माया कारणमुच्यते ।”

इति न स्वरूपासिद्धं क्षित्यादिषु कार्यत्वमिति । ननु विमतं जगद् सद् भासमानत्वात्, शुक्तिरजतवदित्यनुमानेन क्षित्यादेरसिद्धत्वनिश्चयात्, शशशृङ्गं तीक्ष्णं शृङ्गत्वात्, गोशृङ्गवदिति वास्याश्रयासिद्धतेति चेद् । नैवम् । भ्रान्तिज्ञानस्य शुक्तिविषयतया तदन्यासद्रूपरजतगोचरत्वानुपपत्तेः, असद्रजतासंभवेनास्य धर्म्यसिद्धदृष्टान्ततयाप्रमाणत्वात् । कार्यत्वहेतोरिवास्याप्याश्रयासिद्धत्वसाम्याच्च । प्रत्यक्षतः क्षित्यादेः सत्त्वावगमेन प्रत्यक्षविरोधाच्चास्याप्रमाणत्वमिति । न च नियतिकालाव्यक्तगुणाहंकारादेरसिद्धत्वादाश्रयैकदेशासिद्धिरिति वाच्यम् । तेषामागमादिसिद्धत्वस्योक्तत्वात् । न च कालाकाशादेर्नित्यत्वेन कार्यत्वस्याभावाद् भागासिद्धो हेतुरिति वाच्यम् । तत्कार्यत्वस्यानुमानागमाभ्यां साधितत्वात् । नन्विदमनुमानं सिद्धसाध्यतालक्षणासिद्धत्वसद्भावादप्रमाणम् । तथाहि — बुद्धिमत्कारणवत्त्वं क्षित्यादेर्भवता साधितम् । तदस्माकमपि सिद्धम् । बुद्धिमतामस्मदादीनामप्यदृष्टद्वारेण कालादितत्त्वकलापं प्रति कर्तृत्वस्य सद्भावात् । न च पुण्यापुण्यात्मके कार्यान्तरे यत् कर्तृत्वं न तदेव जगदात्मके कर्तृत्वं भविष्यतीति वाच्यम् । कारणकारणतया तदुपपत्तेः । यथा (घ[1]प)टकारणतन्तुसंयोगमात्रकर्तुः कुविन्दस्य पटकर्तृ-

१. ‘घ’ क. पाठः.

त्वं, शरादिक्षेप्तुर्वा शत्रुहिंसाकर्तृत्वम्, एवं जगत्कारणकर्मकर्तुरेवास्मदादेर्जगत्कर्तृत्वोपपत्तेः सिद्धसाध्यताप्रसङ्ग इति । नैवम्। उपादानोपकरणसंप्रदानप्रयोजनविषयप्रत्यक्षबुद्धिमत्कारणवत्त्वस्य बुद्धिमत्कारणत्वशब्देन विवक्षितत्वात् । अतोऽस्मदादीनां तच्चतुष्टयविषयापरोक्षज्ञानाभावान्न सिद्धसाध्यतेति। नन्वप्यंशे सिद्धसाध्यताप्रसङ्गः, त्र्यणुकादिजन्यकार्याणाम् उपादानं त्र्यणुकादिकं, भूतादिजन्यकार्याणामुपादानं भूतादिकं वास्मदादिप्रत्यक्षम् । अदृष्टद्वारेण कर्तृत्वं चास्मदादीनां सिद्धम् । उपकरणं च कालादि किञ्चित् प्रत्यक्षम् । संप्रदानभूताश्च देवदत्तादयः प्रत्यक्षसिद्धाः । प्रयोजनं च स्थानासनादिकं प्रत्यक्षमिति भवेदेवांशे सिद्धसाध्यतेति । नैवम् । विमतस्यैव क्षित्यादेस्तथाविधकर्तृमत्तासाधनाद् यत्र द्व्यणुकत्र्यणुकादीनामुपादानादि कालादीनां वा न प्रत्यक्षं, तत्र तथाविधकर्तृमत्तासाधनान्नोक्तदोषावकाश इति । ननु च शक्यक्रियत्वमुपाधिः, तस्योपाधिलक्षणसद्भावात् । तथाहि — साधनाव्यापकः साध्यसमव्याप्तिरुपाधिरिति तस्य लक्षणम् । तदस्य घटादिषु सर्वेष्वनुगतत्वाद् मूलहेतुना कार्यत्वेनासाध्यत्वाच्चास्तीति सोपाधित्वेनाप्रयोजकत्वात् कार्यत्वस्य व्याप्यत्वासिद्धिरिति । नैवम् । शक्यक्रियत्वस्योपाधिलक्षणाभावेनास्य सोपाधित्वाभावात् । स च साधनव्यापकत्वात् । तथाहि — क्षित्यादि कस्यचित् शक्यक्रियं कार्यत्वाद् घटादिवदिति मूलसाधनेन साधयितुं शक्यत्वात् साधनव्यापकत्वमिति । न च क्षित्यादि कस्यचिच्छक्यक्रियं कार्यत्वाद्

घटादिवदित्यस्यापि कर्तृमत्त्वाद्युपाधिवशादप्रयोजकत्वमिति वाच्यम् । शक्यक्रियत्वकर्तृमत्त्वादि यद्यदुपाधितया भवता प्रतिपाद्यते, तस्य सर्वस्याप्येकेनैव प्रयोगेण साध्यतया साधनव्यापकत्वेनोपाधित्वासंभवात् । तथा सर्वानुमानेषु समानत्वाच्च । तथाहि — पर्वतोऽग्निमान् धूमवत्त्वाद् महानसादिवदित्यत्रापि जायमानभस्मवत्त्वस्योपाधेः सद्भावाद् धूमानुमानस्याप्यप्रयोजकत्वप्रसङ्गः । अथ तत्र धूमवत्त्वेनैव जायमानभस्मवत्त्वस्यापि साध्यतया नोपाधित्वमित्यस्य नाप्रयोजकत्वमिति चेत् । नैवम् । तत्राप्यग्निमत्त्वस्यैवोपाधेः सद्भावेन तत्साधनासंभवात् । अथ धूमवत्त्वादेव जायमानभस्मवत्त्वाग्निमत्त्वादिसर्वोपाधेः साध्यतया साधनव्यापकत्वसद्भावेनानुपाधित्वान्नात्र तद्दोष इति चेत् । तर्हि कार्यत्वेनैवात्रापि सर्वस्य शङ्कितस्योपाधेः साध्यतया सोपाधित्वासंभवान्नोक्तदोषावकाश इति । किञ्च शक्या क्रिया चलनलक्षणा यस्य तच्छक्यक्रियं, तस्य भावः शक्यक्रियत्वमिति यद्यभ्युपगमः, तदा परमाणुमनसोरपि नित्ययोर्भवत्पक्षे शक्यक्रियत्वसद्भावात् साध्यसमव्याप्त्यभावेन तस्योपाधित्वाभावः । यदि शक्या क्रिया उत्पत्तिलक्षणा यस्य तच्छक्यक्रियं तस्य भावः शक्यक्रियत्वमित्यभ्युपगमः, तदाधिकविशेषणत्वापरनामकं व्यर्थविशेषणत्वं प्रसज्यते । उत्पत्तेरेव कर्तृमत्त्वप्रयोजकत्वेन शक्यपदवैयर्थ्यात् । न चाङ्कुरादेरप्युत्पत्तिसद्भावे कर्तृशून्यतया तद्व्यवच्छेदार्थं शक्यपदोपादानमिति वाच्यम् । तेषां च शक्योत्पादनतया व्यवच्छेदासंभवात् । तथेतरेतराश्रयप्र-

सद्भावाच्च क्षित्यादेः, कर्तृशून्यत्वे सिद्धे तद्व्यवच्छेदकशक्य-विशेषणसार्थतो, विशेषणोपाधिसद्भावेन कार्यत्वस्याप्रयोजकत्वे सिद्धे कर्तृशून्यतासिद्धिरिति। तदुक्तं—

"निश्चिते तदकर्तृत्वे सोपाधित्वं भवेदिह।
सोपाधित्वेऽनुमानस्य कर्तृभावाविनिश्चयः॥"

इति। न च करचरणादिनोदनीयत्वमुपाधिः। प्रासादप्राकारादौ तदभावात्। प्राणादौ तदसद्भावेन च साध्यसमव्याप्त्यभावात्। तथा क्षित्यादि कस्याचित् करचरणादिनोदनीयं, कार्यत्वाद्, घटादिवदिति साधनव्यापकत्वाच्चास्य नोपाधित्वमिति। न च करादिजन्यत्वमुपाधिः। अधिकविशेषणत्वात्। न च क्षित्यादेर्व्यवच्छेद्यत्वम् अन्योन्याश्रयप्रसङ्गादित्युक्तमिति, सर्पाद्याकर्षणस्वदेहप्रेरणादौ सकर्तृके करजन्यत्वाभावेन साध्यसमव्याप्त्यभावाच्चेति। न च कार्यविशेषस्य कर्त्रा व्याप्तिरिति वाच्यम्। विशेषस्यानुपलम्भात्। ननु किञ्चित् कार्यमुपलभमानस्य सकर्तृकत्वबुद्धिर्भवति, किञ्चिदुपलभमानस्य न भवतीत्येतदन्यथानुपपत्त्या कार्यविशेषोऽभ्युपगन्तव्यः। स च विशेषो घटादिषु सकर्तृकेष्वनुस्यूतस्तृणादिभ्यो ह्यकर्तृकेभ्यो व्यावृत्तः सन्नेव रसविशेषवदनिर्देश्यः। तदुक्तं—

"सकर्तृकेष्वनुस्यूतो व्यावृत्तोऽन्येभ्य एव सः।
किञ्चित्कार्यविशेषोऽन्यैः स्वीकार्यो मतिभेदतः॥

---

१. 'ता। सवि' ख. पाठः.

किंरूप इति वादोऽयमिक्षुक्षीरगुडादिषु ।
माधुर्यभेदप्रत्यक्षदृष्टान्तादुपशाम्यति ॥"

इति । तस्मात् स एव कर्त्रा व्याप्यते, न कार्यसामान्यमिति । नैवम् । गर्तोन्नयनादिकार्ये सकर्तृके तादृशबुद्ध्यभावेनानेकान्तात् । तदुक्तं —

"गर्तोन्नयनकार्यस्य चिरकालात्यये सति ।
सकर्तृकत्वधीगम्यभावो नैवोपलभ्यते ॥"

इति । प्रसिद्धानुमानेऽपि समानोऽयं पर्यनुयोगः । तथाहि — पर्वतादौ धूमदर्शिनोऽपि कस्यचिदग्निमत्त्वं नावगम्यते, असंभावनादिना प्रतिबन्धात् । अत एव हि पर्वतोऽग्निमान् धूमवत्त्वादित्यादिपरोपदेशसापेक्षपरार्थानुमानोपन्यासः । तेन तत्रापि विशेषकल्पनया तस्यैवाग्निना व्यापकत्वादप्रयोजकं धूमानुमानमापद्यत इति । अथ तत्र धूमवानग्निमानिति सामान्यव्याप्तिग्रहणबलादनुमानं प्रवर्तत इति चेद्, अत्रापि तर्हि कार्यं कर्तृपूर्वकमिति सामान्यव्याप्तिग्रहणबलादनुमानप्रवृत्तिराश्रयणीया विशेषाभावादिति । न च घटत्वं कर्तृमत्त्वे प्रयोजकम् । पटस्य तदभावेन कर्तृमत्त्वाभावप्रसङ्गात् । नापि पटत्वं, घटादेस्तदभावेनाकर्तृमत्त्वप्रसङ्गात् । न च घटत्वपटत्वकुड्यत्वादयः सर्व एव कर्तृप्रयोजका इति वाच्यम् । प्रयोजकबहुत्वापातात् । न च तद् युक्तं, व्यक्तीनामेव कर्तृप्रयोजकत्वप्रसङ्गेन घटान्तरस्याकर्तृमत्त्वप्रसङ्गात् । आनन्त्येन कर्त्रा सह व्याप्तिग्रहणासंभवस्योभयत्रापि तुल्यत्वात् । तथा महानसत्वशालात्वादेः प्रयोजकत्वापातेन धूमवत्त्व-

स्याप्रयोजकत्वप्रसङ्गः । तदुक्तं —

"घटादिव्यक्तिमात्राणां कर्त्रा व्याप्तिर्न गृह्यते ।
यथानन्त्यं तथा जातेर्घटत्वादेः[1] प्रतीयताम् ॥"

इति । ननु तर्हि प्रमेयत्वादेरेवाधिकव्याप्त्या कर्त्रा व्याप्तिराश्रयणीया, न कार्यत्वस्येति चेत् । न । अन्यथासिद्धत्वात् । स्वगोचरज्ञानमात्रेण प्रमेयत्वं सत्त्वं च कर्त्रभावेऽपि पदार्थानामभ्युपगतं भवता । अस्मत्पक्षेऽपि मायापुरुषशिवानां कर्तृहीनानामपि प्रमेयत्वं सत्त्वं चाभ्युपगतम् । अतः प्रमेयत्वादेः कर्तृव्याप्त्यसंभव इति । कार्यत्वं तु कारणविशेषस्य कर्तुः कारणान्तरसम्पादकतया प्रधानभूतस्याभावे न संभवति । न हि मृद्दण्डचक्रादिसद्भावेऽपि तत्प्रयोक्तुः कुलालस्याभावे घटोत्पादो घटते । कुलालसद्भावे तु कारणान्तरनिष्पत्त्या कार्यजन्मोपपत्तिरिति कार्यत्वात् कर्तृसद्भावसिद्धिरिति । किञ्च कार्यत्वं हि पदार्थानामुत्पत्तिः । सा च कारणक्रियामपेक्षते । सा च पुरुषव्यापारं विना न भवति । स तु प्रयत्नादृते न स्यात् । स चेच्छां विना न भवति । इच्छा चेष्टसाधनज्ञानं विना न स्यादितिकार्यत्वं बुद्धिमत्कारणाभावे न भवतीति तत्प्रयोजकत्वान्नास्यासिद्धत्वमिति । नापि विरुद्धोऽयं हेतुः । पक्षविपक्षयोरेव वर्तमानो विरुद्ध इत्युक्तविरुद्धलक्षणाभावात् । तथाहि — सपक्षे घटादौ कार्यत्वस्य वर्तमानत्वाद् विपक्षे चाकर्तृके मूलकारणशिवादौ कार्यत्वस्याभावादस्य पक्षविपक्षयोरेव वर्तमानत्वासंभवाद् विरुद्धत्वाभाव इति । ननु सर्वज्ञकर्तृकत्वं क्षि-

---

१. 'तेः पट' क. पाठः.

त्यादेः साध्यते, नान्यकर्तृकत्वम् । असर्वज्ञस्य प्रपञ्चकर्तृत्वासंभवात् । तथाहि — जगदुपादानादिचतुष्टयविनियोगक्रमविषयप्रत्यक्षज्ञानवत एव कर्तृत्वं साध्यते । ततस्तस्य सर्वज्ञत्वम् । सर्वज्ञनिर्मितस्य चान्यस्य संप्रतिपन्नस्याभावात् सपक्षाभाव इति सपक्षे सत्त्वाभावः । तेन कार्यत्वस्य क्षित्यादिकालान्ते पक्षे वर्तमानस्य सर्वज्ञनिर्मितत्वसाध्यरहिततया विपक्षभूतघटादौ च वर्तमानतया पक्षविपक्षयोरेव वर्तमानत्वाद् विरुद्धत्वमिति । तथा शरीरिकर्तृत्वस्याप्यङ्कुरादावसत्त्वेनाशरीरिकर्तृकत्वमपीह साध्यते । तत्र च सपक्षाभावेन सपक्षे सत्त्वाभावात् कार्यत्वस्य पक्षविपक्षयोरेव वर्तमानत्वाद् विरुद्धत्वमिति । नैवम् । सर्वज्ञाशरीरिकर्तृकत्वस्यात्रासाध्यत्वात् । तथाहि — विप्रतिपत्त्यनुरूपेणात्र साध्यनिर्देशाद् यदा किं सकर्तृकं क्षित्यादि अकर्तृकं वेति विप्रतिपत्तिः, तदा सकर्तृकं क्षित्यादीति साध्यनिर्देशः । यदा बुद्धिमत्पूर्वकं वा नवेति, तदा बुद्धिमत्पूर्वकं क्षित्यादीति साध्यनिर्देशः । यदा सोपादानोपकरणादिप्रत्यक्षवता जन्यं वा नवेति, तदा उपादानादिप्रत्यक्षवता जन्यमिति साध्यनिर्देशान्न विरुद्धत्वं, घटादौ सपक्षे साध्यसाधनयोः सद्भावात् । न च कदाचिदपि सर्वज्ञाशरीरिकर्तृकं क्षित्यादीति साध्यनिर्देशः, तथा विप्रतिपत्त्यभावात् । स चासर्वज्ञशरीरिकर्तृकत्वस्य क्षित्यादीनां भवद्भिरनाश्रितत्वादिति । ननु तथा साध्यनिर्देशेऽपि तथाविधकर्तुरभिप्रेततया कार्यत्वस्य विरुद्धत्वमिति चेद् । न । सर्वानुमानेषु समानत्वात् । तथाहि — पर्वतस्याग्निमत्त्वं यः साधयति, तस्याप्यतद्देशकालानुमेयसंप्रतिपन्नप्रत्यक्षाग्निनाग्निमत्त्वं

नाभिप्रेतम् । किन्तु महानसादिगतवह्निव्यतिरिक्तपर्वतगततत्कालानुमेयविप्रतिपन्नाप्रत्यक्षापुरुषपूर्वकतरुसंघट्टजन्याग्निनाग्निमत्त्वमभिप्रेतम् । तस्य महानसादावभावाद् धूमानुमानमपि विरुद्धमापद्येत । अथ तथापि तत्साध्यस्य शब्देनानुपादानात् पर्वतस्य स्वगताग्निनाग्निमत्त्वस्य साधनाच्चे[२] न विरोध इति चेत् । तर्हि प्रकृतेऽपि सर्वज्ञाशरीरिकर्तृकत्वस्य शब्देनानुपादानात् क्षित्यादेः स्वोपादानसमर्थ[३]कर्तृमत्त्वस्य साधनाच्च नोक्तदोषावकाश इति । न चौसर्वज्ञशरीरिव्याप्तत्वात् कार्यत्वमपि शरीरिसर्वज्ञविशेषं प्रतिक्षिपतीति वाच्यम् । कार्यत्वस्य शरीरिकर्तृव्याप्त्यभावात् । स च तृणादौ तथाविधकर्तुरभावेऽपि कार्यत्वोपलम्भादवगम्यते । तदुक्तं —

"परोऽपि न शरीरस्य व्याप्तिमिच्छति वस्तुतः ।
प्रत्यक्षबाधया देही नाश्रितो यदिहाङ्कुरे ॥"

इति । न च शरीरिकर्तुरभावे कर्तृमात्रस्यासत्त्वं, तस्यायोग्यत्वात् । तदुक्तं[५] —

"न चाशरीरिकर्तृत्वं बाध्यं देहे तु बाधिते ।
शरीरस्यैव योग्यत्वं यतो नास्ति[६] परात्मनः ॥"

इति । ननु न कार्यत्वं स्वव्यापकशरीरिकर्तृविरुद्धत्वान्नाशरी[७]रिकर्तृनिषेधकं, किन्तु स्वव्यापककर्तृसामान्यविरुद्धत्वादिति ब्रूमः । यत्र कुलालादौ कर्तृत्वं, तत्र नाशरीरित्वम् । यत्र मुक्तात्मन्यशरीरित्वं, तत्र न कर्तृत्वमिति कर्तृत्वाशरीरित्वयोः

१. 'लाननु', २. 'च वि', ३. 'र्थे' ख. पाठः. ४. 'च' क. पाठः, ५. 'र' कु, ६. 'र', ७. 'र' ग. पाठः.

सहानवस्थानलक्षणविरोधसद्भावेन स्वव्यापककर्तृविरुद्धत्वाद् अशरीरिकर्तारं[1] कार्यत्वमेव प्रतिक्षिपति। धूमवत्त्वमिवाशीत-भास्वराग्निव्याप्तं शीतान्धकाराग्निमिति चेत्। नैवम्। कार्य-त्वस्य कर्तृसामान्येन व्याप्त्यभावे प्रतिक्षेपायोगात्। तथा च यदि कार्यत्वस्य कर्तृसामान्येन व्याप्तिः, तर्हि न कार्य-त्वव्यापकः कर्ता[2]। तेन तद्विरुद्धत्वेऽप्यशरीरित्वं न प्रतिक्षि-पेत्। स्वाव्यापकाविरुद्धत्वात् तस्य। यदि कार्यत्वं कर्तृसा-मान्येन व्याप्तं, तदा च न प्रतिक्षेपः, कर्तृसामान्यापर्यवसा-नलभ्यत्वाद् विशेषस्य। यथा पर्वते परिदृश्यमानधूमेनाग्नि-सामान्यमनुमाय तदपर्यवसानान्महानसादावपरिदृष्टोऽग्निवि-शेषः पर्वते कल्प्यते, तथैव प्रपञ्चे परिदृश्यमानं कार्यत्वं क-र्तारं विनानुपपद्यमानं कर्तृसामान्यमवस्थापयत् तस्यापि विशे-षणद्वारेण सम्बन्धासिद्ध्यर्थं शरीरि[3]विशेषणमसंभवात् परिहृत्य तद्विपरीतं सर्वज्ञमशरीरिविशेषं व्यवस्थापयत्येव। अन्यथा स्वव्यापककर्तृसामान्यव्यवस्थापनासंभवात्। न च तद्युक्तं, व्याप्यसद्भावे व्यापकासत्त्वस्यानुपपन्नत्वात्। नहि धूमस-द्भावेऽग्न्यभाव उपपद्यत इति। न चाव्याप्तत्वेऽपि व्याप्त्यु-पलम्भमात्रेण प्रतिक्षेप इति वाच्यम्। तस्याप्रमाणत्वात्। नहि कृतकत्वं नित्यताव्याप्तमिति केनचिदुक्ताप्रमाणवाक्य-सिद्धव्याप्त्यपेक्षया कृतकत्वेन तद्विरुद्धानित्यत्वप्रतिक्षेपो घट-त इति। न च कर्तृत्वमदेहित्व[4]प्रतिक्षेपकं, कार्यत्वेन साधि-

---

१. 'र' क. ग. पाठः. २. 'र' ग. पाठः. ३. ख. ग. पाठः.
४. 'त्वमदेहित्वप्र' ख. पाठः.

तस्य कर्तृत्वस्याशरीरिविशेषाभावेऽनुपपन्नतया तस्याक्षेप्यत्वात्। न च शरीरिविशेषाक्षेपेणाशरीरिविशेषप्रतिक्षेपः। तस्य योग्यानुपलम्भनिरस्ततयाक्षेपासंभवात्। न च साधितस्य कर्तृत्वस्य विशेषद्वयराहित्यं संभवतीत्यशरीरिकर्त्र[2]भ्युपगम इति। नाप्यङ्कुरादावसाधितस्यादेहित्वप्रतिक्षेपकत्वम्, अविरोधादिति। तथा मोक्षावस्थायां शरीरेन्द्रियाद्यभावेऽप्यात्मगुणनित्यसुखविषयबुद्धिसन्ततिसंभवं भगवान् भट्टपादो मन्यते। तेनादेहित्व[3]बुद्धिमत्कारणत्वयोर्न विरोधः। पूर्वबुद्धिविशिष्टस्यात्मनः उत्तरबुद्ध्युत्पत्तिहेतुत्वाभ्युपगमादिति। किञ्च यदि जगत्कर्त्रनुमानस्यैवं विरोधोद्भावनं, तदा परमाण्वनुमानस्यापि भवताभ्युपगतस्य विरोधप्रसङ्गः। तथाहि — आद्यं कार्यं स्वन्यूनानेकसमवायिकारणं, कार्यद्रव्यत्वाद् घटादिवदिति परमाण्वनुमानम्। तेनाद्यकार्यकारणतया परमाणूना नित्यत्वनिरवयवत्वकार्यत्वनिरतिशयाणुत्वादिकमर्थादवगम्यते। तत्राप्ययं दोषः सुव्यक्तः। यत्र भवत्पक्षे व्योमादौ नित्यत्वं, तत्रासर्वगतद्रव्यपरिमाणलक्षणमूर्तत्वं नास्ति। यत्र पुनर्घटादौ मूर्तत्वं, न तत्र नित्यत्वमिति मूर्तत्वनित्यत्वयोः सहानवस्थानलक्षणविरोधसद्भावात् परमाण्वनुमानमपि विरुद्धमापद्यते इति, तथा परात्मानुमानमपीति। तथाहि—परशरीरचेष्टा आत्मपूर्विका जीवच्छरीरचेष्टात्वाद् अस्मच्छरीरचेष्टावदिति परात्मानुमानम्। तत्रापि यत्रात्मत्वं स्वात्मनि तत्र न

---

१. 'तु' ख. पाठः. २. 'र' ख. ग. पाठः. ३. 'त्वबुद्धिबु' ख. पाठः.

परत्वं, यत्र परत्वं घटादौ तत्र नात्मत्वमिति परत्वात्मत्वयोर्विरोधात् परात्मानुमानासंभव इति। अथ यदि द्रव्यसमवायिकारणस्य मूर्तस्य नित्यत्वमन्यत्र न दृष्टं, तथाप्याद्यकार्यकारणतया नित्यत्वं तस्याभ्युपेयम्। अन्यथानवस्थाप्रसङ्गात्। तस्य च नित्यत्वमर्थादवगम्यते। आद्यकार्यस्य स्वन्यूनसमवायिकारणकत्वमात्रसाधनान्नात्र विरोधः। तथा परात्मानुमाने (ति ?)[२] परशरीरगतायाश्चेष्टाया आत्मपूर्वकत्वमात्रसाधनात् स्वव्यापारस्य तत्र योग्यानुपलम्भनिरस्तत्वात् परत्वमर्थादवगम्यते न शब्दत इति न विरोध इति चेत्। एवं तर्हि जगत्कर्त्रनुमानेऽपि सकलविनाशे सत्याद्यकार्यकारणस्य बुद्धिमन्मात्रस्य साधने तस्यानित्यतायां कर्त्रन्तरकारणा[३]न्तरकल्पनयानवस्थानप्रसङ्गेन तस्य नित्यत्वमर्थादवगम्यते न शब्दत इति। तथा कर्तृमात्रसाधने शरीरिणो योग्यानुपलम्भानिरस्तत्वेनाशरीरिणोऽर्थादवगम्यमानतया च न विरोध इति समानः पन्थाः। ननु पक्षधर्मताव्याप्तिग्राहकप्रमाणाभ्यां प्राप्तयोर्विशेषयोर्विरोधे न कश्चिदर्थः सिध्यति। तथाहि—व्याप्तिबलाच्छरीर्यसर्वज्ञानीश्वरसंसारी कर्ता[४]वगम्यते। पक्षधर्मतया च कार्यस्य तदुत्पादनसमर्थः सर्वज्ञोऽशरीरी नित्यो नित्यमुक्तः सर्वेश्वरः कर्तावगम्यते। तदनयोरितरेतरसापेक्षयोर्विरोधे न किञ्चित् सिध्येत्। नैवम्। सर्वानुमानेषु समानत्वात्। तथाहि—धूमानुमाने तावद् दृष्टान्तभूमिगतप्रत्यक्षाननुमेयसंप्र-

---

१. 'पा', २. 'ति तथा प' क. पाठः. ३. 'का' ख. ग. पाठः. ४. 'र्त्री' क, ग. पाठः.

तिपन्नापर्वतगताचन्दनेन्धनपुरुषजन्यत्वादिधर्मविशिष्टो वह्नि-
विशेषो व्याप्तिग्राहकप्रमाणेनावगम्यते । पक्षधर्मतया तु पर्वत-
गतानुमेयविमततरुसंघट्टजन्याप्रत्यक्षचन्दनेन्धनत्वादिधर्मवि-
शिष्टोऽवगम्यते । तत्रापि न किञ्चित् सिध्येदिति । अथ धूमवा-
नग्निमानिति सामान्येन व्याप्तिग्रहणं न विशेषत इत्यत्रानु-
मानप्रवृत्तिराश्रीयत इति चेत् । तर्हि प्रकृतेऽपि कार्यं बुद्धिम-
त्कारणकमिति सामान्येनैव व्याप्तिग्रहणं न विशेषतः, अङ्कु-
रादौ तथाविधकर्तृदर्शनादिति भवत्येवानुमानप्रवृत्तिरविशेषा-
दिति । ननु किं तर्हि दृष्टान्तदृष्टमाश्रयणीयं दार्ष्टा[1]न्तिके इति
चेद्, अविरुद्धमिति ब्रूमः । न च शरीरकरणनिवृत्त्या कर्तृ-
त्वनिवृत्तिरिति वाच्यम् । स्वशरीरप्रेरणाकर्षणादिष्विवेच्छा-
त्मकक[2]रणान्तरसद्भावादपि कर्तृत्वोपपत्तेः । न च स्वशरीरप्रे-
रणे प्रेर्यस्य शरीरस्य करणत्वं संभवति । कर्मणः करणत्वा-
संभवात् । नह्यङ्गुल्यग्रेण तदग्रस्पर्शनमुपपद्यत इति । न च
तत्र शरीरान्तरं करणमिति वाच्यम् । अनवस्थाप्रसङ्गात् । न
च पक्षे देह[3]संबन्धः सर्वत्राव्यभिचारेण करणमिति वाच्यम् ।
देहसंबन्धस्य हस्ताङ्गुल्यादिप्रेरणे कर्त्रानपेक्षितत्वात् । तथा-
हि—हस्तस्योत्क्षेपणमवक्षेपणं वा कुर्वन्नात्मा तत्सम्बन्धमेवा-
पेक्षते, न तु पुनर्देहसंबन्धम् । तस्मिन् विद्यमाने हस्तसंबन्धवि-
नाशे काष्ठीभूतेऽस्मिन् हस्तक्रियाकर्तृत्वादर्शनात् । अतः केवल-
व्यतिरेकात् साक्षादिच्छानुविधायिक्रियाश्रयत्वयोग्यत्वमेवात्र

---

१. 'न्त' क. ख. पाठः. २. 'का' ख. पाठः. ३. 'हवद्धन्धः' ग. पाठः,

प्रयोजकम्। तत् प्रपञ्चे भगवतोऽनुमानसिद्धम्। तथाहि—विमतं मूलकारणादि कस्याचित् साक्षादिच्छानुविधायिक्रियाश्रयत्वयोग्यम् अचेतनत्वाद् देहवदिति। अत एवाशरीरित्वेऽपि[1] पुराणोक्ताष्टमूर्तित्वविरोधः परिहृतः। साक्षादिच्छानुविधायिक्रियाश्रयतादेहलक्षणसद्भावेन मूलाद्यवन्यन्ततत्त्वजातस्य महेश्वरदेहतया मूर्तिमत्त्वोपपत्तेः। ननु कथं तर्ह्यदेहित्ववचनम्। उच्यते। यथोपादानभूतमृत्तत्त्वाद्यतिरिक्तं शरीरं कुलालकुविन्दादेरुपलब्धं, तथा मूलकारणतत्कार्या[2]द्यतिरिक्तमत्र शरीरं नास्ति भगवत इत्यदेहित्वोपपत्तिरिति। नाप्यनैकान्तिकत्वं, पक्षत्रयवृत्तिरनैकान्तिक इत्युक्तलक्षणाभावात्। तथाहि—यदि कालाद्यवन्यन्तेषु विमत्यधिकरणतया सन्दिग्धसाध्येषु पक्षेषु घटादिषु च निश्चितसाध्यतया सपक्षभूतेषु कार्यत्वस्य वृत्तिः तथापि निश्चितसाध्यव्यतिरेकतया विपक्षभूतेषु मायापुरुषशिवेषु कार्यत्वहेतोर्वृत्त्यभावात् पक्षत्रयवृत्त्यभाव इति। नन्वङ्कुरादिषु कर्तृशून्येषु कार्यत्वस्योपलम्भात् पक्षत्रयवृत्तित्वेन कार्यत्वस्यानेकान्तत्वमिति चेद्। न। अङ्कुरादेः पक्षत्वेन विपक्षत्वाभावात्। ननु नाङ्कुरादेः पक्षत्वं, सन्दिग्धकर्तृकत्वाभावात्। तथाहि—सन्दिग्धसाध्यः पक्ष इति हि पक्षलक्षणम्। तदङ्कुरादेर्नास्ति। निश्चितसाध्यव्यतिरेकतया विपक्षत्वादिति चेद्। नैवम्। परस्य बुद्धिमतः साध्यस्य प्रत्यक्षानर्हत्वेनासत्त्वानिश्चयादङ्कुरादेः

१. 'र' ख. ग. पाठः. २. 'र्यव्यति' ग. पाठः.

सन्दिग्धसाध्यत्वोपपत्तेरिति । न च सन्दिग्धानैकान्तिकत्वं कार्यत्वस्याशङ्कनीयम् । विपर्यये बाधकतर्कस्योक्तत्वात् । तदुक्तं —

"कारकाणां च सर्वेषां नियोक्तुर्यदि नास्तिता ।
वैयर्थ्यं स्यात् तदा तेषां सतामप्यसतामिव ॥"

इति । नाप्यनध्यवसितत्वं, साध्यासाधकपक्ष एव वर्तमानोऽनध्यवसित इति तल्लक्षणाभावात् । न हि नित्या भूः गन्धवत्त्वादितिवत् कार्यत्वस्य पक्ष एव वृत्तिः, सपक्षे घटादौ च वर्तमानत्वादिति । न चासौ कालात्ययापदिष्टः, प्रमाणैर्बा[2]धिते प्रतिज्ञातार्थे वर्तमानो हेतुः कालात्ययापदिष्ट इति प्रोक्ततल्लक्षणाभावात् । न चानुष्णोऽग्निः कृतकत्वाद् जलवदितिवदस्य प्रत्यक्षविरुद्धकालात्ययापदिष्टत्वं, परात्मनो बुद्धिमत्कारणस्य प्रत्यक्षानर्हत्वात् । प्रत्यक्षानर्हस्यापि तदनुपलम्भेनासत्त्वाभ्युपगमे सर्वानुमानोच्छेदप्रसङ्गः । तथा घटादावपि कर्ता कुलालः प्रत्यक्षतो नावगम्यते । शरीरस्य करणभूतस्यैव प्रत्यक्षत्वात् । न तु शरीरस्य कर्तृत्वमचेतनत्वात् कुठारवदिति कुलालादिशरीरस्य कर्तृत्वे निषिद्धे तदात्मनः कर्तृत्वं शरीरस्य च करणत्वमवशिष्यत इति न कचिदपि कर्तुः प्रत्यक्षार्हत्वमिति न तदनुपलम्भेनासत्त्वमिति केचित् । अन्ये तु शरीरत्वेऽपि कर्तुः सूक्ष्मत्वदूरस्थत्वादिनानुपलम्भसंभवात् कार्यदेशे तदनुपल[3]म्भो नासत्वादिति ब्रुवते । तदुक्तं —

१. 'नव' क. ग. पाठः. २. 'णा' ख. पाठः. ३. 'म्भे' क. पाठः.

"यतः कार्यस्य कर्त्रा तु विना भावो न विद्यते ।
अतो देशान्तरस्थोऽयमिच्छया कुरुते जगत् ॥"

इति । द्विविधमिह कार्यं कायिकव्यापारजन्यमिच्छामात्रजन्यं चेति । तत्र कायिकव्यापारजन्यं घटादि । तदेव शरीरसन्निधानमपेक्षते । इच्छामात्रजन्यं त्वाकर्षणादि[1] । न तच्छरीरसन्निधानमपेक्षते । योजनशतव्यवहितसर्पाद्याकर्षणस्य दूरस्थैः क्रियमाणत्वादिति । अपरे तत्र वर्तमानस्य शरीरस्यायोग्यत्वात् प्रत्यक्षेणानुपलम्भो नाभावादिति ब्रुवते । तदुक्तं—

"अथवा दृश्यमेवास्तु शरीरं चक्षुरादिवत् ।
श्रुतिस्मृतिभ्यां तत् सिद्धं शशशृङ्गो न तादृशः ॥"

इति । ननूक्तं शरीरस्यानित्यत्वे स्वयं निजशरीरस्य निर्माणमतिसाहसं, कर्त्रन्तरविनिष्पत्तावीश्वरानन्त्यमापतेदिति । सत्यम् । बीजाङ्कुरवद् देहस्यानादित्वेन न विरोध इति केचित् । तदुक्तं—

"पूर्वसिद्धेन देहेन शरीरान्तरकर्तृता ।
तच्च पूर्वेण देहेनेत्यनादित्वमिहाश्रितम् ॥"

इति । एकब्रह्माण्डतद्वर्तिसकलकार्यविनाशे ब्रह्माण्डान्तरसद्भावात् तत्र स्थित्वासौ कार्यं करोतीति न कश्चिद् दोषः । अण्डानां बहुत्वं श्रुतिस्मृतिसिद्धम् । "यथा खल्वलाबूलतायां विततानि फलानि, एवं महेश्वरशक्तौ ब्रह्माण्डसहस्राणी"ति श्रुतेः,

---

१. 'हि त' ख. पाठः.

ईदृशानां तथाण्डानां कोट्यो ज्ञेयाः सहस्रशः ।
तत्र तत्र चतुर्वक्त्रा ब्रह्माणो हरयो भवाः ॥"

इति स्मृतेश्च तदवगमः । अन्ये नित्यं माहेश्वरं शरीरम् अनादित्वात्, तच्चानादिसृष्ट्यादिकर्तुर्महेश्वरस्य देहानादित्वस्याभ्युपगमनीयत्वात् । तच्छरीरं मायेति चाहुः । अपरे शब्दब्रह्मतनुत्वं भगवतो मन्यन्त इति । अथ प्रत्यनुमानबाधितमिदमनुमानम । तथाहि — क्षित्याद्यसर्वज्ञकृतं कार्यत्वादित्यनुमानात् सर्वज्ञकर्तृकत्वानुमानस्य सप्रतिसाधनत्वमिति । तदसत् । विकल्पानुपपत्तेः । किं सर्वज्ञकर्तृनिषेधमात्रं विवक्षितं, किं वा किञ्चिज्ज्ञकर्तृमत्त्वं, किं वा कर्तृशून्यत्वम् । नाद्यः पक्षः । असर्वज्ञकर्त्रभ्युपगमप्रसङ्गाद् वामेनाक्ष्णा न पश्यतीति विशेषनिषेधवत् । विशेषनिषेधस्य शेषाभ्यनुज्ञाविषयत्वात् । अथ परस्य सर्वज्ञकर्तृकत्वमभिमतमिति तन्निषेधमात्रमत्र क्रियत इति चेन्नैवम् । कर्तृमात्रनिषेधादेव सर्वज्ञकर्तृनिषेधसिद्धेस्तदेव निषेध्यं न विशेष इति । तथा घटादीनामप्यदृष्टादिप्रेरणद्वारेण सर्वज्ञजगत्कर्तृपूर्वकत्वस्याभ्युपगमनीयत्वात् साध्यविकलदृष्टान्तता च भवेत् । न च तत्रान्यः कर्ता । कर्तृभेदे प्रमाणाभावात् । न च कार्यमहत्त्वात् कर्तृबहुत्वकल्पनं कार्यमिति वाच्यम् । इच्छामात्रजन्ये कार्ये बहुत्वस्यानुपयोगित्वात् । कायिकव्यापारजन्ये तु तदुपादानादिनोदनमुपायान्तरेण यत्रैकस्यैव न स्यात् तत्रैव बहुत्वकल्पना । अथवा सर्वेष्वपि कार्येष्वेकस्यैव कर्तृत्वान्न क्वचिदपि

---

१. 'न न' ख. पाठः.

बहुत्वकल्पना, एकाचार्यानुगमात्। बहुत्वेऽपीतरेषां वास्यादिवदकर्तृत्वाद्वा। आचार्यानेकतायां च ज्ञानाधिक्यवशादेकस्यैव कर्तृत्वं तत्साम्ये च कार्यभेदेन भागभेदेन वैककर्तृत्वोपपत्तिः। इतरथा तद्वैयर्थ्यापातादिति। तथा कार्यमहत्त्वस्य तु कर्तृमहत्त्वादप्युपपत्तेर्न बहुत्वकल्पनासंभवः। धर्मिकल्पानायां गौरवापातात्। तथा समाभिप्रायत्वे वैयर्थ्यं, विरुद्धाभिप्रायत्वे कार्यवैशसप्रसङ्ग इति न सर्वथा कर्तृबहुत्वकल्पनोपपत्तिरिति। तथा घटाद्यदृष्टव्यापारः क्षितिकर्तृविनिर्मितः अदृष्टव्यापारत्वात् क्षित्याद्यदृष्टव्यापारवदित्येककर्तृत्वे सिद्धे तस्य सर्वज्ञसर्वेश्वरत्वादिसिद्धिः। अथ किञ्चिज्ज्ञकर्तृमत्त्वं विवक्षितमिति चेन्न। अपसिद्धान्तताप्रसङ्गात्। नहि मीमांसकादयो जगतः कर्तृमात्रमभ्युपगच्छन्ति। अतो दूरनिरस्तं किञ्चिज्ज्ञकर्तृकत्वमिति। तथा किञ्चित्त्वस्य कार्योत्पादानुपयोगित्वाद् वैयर्थ्यं च। तथासर्वज्ञस्य सर्वकर्तृत्वासंभवाद् माता मे वन्ध्येतिवत् प्रतिज्ञाविरोधप्रसङ्गः। यदि किञ्चिज्ज्ञस्यापि कर्तृत्वं साध्येत, तदा सिद्धसाध्यता। क्षेत्रज्ञानामप्यदृष्टद्वारेण जगत्कारणत्वाभ्युपगमात्। न च जीवानामेव कर्तृत्वसाधनात् परमेश्वरस्याकर्तृत्वमिति वाच्यम्। उपादानाद्यभिज्ञकर्तुः पञ्चरूपवतानुमानेन साधितत्वात्। न च जीवानां कर्तृत्वं,(मे?हे)तुत्वमात्रस्य विवक्षितत्वात्। अथाकर्तृत्वं विवक्षितमिति चेन्नैवम्। घटादेः कर्तृमत्त्वेन साध्यविकलदृष्टान्तत्वात्। मूलकारणदृष्टान्तत्वे साधनविकलमुदाहरणं, तत्र हेतोरभावात्। सत्त्वप्रमेयत्वादिसाधनोपन्यासे

घटादिभिर्व्यभिचारः । घटादेश्च पक्षतायां प्रत्यक्षविरोध इति धूमानुमानेऽप्ययं दोषः समानः । पर्वतो धर्मी अपर्वतगताग्निनाग्निमानिति साध्यो धर्मः धूमवत्त्वान्महानसवदिति वक्तुं शक्यत्वादिति । ननु महेश्वरः क्षित्यादिकर्ता न भवति अशरीरत्वात् पुरुषत्वाद्वा मुक्तात्मत्वाद्वास्मदादिवच्चेत्यनुमानविरोध इति चेन्नैवम् । भवतां जगत्कर्तृत्वासिद्धेराश्रयासिद्धताप्रसङ्गात् । अथ भवत्पक्षे जगत्कर्तासिद्ध इति नाश्रयासिद्धिदोष इति चेन्नैवम् । परसिद्धे प्रमाणमूलत्वे तेनैव धर्मिग्राहकेण प्रमाणेन बाध्यमानत्वात् । (न च) विपरीतानुमानस्यानुत्थानात्तेनेन तस्य बाध इति वाच्यम् । तस्य तन्मूलतया तद्बाधकत्वासंभवात् । तथापि यदि बाधाभ्युपगमः, तदा महेश्वरस्याप्रसिद्धत्वादस्याश्रयासिद्धताप्रसङ्गः । अथ न प्रमाणमूला परप्रसिद्धिरिति चेन्न । तर्हि विपरीतानुमानोपन्यासः कार्यः । प्रमाणाभावादेव प्रमेयासिद्धेरस्याश्रयासिद्धिदोषप्रसंगाच्चेति । ननु प्रमाणसिद्धस्यापि तस्य पक्षत्वमुपपद्यते । सिद्धत्वादेवाश्रयासिद्धिदोषाभावादिति चेन्नैवम् । सुरभि गगनकुसुमं कुसुमत्वात् सम्प्रतिपन्नवदित्यस्यापि गगनकुसुमशब्दसिद्धतया आश्रयासिद्ध्यभावप्रसङ्गात् । न च पुरुषः क्षित्यादिकर्ता न भवति । पुरुषत्वादस्मदादिवदिति वाच्यम् । सिद्धसाध्यताप्रसङ्गात् । विशिष्टपुरुषपक्षीकरणेऽपि जगत्कर्तृत्वव्यतिरिक्तकर्तृविशेषणविशिष्टत्वे सिद्धसाध्यता । जगत्कर्तृत्वविशिष्टपुरुषपक्षीकरणे भवेदेवाश्रयासिद्धिः, धर्मिग्राहकप्र-

माणबाधो वेति। न च सर्वे पुरुषाः क्षित्यादिकर्तारो न भवन्ति पुरुषत्वात् कुलालादिवदिति वाच्यम्। अंशे सिद्धसाध्यताश्रयासिद्धिधर्मिग्राहकप्रमाणबाधात्मकदोषत्रयापाताद् दृष्टान्ताभावाच्चेति। ननु विमतः पुरुषः क्षित्यादिकर्ता न भवति पुरुषत्वादित्यस्मिन् साध्ये न दोषत्रयावकाशः। न तावदाश्रयासिद्धिः, आत्मनः पुरुषस्य[1] सिद्धत्वात्। नापि सिद्धसाध्यताविप्रतिपत्तिः। अन्यपुरुषव्यवच्छेदात्। नापि धर्मिग्राहकप्रमाणबाधः। तस्य जगत्कर्तृत्वानङ्गीकारेण सिद्धत्वादिति चेद्। नैवम्। पुरुषमात्रे विप्रातिपत्त्यभावात्। क्षित्यादिकार्यमधिकृत्य विप्रतिपत्तिर्न पुरुषे। अस्तु वा पुरुषे विप्रतिपत्तिः। तथापि न पुरुषमात्रे। तस्य जगत्कर्तृत्वानभ्युपगमात्। विशिष्टे चेत्। केन विशेषणेन। विशिष्टे यदि किञ्चिज्ज्ञत्वादिना विशिष्टे, तत्र च न विप्रतिपत्तिः। यदि सर्वज्ञत्वादिविशेषणविशिष्टे, तत्र च न विप्रातिपत्तिः। जगत्कर्त्रनुमान[2]प्रवृत्तेः प्राक् तस्याप्रसिद्धत्वात्। नह्यप्रतिपन्ने धर्मिणि धर्ममूला विप्रतिपत्तिर्युक्ता। जगत्कर्त्रनुमानप्रवृत्त्युत्तरतश्च न विप्रतिपत्तिः, तस्य प्रमाणसिद्धत्वात्। तस्माद् न विप्रतिपत्तेर्व्यवच्छेदकत्वमिति। तथेश्वरः शरीरादिमान् कर्तृत्वादित्यादयश्च निरसनीयाः, उक्तन्यायसाम्यादिति। अथ क्षित्यादि कर्तृशून्यं तद्व्यापकशरीररहितत्वात् यद् यद्व्यापकरहितं तत् तद्व्याप्येनापि रहितं, यथा जलं धूमव्यापकाग्निरहितं धूमेनापीत्यनुमानविरोधाद् इति चेत्। न। अस्यानुमानस्य विशेषणा-

1. 'स्या' क. पाठः. 2. 'न विशिष्टे। तत्र च नविप्रतिपत्तिः। जगत्कर्त्रनुमानप्र' ग. पाठः.

सिद्धत्वेनाप्रामाण्यात्। शरीरकर्तृत्वयोः व्याप्यव्यापकभावेन तद्व्यापकशरीररहितत्वस्यासिद्धत्वात्। अस्मदनुमानाप्रामाण्ये भवदनुमानासिद्धिपरिहारः भवदनुमानबाधयास्मदनुमानाप्रामाण्यमिति इतरेतराश्रयप्रसङ्गश्च। अस्मदनुमानस्य भवदनुमानस्याप्रामाण्यमन्तरेणापि रूपपञ्चकोपपत्तेर्निरपेक्षं प्रामाण्यमित्युभयोः परस्परविरुद्धयोर्बाध्यबाधकसाम्येऽपि भवदनुमानस्य विशेषणासिद्धिरूपदोषान्तरसद्भावादबाधकत्वमिति। अथ क्षित्यादि कर्तृशून्यं शरीररहितत्वादिति हेतूपन्यासादसिद्धिपरिहारो भवेदिति चेत्। न। घटादिव्यभिचारात्। घटादयोऽपि शरीररहितास्तथापि कर्त्रशून्या इति। अथ शरीराजन्यत्वं विवक्षितमिति चेत्। न। शरीरविशेषणवैयर्थ्यात्। अजन्यत्वस्यैव कर्तृशून्यताव्याप्तत्वादिति। न च स एव हेतुरिति वाच्यम्। स्वरूपासिद्धताप्रसङ्गादिति। तथाग्नीषोमीयपशुहिंसा धर्मफला हिंसात्वाद् ब्राह्मणहिंसावदितिवत्। नास्यागमविरुद्धकालात्ययापदिष्टत्वम् कर्तृभावप्रतिपादकागमानुपलम्भात्। न च,

"अकर्तालेपको नित्यो मध्यस्थः सर्वकर्मणाम्"

इत्याद्यागमविरोधः। तस्य[1] सव्यापारकर्तृत्वमात्रनिषेधत्वात्। तच्चागमान्तरैः "न तं विदाथ य इमा जजान मा नो हिंसीज्जनिता यः पृथिव्याः" इत्यादिभिः परमेश्वरस्य जगत्कर्तृत्वप्रतिपादनादवगम्यते। तस्मादयस्कान्तवन्निर्व्यापारकर्तृत्वमस्येति सिद्धमिति। न चासौ प्रकरणसमः, स्वपरपक्षसिद्धावत्रिरूपो हेतुः प्रकरणसमः इत्युक्तलक्षणाभावात्।

१. 'स्य व्य' ग. पाठः.

तथाहि—यथा क्षित्यादि बुद्धिमत्पूर्वकं कार्यत्वाद् घटवादित्यस्मिन् प्रयोगे अस्य कार्यत्वस्य पक्षधर्मत्वसपक्षसत्त्वविपक्षव्यावृत्त्यात्मकरूपत्रयसद्भावः, न तथा क्षित्यादि बुद्धिमत्पूर्वं न भवति कार्यत्वान्मायावदिति परपक्षसाधनेऽस्य रूपत्रयसद्भावः, मायादौ कार्यत्वस्याभावेन सपक्षे सत्त्वाभावाद् घटादौ विपक्षे कार्यत्वसद्भावेन विपक्षाद् व्यावृत्त्यभावाच्चेति। तस्माद् रूपपञ्चकसद्भावाद् इदमनुमानं जगत्कर्तुः परमेश्वरस्य सद्भावे प्रमाणमेवेति सिद्धम्। आगमाश्च 'विश्वतश्चक्षुरि'त्याद्याः परमेश्वरस्य जगत्कर्तुः सद्भावं बोधयन्ति। न च तेषां विधिशेषत्वात् स्वार्थेऽप्रामाण्यमिति वाच्यम्। वेदवाक्यत्वाद् विधिवाक्यवदिति। न च 'आदित्यो यूपः' इत्यादिवदौपचारिकत्वम्। स्वार्थे बाधाभावात्। तथा ब्राह्मणादौ तदुक्तमृषिणेति मन्त्राणां स्वार्थे प्रामाण्यप्रतिपादनाच्चेति। तस्मादनुमानागमाभ्याम् अस्मदादीनां सिद्धो महेश्वर इति। योगिनां तु करतलामलकवदखिलमवलोकयतां प्रत्यक्षतोऽपि सिद्धः। तथाहि—परमेश्वरः केषाञ्चित् प्रत्यक्षसमधिगम्यः प्रमेयत्वात् करतलामलकवदित्यनुमानान्महेश्वरस्य प्रत्यक्षगम्यत्वसिद्धिः। योगिनां सद्भावश्च अस्मदाद्यप्रत्यक्षा मूलकारणधर्माधर्मादयः प्रधानपुरुषप्रत्यक्षाः प्रमेयत्वात् करतलामलकवदित्यनुमानसिद्धः। तत्र प्रधानपुरुषो महेश्वरोऽप्रधानपुरुषा योगिन इति तत्सिद्धिरिति ॥ १७ ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायां शुद्धवर्गविनिर्णयो
द्वितीयः परिच्छेदः ॥

अथ तृतीयः परिच्छेदः ।

अथेदानीं करणोपादानयोः स्वरूपनिरूपणार्थमाह —

शक्तय इहास्य करणं मायोपादानमिष्यते सूक्ष्मा ।
एका नित्या व्यापिन्यनादिनिधना शिवा सोक्ता ॥ १ ॥

इति । अयमभिप्रायः — पराशक्तिविकाराः इच्छाद्याः शक्तयः परमेश्वरस्य करणं हस्तादिस्थानीयम् । "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः शक्तिकरणसद्भावसिद्धिः । मायोपादानं मृत्तन्त्वादिस्थानीयमिति "मायां तु प्रकृतिं विद्यादि"ति श्रुतेस्तदुपादानत्वसिद्धिः । तर्हि सा माया कस्मान्नोपलभ्यते घटवदित्यत आह — सूक्ष्मेति । सूक्ष्मत्वादनुपलम्भो मायाया नासत्त्वादित्यर्थः । तथाहि — अतिदूरत्वातिसामीप्येन्द्रियघातमनोनवस्थानसौक्ष्म्यव्यवधानाभिभवसमानाभिहारानुद्भवाः[1] सत एवार्थस्यानुपलम्भकारणभूता लोके दृष्टाः । उत्पतन् व्योम्नि पक्षी सन्नप्यतिदूरतया प्रत्यक्षतो नोपलभ्यते । अतिसामीप्याच्चक्षुस्थमञ्जनं सदपि नाध्यक्षतोऽवगम्यते । मनोनवस्थानात् कामाद्युपप्लुतचेताः परिषदादिकं न पश्यति । इन्द्रियघातादन्धत्वबधिरत्वादेर्घटरूपशब्दाद्यनुपलम्भो भवति । सौक्ष्म्यात् परमाण्वादिकं प्रणिहितचित्तोऽपि न पश्यति । व्यवधानादन्तःस्थघटाद्यनुपलम्भः । आदित्यप्रभाभिभूतत्वाद् दिवा तारका नोपलभ्यन्ते । समानाभिहारात् तोयदमुक्तजल-

---

[1] 'क' ख. पाठः.

धाराणां जलाशयेऽनुपलम्भः । अनुद्भवात् क्षीराद्यवस्थायां दध्याद्यनुपलम्भ इत्येभिः कारणैः सत एवार्थस्यानुपलम्भदर्शनान्नानुपलम्भमात्रादसत्त्वनिश्चयः। सप्तमरसस्य प्रमाणाभावादसत्त्वेनानुपलम्भो नैभिः कारणैरिति । मायाया विद्यमानायाः सूक्ष्मतयानुपलम्भः, कार्यस्य जगतः उत्पादनकारणतया तत्सद्भावसिद्धेरिति । तदुक्तं सांख्याचार्यैः—

"अतिदूरात् सामीप्यादिन्द्रियघातान्मनोनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥
सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदनुपलब्धेः ।"

इत्यादि। कालाद्यवनिपर्यन्ततत्त्वजातं स्वात्यन्तसदृशोपादानकारणवत् कार्यत्वाद् यद्यत्कार्यं तत्तत् स्वात्यन्तसदृशोपादानकारणवद् दृष्टम् । यथा घटशरावादयो मृन्मयाः स्वात्यन्तसदृशमृदुपादानजन्याः, तथेदं तत्त्वजातं कार्यम् । तस्मात् स्वात्यन्तसदृशोपादानकारणवदिति । यच्च सर्वेषां तत्त्वानां जडानां जडतया सदृशमुपादानं तन्मायाख्यं तत्त्वमिति तत्सिद्धिः । तदुक्तं—

"कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ।"

इति । तथा कालाद्यवनिपर्यन्तानि तत्त्वान्यपरिमितैकोपादानानि परिमितत्वाद् यद्यत् परिमितं तत्तदपरिमितैकोपादानं दृष्टम् । यथा घटशरावादयः परिमिता अपरिमितैकमृदुपादानास्तथा कालादयः परिमिताः । तस्माद् अपरिमितैकोपादाना इति । यदत्रैकमेषामपरिमितमुपादानं सा मायेति । तथा कालादयः स्वाव्यक्तावस्थाकारणवन्तः, व्यक्तत्वात्,

कूर्माद् व्यज्यमानतदङ्गवदिति सिद्धा माया । एका सा, अनेकत्वे प्रमाणाभावात् । नन्वेकत्वे च प्रमाणाभावादनेकत्वमिति चेत् । नैवम् । एकत्वस्य सत्त्वमात्रेणैव सिद्धत्वात् । अनेकत्वस्य पुनः प्रमाणान्तरापेक्षया सद्भावसिद्धिरपि । सा नित्या च । तस्या उपादानान्तराभावेनाकार्यत्वात् । तदभा-(वश्च ? वे चा)नवस्थाप्रसङ्गः ।

"एतेषामेव पाशानां माया कारणमुच्यते ।
मूलप्रकृतिरव्यक्ता"

इति मायाया मूलप्रकृतित्वोपादानाच्च सिद्धा । व्यापिनी च सा स्वकार्येषु सर्वेष्वनुगमात् । अनादिनिधना उत्पत्तिनाशरहितेत्यर्थः । शिवा शुद्धा, गुणबन्धशून्यत्वात् । सैवमुक्ता तत्त्वविद्भिरिति । अथवा एकेत्यनेकोपादानजन्यतां प्रपञ्चस्यारम्भवाद्यभ्युपगतां प्रत्याचष्टे । तथाहि — पृथिव्यप्तेजोवायुतदवयवादीनां चावयव(विभा)गेनापरमाण्वन्तो विनाशः संहारः । न च परमाणोर्विनाशः संभवति, अवयवविभागासंभवात् । स चावयवाभावात् । स च परमाणुत्वात् । ततश्च सृष्टिदशायां परमाणुद्वयसंयोगादाद्यकार्यस्य द्व्यणुकस्योत्पत्तिः । तत्र परमाणुद्वयमुपादानकारणं, कार्याश्रयत्वात् । तत्संयोगोऽसमवायिकारणं, स्वाश्रये कार्यारम्भकत्वात् । शेषमदृष्टादि निमित्तकारणम् । ततो द्व्यणुकैस्त्रिभिस्त्र्यणुकस्योत्पत्तिः । तत्र च द्व्यणुकत्रयं समवायिकारणम् । तत्संयोगोऽसमवायिकारणम् । शेषं निमित्तकारणमिति । तावदेवमवगन्तव्यं, यावदन्त्यावयव्युत्पत्तिरित्यारम्भवादिनो वैशेषिकनैयायिकभाट्टप्राभाकरादयः । पटादिषु स्वन्यूनानेको-

पादानत्वोपलम्भात् प्रपञ्चस्यापि स्वन्यूनमनेकम् उपादानमिति प्राहुः। तत् प्रत्याचष्टे — एकेति। एकस्मान्मृत्पिण्डोपादानादनेकघटशरावकुम्भमृदङ्गादयः, रुचकस्वस्तिकाङ्गुलीयकादयो वा स्वर्णपिण्डाद्, वृक्षाद्वा मञ्जूषाफलकादयः यतोऽध्यक्षेणैव जायमाना उपलभ्यन्ते, अतो जगतः कार्यत्वेनोपादानकारणकल्पनायां गौरवपरिहाराय तदेकत्वं कल्पनीयमिति नानेकत्वं मूलोपादानस्येति। तदुक्तं भगवता वेदव्यासेन —

"एकस्माद् वृक्षाद् यज्ञपात्राणि तक्ष्यात्
स्रुक् च द्रोणी बोडनी पीडनी च"

इत्यादि। नित्या विनाशरहिता। व्यापिनी घटशरावकुम्भादिषु मृद्वत् स्वकार्येषु कालाद्यवन्यन्तेषु जडतयानुस्यूता इति। अनादिनिधना वृद्धिव्ययशून्या। अवयवोपचयो वृद्धिः, तदपचयो व्ययः। तद्द्वयरहितेत्यर्थः। एकत्वान्नित्यत्वात् सर्वगतत्वाच्चेति। शिवासक्तेति केचित् पठन्ति। तदा शिवे आसक्ता आभीक्ष्ण्येन संबद्धा। शिवस्य विग्रहत्वेनावस्थितेत्यर्थः॥ १॥

तस्या रूपमाह —

**साधारणी च पुंसां कारणमपि चेयमखिलभुवनानाम्।
निखिलजनकर्मखचिता स्वभावतो मोहसञ्जननी॥ २॥**

इति। अयमभिप्रायः—सकलजीवसाधारणी समाना। यतः सर्वजन्तुशरीरेन्द्रियविषयात्मना परिणममाना सर्वपुरुषोपभोग्या माया, अतोऽस्याः सर्वपुरुषसाधारण्यमिति। ननु सर्वपुरुषसाधारण्ये मुक्तस्यापि पुरुषस्य शरीराद्यारम्भप्रसङ्ग इत्या-

शङ्क्याह — निखिलजनकर्मखचितेति । सकलामुक्तजन्तुपुण्यापुण्यमुद्रिता । तेन मुक्तानां कर्माभावात् तन्निमित्तशरीराद्यारम्भाभाव इति भावः । अथवा प्रलयावस्थायां कर्मणां कुत्र वृत्तिरिति वाच्यम् । न तावदात्मनि । तस्य स्वच्छचैतन्यरूपतया निरञ्जनस्य तदाश्रयत्वानुपपत्तेः । तदुक्तं —

"यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥"

"यथा हि धूमसंपर्कान्नाकाशो मलिनो भवेत् ।
अन्तःकरणजैर्भावैरात्मा तद्वन्न लिप्यते ॥"

इति । न च तदा[1] सूक्ष्मदेहाश्रितं कर्मेति वाच्यम् । तस्य तदानीं प्रकृतौ निलीनतयासत्त्वात् । न च तदानीं कर्मणामसत्त्वेनाश्रयत्वस्यानिरूपणीयतेति वाच्यम् । कर्मणामसत्त्वे निमित्ताभावेन पुनः सृष्ट्य[2]भावप्रसङ्गात् । तस्मात् क्व तदानीं कर्मणां वृत्तिरित्याशङ्क्याह — निखिलजनकर्मखचितेति । स्वभावतो मोहसञ्जननीति । स्वीयेन जडत्वभावेनात्मप्रच्छादनं कृत्वा स्वस्मिन्नात्मबुद्धिं कुर्वती पशून् मोहयतीति । तदुक्तं किरणे —

"माया विमोहनी प्रोक्ता विषयास्वादभोगतः ।
यत्र तत्र स्थितस्यास्य स्वकर्ममलहेतुतः ॥"

इति । नन्वव्यक्तं सकलकार्योपादानकारणम् । अतस्ततो-

१. 'था' ख. पाठः. २. 'ष्ट्या' क. पाठः.

ऽन्या माया न कल्पनीयेति चेत्। नैवम्। तस्य त्रिगुणात्मतया कार्यत्वेन तत्कारणभूतनित्योपादानान्तरस्यावश्यमाश्रयणीयत्वात्। तथाहि — प्रधानं कार्यं त्रिगुणात्मकत्वाद् घटादिवदिति तस्य कार्यत्वसिद्धिः। न चाव्यक्तस्य त्रिगुणात्मकत्वमसिद्धमिति वाच्यम्। सत्त्वरजस्तमसां साम्यावस्थारूपतया तस्य त्रिगुणात्मकत्वसिद्धेः। तथा 'अजामेकां लोहितशुक्लकृष्णामि'त्यादिश्रुतेश्च तत्सिद्धिः। ननु

"प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम!"

इत्याद्यागमबाधादयुक्तमेतदिति चेत्। नैवम्। 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'ति वाक्यबोधितसुकृताक्षय्यत्ववन्महदादिकालापेक्षयाधिककालसंबन्धस्य विवक्षितत्वात्। ननु तत्र अनित्यं चातुर्मास्यफलं कार्यत्वाद् इतरकर्मफलवदित्यनुमानादिना प्रमाणान्तरेण तदनित्यत्वसिद्धेर्युक्तमक्षय्यपदस्य दीर्घकालसंबन्धपरत्वकल्पनमिति चेत्। न। अत्राप्यव्यक्तानित्यत्वबोधकस्यानुमानस्योक्तत्वाद्, आगमस्य सद्भावाच्च। तथा —

"अव्यक्तादभवत् कालः प्रधानं पुरुषः परः।
तेभ्यः सर्वमिदं जातम्"

इतीश्वरगीतायां प्रधानोत्पादप्रतिपादनात् तदनित्यत्वसिद्धिः, श्रीविष्णुपुराणे च प्रधानपुरुषकालानामुत्पादप्रतिपादनाच्च॥ तथाहि —

"विष्णोः स्वरूपात् परतो दिते ऽन्ये रूपे प्रधानं पुरुषश्च विप्र!।
तस्यैव तेऽन्येन धृते वियुक्ते रूपं तु यत्तद्द्विज! कालसंज्ञम्॥"

इति । 'मायां तु प्रकृतिं विद्यादि'ति मायामूलोपादानत्वप्रतिपादनाच्च तत्सिद्धिरिति । तस्मान्माया जगन्मूलोपादानमिति सिद्धम् । सा माया हरितालनिभा । तदुक्तं —

"तद्बाह्ये तु भवेन्माया हरितालाभसन्निभा"

इति । अस्याः षडध्वव्याप्तिः — घकारो वर्णः । अघोरहृदयायेत्यादीनि त्रीणि पदानि । शिम् अघोरहृदयाय पञ्चाणौं मन्त्रौ । माया तत्त्वम् । महातेजादि सप्त भुवनानि । निवृत्तिः कला ॥ २ ॥

ननु कथं भगवान् जगत् सृजति, कैः करणैः, किमर्थं चेत्याशङ्कयाह —

कर्माण्यवेक्ष्य शम्भुर्मायां विक्षोभ्य शक्तिभिः स्वाभिः ।
प्रतिपुरुषं भोगार्थं वपूंषि करणानि चाधत्ते ॥ ३ ॥

इति । कर्मानुरूपेण प्रतिपुरुषं शरीरेन्द्रियाणि च शब्दादिविषयांश्च भोगार्थं शम्भुरिच्छाभिः स्वाभिः शक्तिभिः मायां विक्षोभ्य विविधं क्षोभं विकारं कृत्वेति । नह्युपादानादिकं कारणं कर्त्रप्रेरितं कार्योत्पादने पर्याप्तमिति क्षोभसिद्धिरिति ॥ ३ ॥

अथेदानीं सर्वकार्यकारणतया तेषु प्रथमोद्दिष्टं कालतत्त्वं लक्षयति —

नानाविधशक्तिमयी सा सृजति (हि) कालतत्त्वमेवादौ ।
भाविभव(द्?)भूतरूपं कलयति जगदेष कालोऽतः ॥

इति । इच्छादिबहुविधशक्तिप्रेरिता माया जनयति कालाख्यं तत्त्वम् । आदौ प्रथमं, कालजन्यानां तत्त्वान्तराणां

कालानुत्पत्तौ जननासंभवात् । ततस्तत्त्वान्तराणि तज्जन्यानीति । यथा घटोत्पादनाय तत्कारणभूतचक्रादिकं कुलालः प्रथममुत्पादयति, तदनुत्पत्तौ घटोत्पादनासंभवात्, तैथा(पि?) कालं प्रथमं सृजति माया, तस्य स्व(व्य)तिरिक्तसर्वकारणत्वादिति । कालस्य तु स्वोत्पत्तौ कालापेक्षायां कालान्तराभ्युपगमेनानवस्थाप्रसङ्गात् तदुत्पत्तौ[2] न कालापेक्षेति शिवशक्तिकर्ममायात्मकचतुष्कजन्यः काल इति । तस्य लक्षणमाह —

भाविभवद्भूतरूपं कलयति जगदेष कालोऽत इति । यत् तत्त्ववशात् पदार्थेषु भाविभवद्भूतरूपावभासं तत् कालाख्यं तत्त्वम् । अथवा यत् तत्त्वं भाविभवद्भूतरूपं जगत् कलयति बध्नाति, क्षणलवादिरूपेण संख्यापयति वा तत् कालाख्यं तत्त्वमिति । तथा वैशेषिकादिभिरप्युक्तं — "परापरव्यतिकरचिरक्षिप्रादिप्रत्ययहेतुः कालः" इति । यूनि दिक्कृतपरत्वाश्रयेऽपरत्वावभासः, स्थविरे च स्वकृतापरत्वाश्रये परत्वावभासः परापरव्यतिकरः तस्य, चिरव्यवहारस्य क्षिप्रव्यवहारस्य च, आदिशब्देन युगपत् करोति क्रमेण करोतीत्यादिव्यवहारस्य च यो हेतुः, स काल इति । अनेनैव लक्षणवाक्येन कालतत्त्वे प्रमाणं चोपन्यस्तम् । तथाहि — भूतत्वादिविशिष्टा बुद्धिः विशेषणपूर्विका विशेष्यज्ञानत्वाद् यद्यद् विशेष्यज्ञानं तत्तद् विशेषणपूर्वकं, यथा दण्डी कुण्डली छत्रीत्यादि विशेष्यज्ञानं दण्डादिविशेषणपूर्वकं, तथा चेदं विशेष्यज्ञानम् ।

---

१. 'अ' ख. पाठः. २. 'चौ का' क. पाठः.

तस्माद् विशेषणपूर्वकम् । यदत्र विशेषणं नियत्याद्यवनिपर्यन्ततत्त्वव्यतिरिक्तं, तत कालतत्त्वमिति तत्सिद्धिः । तस्य चित्रं वर्णम् । तदुक्तं —

"ततः कालनियत्याख्यः सम्पुटो व्याप्य चावृतः ।
शितिः श्यामोऽरुणः शुक्लः क्वचिद् व्यामिश्रकस्तथा ॥"

इति । अस्य षडध्वव्याप्तिः — ङकारो वर्णः । ओं नमोनम इत्यादि द्वे पदे । वां वामदेवगुह्याय पञ्चार्णौ मन्त्रौ । सुखदैकवीरौ भुवने । शान्त्यतीता कला ॥ ४ ॥

अथ नियत्या लक्षणमाह —

नियतिर्नियमनरूपा मायातः साप्यनन्तरं भवति ।
नियमयति येन निखिलं तेनेयं नियतिरुद्दिष्टा ॥

इति । मायातत्त्वादेव नियतितत्त्वं कालतत्त्वादनन्तरमुत्पद्यते । कालस्यापि नियत्युत्पत्तौ कारणत्वात् । तस्या निरुक्तिपूर्वकं लक्षणमाह — नियमयतीति । येन नियमयति व्यवस्थापयति निखिलं, तेनेयं नियतिसंज्ञयोद्दिष्टा । अनेनैव वाक्येन तस्याः प्रमाणमप्युक्तम् । तथाहि — लोके तावत् तिलेषु तैलं, न सिक(तेषु?तासु) । व्रीहिषु तण्डुलाः, न मुद्गादिषु । एवमूधसि पयो नान्यावयवेष्वित्यादिनियमो नियामकेन विना न संभवतीति तन्नियामकं किञ्चिदभ्युपगन्तव्यम् । अन्यथा तन्नियमासंभवप्रसङ्गात् । यदत्र तन्नियामकं तन्नियतितत्त्वमिति तत्सिद्धिः । तदुक्तं पारमेश्वरे —

"अथेदानीं मुनिव्याघ्र! कारणस्यामितद्युते! ।

शक्तिर्नियामिका पुंसो महासत्त्वेन सर्पता ॥
नियामकेन भावेन नियमस्थितिहेतुना ।
ययाणुर्भोगसन्ताने नियम्य विनिवार्यते ॥
व्यवस्थाकारिणी नान्या विद्यते तत्त्वसन्ततौ ।
कोटिद्वयमसंख्यातं धर्माधर्मात्मकं पशोः ॥
यदर्थं व्यक्तिमायाति शरीरं सर्वदेहिनाम् ।
तद्विपाकेष्वनायासं क्षेत्रज्ञं सुनिरूप्य तु ॥
नियामयति यस्माद्वै तस्मान्नियतिरुच्यते ।
तयोरभ्यधिकं यच्च दुःखं वाप्यथवा सुखम् ॥
न ददाति समं धत्ते स्ववीर्येणैव नान्यथा ।"

इत्यादि । नियतेश्च कालवद्वर्णम् । अस्याः षडध्वव्याप्तिः—चकारो वर्णः । गोप्त्रे निधनायेति द्वे पदे । यं सद्योजातमूर्तये पञ्चार्णौ मन्त्रौ । नियत्याख्यं तत्त्वम् । संवर्तज्योतिषी भुवने । शान्तिः कला ॥ ५ ॥

अथ कलातत्त्वं निरूपयति—

मायातस्तदनु कलामलं नृणामेकतस्तु कलयित्वा ।
व्यञ्जयति कर्तृशक्तिं कलेति तेनेह कथिता सा ॥

इति । कालनियतितत्त्वादनन्तरं कलातत्त्वं मायात एवोत्पद्यते । येन पशूनामाणवं मलमेकस्मिन् प्रदेशे संकुचय्य तेषां कर्तृशक्तिर्व्यक्तीक्रियते, तत् कलातत्त्वम् । यतः कर्तृशक्तिरनेन व्यक्तीक्रियते; ततोऽस्याः सद्भावसिद्धिः । तदुक्तं—

१. 'त्वान' ग. पाठः.

"कलां तदनु माया सा कलयित्वैकतो मलम् ।
कर्तृत्वव्य[1]ञ्जिकां[2] नर्ते कर्तारं हि जडोऽध्व[3]रैः ॥"

मातङ्गे च—

"यथाग्नितप्तमृत्पात्रं जतुनालिङ्गने क्षमम् ।
तथाणुं कलया विद्धं भोगः शक्नोति वासितुम् ॥
भोगपात्री कला ज्ञेया तदाधारश्च पुद्गलः ।
भोगानामपि नान्योऽस्ति कलां त्यज्य समाश्रयः ॥
ततोऽयं नियतः स्पष्टः संसारोऽतिदुरुत्तरः ।"

इत्यादि । तस्मात् [4]कलाख्यं तत्त्वमभ्युपेयमिति ॥ ६ ॥

तत्त्वत्रयं सर्वत्रोपयुज्यत इत्याह—

कालेन नियत्या चाप्युपसर्जनतामुपेतया सततम् ।
विदधाति व्यापारं (नि?नी)मेषाद्यवनिपर्यन्तम् ॥ ७ ॥

इति । यया कालनियतिसहितया माया मात्रावस्थानाद्यवन्यन्तकार्यजातं विदधाति करोति, सेयं कलेति । वर्णश्चास्याः श्वेतपीतारुणकृष्णमिश्रात्मकः । तदुक्तं—

"कलातत्त्वं परं तस्माद् विद्यातत्त्वादशोभनम् ।
श्वेतपीतारुणं कृष्णं मिश्रवर्णं क्वचित् तथा ॥"

इति । अस्याः षडध्वव्याप्तिः—[5]ऐंकारो वर्णः । सर्वयोगाधिगतायेत्यादि द्वे पदे । यं अस्त्राय पञ्चार्णौ मन्त्रौ । कलाख्यं तत्त्वम् । पञ्चान्तकसूकरौ भुवने । विद्या कलाः ॥

---

१. 'व्यक्तितो न' क. पाठः. २. 'तां', ३. 'वम्' ख. पाठः
४. 'क्रा' ग., 'ब' ख. पाठः. ५. 'ङ' ग. पाठः.

इदानीमशुद्धविद्यास्वरूपमाह —

उद्‌बुद्धकर्तृशक्तेः पुंसो विषयप्रदर्शननिमित्तम् ।
विद्यातत्त्वं सूत्रे प्रकाशरूपं कलैवैषा ॥ ८ ॥

इति । कलयाभिव्यक्तकर्तृशक्तेः पुरुषस्य विषयानुभवार्थं कला विद्यातत्त्वं जनयति । तस्याः प्रकाशरूपत्वेन विषयप्रदर्शनहेतुत्वसम्भव इति । अन्ये तु मायात एव विद्योत्पत्तिं ब्रुवते । तदुक्तं शैवरहस्ये —

"सुखदुःखमोहवपुषो भोग्या या व्यञ्जिका च सा बुद्धेः ।
मायात एव विद्या प्रकाशरूपा समुद्भवति ॥"

इति ॥ ८ ॥

तस्या विषयप्रदर्शनप्रकारमाह —

आवरणं भित्त्वैषा ज्ञानाख्यायाः स्वकर्मणा शक्तेः ।
दर्शयति विषयजातं करणं सेहात्मनः परमम् ॥ ९ ॥

इति । एषा विद्या स्वसामर्थ्येनैव पुद्गलस्य ज्ञानशक्तेस्तिरोधानं सम्भिद्य विषयसमूहं दर्शयतीति सा विद्येह संसारमार्गे पशोरात्मनः प्रकृष्टं करणमिति ॥ ९ ॥

ननु शब्दादिविषयाध्यवसायो बुद्धिः । अतस्तयैव विषयप्रदर्शने सिद्धे किमर्थं विद्यातत्त्वपरिकल्पनमित्याशङ्क्याह —

बुद्धिर्यदास्य भोग्या सुखादिरूपा तदा भवेत् करणम् ।
विद्येयं करणं स्याद् विषयग्रहणे पुनर्बुद्धिः ॥ १० ॥

---

१. 'सं' ग. पाठः

इति । यदा सत्त्वरजस्तमोगुणात्मिका बुद्धिः सुखदुःखमोहरूपेण परिणता भोक्तुरात्मनो भोग्या भवति, तदेयं विद्या करणं भवेत् । विषयग्रहणे तु बुद्धिरेव करणं भविष्यतीति बुद्ध्याध्यवसितमर्थं पुरुषश्चेतयतीति । तदयुक्तं; पुरुषस्य चितेरक्रियात्मकत्वाद् विरुद्धक्रियत्वाच्चेति । तस्माद् बुद्ध्याध्यवसितमशुद्धविद्ययानुभवति पुरुष इति युक्तम्। पुरुषाद् भिन्नत्वान्मायाकार्यत्वाच्चाशुद्धविद्यायाः परिणामादिसंभवादिति । न च बुद्धिः स्वप्रकाशात्मिका कार्यत्वात् सगुणत्वाद् घटादिवदिति बुद्धेः स्वव्यतिरिक्तप्रकाश्यत्वसिद्धिः । तथा बुद्धिः प्रकाश्या जडत्वाद्, जडा च सा कार्यत्वाद् घटादिवदिति। न च बुद्ध्यन्तरग्राह्या बुद्धिः । तदभावात् । न च वृत्त्यन्तरेण तद्ग्रहणम् । बुद्धेरेकदैव वृत्तिद्वयासम्भवात् । न चाशुद्धं शुद्धविद्या वेदयतीति । यदशुद्धावेदकं परं तदशुद्धविद्याख्यं तत्त्वमिति तत्सिद्धिः । तदुक्तं पारमेश्वरे—

"प्रतिपत्त्यागतान् भोगान् क्रमशो व्यूढगोचरान् ।
भोगभुक् प्रतिजानाति विद्ययात्मनिषण्णया ॥
ख्यातिः प्राधानिकान् भावान् विवेचयितुमुद्यता ।
यदा तदात्मवर्तिन्या विद्यया सुनिरूप्यताम् ॥"

इति । अशुद्धं बुद्धितत्त्वं वेदयतीत्यशुद्धविद्या, अशुद्धा चासौ विद्येति वा, मलादिनाशुद्धस्य क्षेत्रज्ञस्य विद्येति वा तस्याः सिद्धिः शुद्धविद्यातः शुद्धविद्यायाः शिवाव्यतिरिक्तया स्वयम्प्रकाशया परमशक्त्यैति शैवसिद्धान्तः ।

"विद्येयं सर्वभावानामशुद्धार्थप्रदायिका[1] ।
शिवसद्भावकुशला विद्यान्या शुद्धगोचरा ॥"

इत्याद्युक्तत्वात् । तस्या वर्णमिन्द्रगोपनिभम् । तदुक्तं —

"विद्यातत्त्वं परं रागादशुद्धं पशुमोहनम् ।
इन्द्रगोपकसंकाशं क्वचिच्चामीकरप्रभम् ॥"

इति । अस्याः षडध्वव्याप्तिः — जकारो वर्णः । ज्योतीरूपाये-त्यादि द्वे पदे । वां नेत्रत्रयाय पञ्चार्णौ[2] मन्त्रौ । अशुद्धविद्याख्यं तत्त्वम् । चण्डक्रोधौ भुवने । प्रतिष्ठा कला ॥ १० ॥

इदानीं रागतत्त्वं निरूपयति —

रागोऽभिष्वङ्गात्मा विषयच्छेदं विनैव सामान्यः ।
पुरुषप्रवृत्तिहेतुर्विलक्षणो बुद्धिधर्मेभ्यः ॥ ११ ॥

इति । अभिष्वङ्गात्मा रागो विषयमन्तरेण पुरुषप्रवृत्तेः सामान्यो हेतुः । केचिद् रागतत्त्वस्य बुद्धिधर्मत्वमिच्छन्ति । तन्निरस्यति — विलक्षणो बुद्धिधर्मेभ्य इति । विषयप्रदर्शनद्वारेण पुरुषप्रवृत्तिहेतुभूतो बुद्धिधर्मो रागः । अस्य विषयावभासेन विना पुरुषप्रवृत्तिहेतुत्वाद् बुद्धिधर्मवैलक्षण्यसिद्धिः । मुमुक्षोर्विषयतृष्णस्य तत्साधने विषयावभासेन विना प्रवृत्तिर्दृष्टा । अतस्तत्प्रवृत्तिहेतुभूतं रागतत्त्वमभ्युपेतव्यम् । तदुक्तं मतङ्गपारमेश्वरे —

"अथाणोर्विसृतस्यास्य कलाविद्धस्य वेगतः ।
प्रवृत्तस्याभिलाषेण विद्ययोन्मीलितस्य च ॥

---

१. 'भा' ग. पाठः. २. 'श्चविद्यार्णौ' क. पाठः.

येनासौ रञ्जितः क्षिप्रं भोगभुग् भोगतत्परः ।
रागोऽन्योऽपि परः सूक्ष्मो विशिष्टोऽस्मान्मदात्मकात् ॥
येन नैःश्रेयसे पुंसां प्रवृत्तिरुपजायते ।
दृश्यते च विरक्तानां नराणां बन्धगोचरात् ।
आचार्यान्वेषणे रागः शिवमुद्दिश्य सादरम् ॥"

इत्यादि । किरणे च —

"रागरञ्जितचिद्धर्म+युक्तश्च त्रिभिर्गुणैः ।
बुद्ध्यादिकरणानीकसम्बन्धाद् बध्यते पशुः ॥"

इत्यादि । तस्माद् रागतत्त्वसद्भावः[1] सिद्धः । तस्य वर्णं कुङ्कुमाभम् । तदुक्तं —

"तद्बाह्ये रागतत्त्वं तु कुङ्कुमोदरसन्निभम् ।"

इति । अस्य षडध्वव्याप्तिः — झकारो वर्णः । परमात्मन्नित्यादि द्वे पदे । शिं कवचाय पञ्चार्णो मन्त्रौ । रागाख्यं तत्त्वम् । प्रचण्डादीनि पञ्च भुवनानि । निवृत्तिः कला ॥ ११ ॥

अथेदानीं पुरुषतत्त्वस्वरूपमाह —

तत्त्वैरेभिः कलितो भोक्तृत्वदशां यदा पशुर्नीतः[2] ।
पुरुषाख्यतां तदायं लभते तत्त्वेषु गणनां च ॥ १२ ॥

इति । यदायमीश्वरः एभिः कालनियतिकलाविद्यारागाख्यैः पञ्चभिस्तत्त्वैः सम्बन्धात् पशुभावं प्राप्य भोक्तृत्वा-

---

१. 'वसिद्धिः', २. 'र्निरस्तः' ख. पाठः.

वस्थां प्राप्नोति, तदा व्यक्तादिचतुर्विंशतितत्त्वमये पुरि शय-नात् पुरुषसंज्ञां च लभते, शिवतत्त्वव्यतिरेकेण तत्त्वेषु गणानां चेति । तस्य वर्णः स्वतः शुद्धः[1], उपाधितोऽनेकवर्णः । अस्य षडध्वव्याप्तिः — ञकारो वर्णः । व्योमिम्नित्यादि द्वे पदे । मं शिखायै पञ्चार्णौ मन्त्रौ । पुरुषाख्यं तत्त्वम् । वामादीनि षड् भुवनानि । शान्त्यतीता कला ॥ १२ ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायां शुद्धाशुद्धविनिर्णयः

तृतीयः परिच्छेदः ।

अथ चतुर्थः परिच्छेदः ।

अथेदानीमव्यक्तस्वरूपनिरूपणार्थमाह —

पुरुषस्य हि भोगार्थं किलैव तस्मात् प्रसूयतेऽव्यक्तम् ।
अनभिव्यक्तगुणत्वादव्यपदेशं तदव्यक्तम् ॥ १ ॥

इति । पुरुषस्य सुखाद्यनुभवाय मायातत्त्वादेवाव्यक्त-मुत्पद्यते । अव्यक्तपदप्रवृत्तिनिमित्तमाह — अनभिव्यक्त-सत्त्वादिगुणवत्त्वादिदं तत्त्वमव्यक्तमित्युच्यते । सत्त्वरजस्त-मसां साम्यावस्था प्रकृतिरिति सांख्याचार्या आहुः । अतोऽन-भिव्यक्तगुणत्वमस्य सम्भवति । भूततन्मात्रेन्द्रियमनोहङ्कारबु-द्धीनामव्यक्तकार्याणां सुखदुःखमोहहेतुतया त्रिगुणात्मक-त्वात् तत्कारणस्याव्यक्तस्य त्रिगुणात्मकत्वसिद्धिः । तस्य[2] स्वरूपमप्रतर्क्यम् । तदुक्तं —

"तद्बाह्ये तु भवेदन्यदव्यक्तं तत्त्वमुत्तमम् ।
अप्रतर्क्यमविज्ञेयं निर्वाणवदवस्थितम् ॥"

---

१. 'सि', २. 'स्य रू' ग. पाठः.

इति । अस्य षडध्वव्याप्तिः—टकारो वर्णः । अरूपिन्नित्यादि द्वे पदे । नं शिरसे पञ्चार्णौ मन्त्रौ । गुणप्रकृत्याख्यं तत्त्वम् । कृताकृतादीन्यष्टौ भुवनानि । शान्तिः कला ॥ १ ॥

गुणतत्त्वं लक्षयति—

अव्यक्ताद् गुणतत्त्वं प्रख्याव्यापारनियमरूपमिह ।
सत्त्वं रजस्तमोऽपि च सुखदुःखं मोह इति च ॥ २ ॥

इति । गुणसाम्यस्वभावादव्यक्ताद् गुणतत्त्वं वैषम्यात्मकं जायते । प्रख्याव्यापारनियमरूपं तद्वृत्तिकम् । प्रख्या प्रकाशो ज्ञानं वृत्तिः, सत्त्वगुणस्य निर्मलत्वात् । व्यापारः क्रिया रजसो वृत्तिः, चलत्वात् । नियमो नियमनं वृत्तिस्तमसः, गुरुत्वादिति सत्त्वरजस्तमोनामकं च सुखदुःखमोहस्वरूपकं च गुणतत्त्वमिति । तदुक्तं सांख्यैः—

"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥"

इति । अस्य गुणतत्त्वस्य वर्णं शुक्लरक्तकृष्णात्मकम् । तदुक्तं[1]—

"तद्बाह्ये तु भवेदन्यद् गुणावरणसंज्ञितम् ।
इन्द्रनीलमहारत्नशुद्धस्फटिकसन्निभम् ॥"

इति ॥ २ ॥

इदानीं बुद्धितत्त्वं निरूप्यते—

भवति गुणत्रयतो धीर्विषयाध्यवसायरूपिणी चेति ।
सापि त्रिविधा गुणतः प्राक्तनकर्मानुसारेण ॥ ३ ॥

---

१. 'क्तं—बा' ख. ग. पाठः.

इति। गुणानां सत्त्वरजस्तमसां त्रयं गुणत्रयं तस्माद् बुद्धिरुत्पद्यते। तस्या लक्षणमाह — विषयाध्यवसायरूपिणी चेति। विषयेषु शब्दादिष्वध्यवसायो निश्चयो रूपं वृत्तिर्यस्याः सा तथोक्ता। चकाराद् धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यात्मनाष्टविधवृत्तिमत्त्वं बुद्धेः सूचितम्। तदुक्तम् —

"अध्यवसायो बुद्धिर्धर्मो ज्ञानं विरागमैश्वर्यम्।
सात्त्विकमेतद्रूपं तामसमस्माद् विपर्यस्तम्॥"

इति। तत्राभ्युदयनिःश्रेयसयोर्यो हेतुः, स धर्मः। तत्र कामनापूर्वयागाद्यनुष्ठानजनितो धर्मोऽभ्युदयस्य स्वर्गादिसुखस्य हेतुः। तद्रहितयागाद्यष्टाङ्गयोगानुष्ठानजनितो धर्मो निःश्रेयसस्य[2] हेतुः। योगलक्षणमुपरिष्टाद् वक्ष्यामः। ज्ञानं सम्यग्ज्ञानम्। तद् द्विविधं — प्रमाणं च स्मृतिश्चेति। अनुभूतविषयासंप्रमोषः स्मृतिः। तद्यथा — सा मे माता, स मे पिता, तद् गृहमित्यादि हि ज्ञानं पूर्वानुभवजनितसंस्कारमात्रमुद्भवति। सम्यगनुभवः प्रमाणम्। तदुक्तम् —

"अनुभूतिः प्रमाणं सा स्मृतेरन्या तु सा स्मृतिः।
पूर्वानुभवसंस्कारमात्रजं ज्ञानमुच्यते॥"

इति। सम्यक्पदेनात्र विकल्पविपर्ययादिव्युदासः क्रियते। अनुभवपदेन स्मरणं व्युदस्तम्। तद् द्विविधम् — तत्त्वावेदकमतत्त्वावेदकं चेति। तत्रात्मानात्मविवेकज्ञानं तत्त्वावेदकम्। तदुक्तं लैङ्गे —

---

१. 'र्य' ग. पाठः. २. 'स्य धर्मो हे' ख. पाठः.

"अव्यक्ताद्ये विशेषान्ते विकारेऽस्मिन्नचेतने ।
चेतनाचेतनान्यत्वविज्ञानं ज्ञानमुच्यते ॥"

इति । अनात्मविषयं प्रमाणज्ञानमतत्त्वावेदकम् । तदुक्तं—

"द्वे विद्ये वेदितव्येऽत्र परा चैवापरा तथा ।
कर्मा(ति?दि)विद्या ह्यपरा परा चोपनिषद्गता ॥"

इति । तदेतत् प्रत्यक्षमेवेति चार्वाकः । स्पष्टास्पष्टात्मना द्विविधमित्यार्हताः । प्रत्यक्षानुमानात्मना द्विविधं प्रमाणमिति बौद्धवृद्धवैशेषिकौ । तत्रागमस्याप्रामाण्याद् द्वैविध्यं बौद्धैः कल्पितम् । शब्दादीनामप्यनुमानेऽन्तर्भावाद् द्वैविध्यमितरो ब्रूते । सशाब्दं चैतत् प्रमाणमिति साङ्ख्यनूतनवैशेषिकभूषणकाराः । तत्त्रयमुपमानसहितं वृद्धनैयायिकः । सार्थापत्ति तच्चतुष्कं प्रभाकराचार्यो ब्रूते । साभावं तत्पञ्चकं भट्टपादोपनिषदः । ऐतिहासिकपौराणिका ऐतिह्यसम्भवचेष्टाविरोधसहितं तत्षट्कमाहुः । तदुक्तं—

"चार्वाकोऽध्यक्षमेकं सुगतकणभुजौ
सानुमानं सशाब्दं
तद्वैतं पारमर्षः सहितमुपमया
तत्त्रयं चाक्षपादः ।
सार्थापत्ति प्रभाकृद् वदति तदखिलं
पञ्चकं तच्च भाट्टः
साभावं द्वे प्रमाणे दिनपतिसमये
स्पष्टतास्पष्टता चं ॥"

इति ।

"अन्यथाख्यामुपाश्रित्य सांख्यवच्छिवशासनम्"

इति वचनादस्माकं तत् त्रिविधमेव प्रत्यक्षमनुमानमागम इति । परे चाहुः—तत्त्रैविध्यमैन्द्रियकं लैङ्गिकं शाब्दं चेति । अर्थेन्द्रियसंप्रयोगात् संप्रयुक्तेऽर्थे विज्ञानं प्रत्यक्षम् । विज्ञानं प्रत्यक्षमित्युक्ते विकल्पे व्यभिचारः । तन्निवृत्त्यर्थमर्थ इति पदम् । अर्थे ज्ञानमित्युक्ते विपर्यये व्यभिचारः । तन्निवृत्त्यर्थं संप्रयुक्त इति पदम् । अनुमानादिव्यवच्छेदार्थम् अर्थेन्द्रियसंप्रयोगादिति पदम् । तद् द्विविधं—निर्विकल्पकं सविकल्पकं चेति । तत्र नामजात्युल्लेखशून्यं प्रत्यक्षज्ञानं निर्विकल्पकं, यथा प्रथमाक्षसन्निपातजं वस्तुमात्रावभासकं विज्ञानम् । तदुक्तम्—

"अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥"

इति । नामादिसम्बन्धोल्लेखि प्रत्यक्षज्ञानं सविकल्पकम् । तद्यथा—देवदत्तेति नामविकल्पः । दण्डी कुण्डलीत्यादयो द्रव्यविकल्पाः । शुक्लः कृष्णो महानित्यादयो गुणविकल्पाः । गच्छत्यागच्छति पततीत्यादयः क्रियाविकल्पाः । मनुष्यः पशुर्घट इत्यादयो जातिविकल्पाः । इति पञ्चविधं सविकल्पकमिति । तत् पुनर्द्विविधं—योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति । देशकालस्वभावविप्रकृष्टार्थविषयमपरोक्षज्ञानं योगिप्रत्यक्षम् । तद्विपरीतमयोगिप्रत्यक्षम् । तद्यथा—देशविप्रकृष्टा मेर्वादयः । कालविप्रकृष्टा रावणादयः । स्वभा-

वविप्रकृष्टा[1] मूलकारणेन्द्रियादयः । तेषु यदपरोक्षं विज्ञानं योगिनां, तद् योगिप्रत्यक्षम् । इतरस्योदाहरणमुक्तमिति । लिङ्गादुपजायमानं लिङ्गिविज्ञानमनुमानम् । निरुपाधिकसाध्यसंबन्धि लिङ्गम् । तत् त्रिविधं पूर्ववत् शेषवत् सामान्यतोदृष्टं चेति । कारणेन कार्यानुमानं पूर्ववत्, यथा विशिष्टमेघोन्नत्या भविष्यति वृष्टिरिति विज्ञानम् । तदुक्तं न्यायविद्भिः—

"सविद्युतां विदधतां गर्जाडम्बरमम्बरे ।
घनानामुन्नतिर्दृष्टा न वृष्टिव्यभिचारिणी ॥
त्वङ्गत्तटिल्लतासङ्गपिशङ्गोत्तुङ्गविग्रहाः ।
वृष्टिं व्यभिचरन्त्येते[2] नैवंप्रायाः पयोमुचः ॥"

तथा —

"शिखण्डिमण्डलारब्धचण्डताण्डवडम्बरैः ।
प्रावृडाख्यायते मेघमेदुरैर्मेदिनीधरैः ॥"

इति । कार्येण कारणानुमानं शेषवत् । तद्यथा — नदपूरेणोपरिष्टाद् वृष्ट्यनुमानम् । तदन्यत् सामान्यतोदृष्टम् । तद्यथा — रसाद् रूपविषयं विज्ञानमिति । अपरे दृष्टस्वलक्षणसामान्यविषयं पूर्ववत् । तद्यथा—धूमादिलिङ्गदर्शनादध्यक्षयोग्येऽग्नावनध्यक्षे संजायमानं विज्ञानम् । सामान्यतोदृष्टम् अदृष्टस्वलक्षणसामान्यविषयम् । तद्यथा — रूपाद्युपलब्धिः करणजन्या क्रियात्वात् छिदिक्रियावदितीन्द्रियसाधकमनुमानम् । इन्द्रियत्वस्यानुमानविषयस्य स्वलक्षणं पूर्वं न

१. 'ष्टाः का', २. 'के' ग. पाठः.

प्रसिद्धामिति नास्य पूर्ववत्त्वम्। अनयोरन्वयमुखेन प्रवर्तमानत्वाद् वीतत्वम्। व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्। तदेव शेषवदनुमानम्। शिष्यत इति शेषः। स विषयतयास्त्यस्यानुमानस्येति शेषवदिति। तदुक्तं — प्रसक्तप्रतिषेधेऽन्यत्रा[1]प्रसङ्गाच्छिष्यमाणे संप्रत्ययः, तच्छेषवदनुमानमिति। तद्यथा — सर्वं कार्यं सर्वज्ञानिर्मितं, कादाचित्कत्वात्। यद्यत् सर्वज्ञनिर्मितं न भवति तत्तत् कादाचित्कमपि न भवति; यथा मायादि। न च तथेदमकादाचित्कम्। तस्मात् सर्वज्ञानिर्मितमपि न भवतीति। तत् पुनर्द्विविधं स्वार्थं परार्थं चेति। तदुक्तं —

> "परोपदेशानपेक्षं स्वार्थं स्वस्यानुमापकम्।
> परोपदे[2]शसापेक्षं परार्थमभिधीयते॥"

इति। परोपदेशः पञ्चावयवं वाक्यम्। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः पञ्चेति तार्किकाः। प्रतिज्ञाहेतूदाहरणाख्यास्त्रय इति मीमांसकाः। उदाहरणोपनयौ द्वाविति बौद्धः। तत्र प्रतिपिपादयिषया पक्षवचनं प्रतिज्ञा[3], यथाग्निमान् पर्वत इति। साधनत्वख्यापकं लिङ्गवचनं हेतुः, यथा धूमवत्त्वादिति। स त्रिविधः — अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरे[4]की चेति। तत्र पञ्चरूपोऽन्वयव्यतिरेकी। रूपाणि तु पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षाद् व्यावृत्तिरबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेति। तत्र साध्यधर्मविशिष्टो

---

१. 'त्र' ख. पाठः. २. 'कारसा', ३. 'ज्ञावचनं, य' ग. पाठः. ४. 'की। त' ख. पाठः.

धर्मी पक्षः। तत्र व्याप्यवृत्तित्वं हेतोः पक्षधर्मत्वम्। साध्यसमानधर्मा धर्मी सपक्षः। तत्र सर्वस्मिन्नेकदेशे वा हेतोर्वृत्तिः सपक्षे सत्त्वम्। साध्यव्यावृत्तधर्मा धर्मी विपक्षः। तत्र हेतोरवृत्तिर्विपक्षाद् व्यावृत्तिः। प्रमाणाविरोधिनी प्रतिज्ञातार्थे हेतोर्वृत्तिरबाधितविषयत्वम्। स्वपरपक्षसिद्धावत्रैरूप्यमसत्प्रतिपक्षत्वमिति। तद्यथा — क्षित्यादि बुद्धिमत्पूर्वं कार्यत्वाद् घटादिवदित्यादि। पक्षसपक्षवृत्तिरविद्यमानविपक्षः केवलान्वयी। तद्यथा — विवादास्पदमदृष्टादि कस्यचित् प्रत्यक्षं प्रमेयत्वात् करतलादिवदिति। पक्षवृत्तिरविद्यमानसपक्षो विपक्षाद् व्यावृत्तः केवलव्यतिरेकी। तस्योदाहरणम् अवीतानुमानमिति। तथाहि — विमतं कालादिकं मायातो न भिद्यते मायाकार्यत्वाद्, यत्तु भिद्यते न तन्मायाकार्यं, यथा पुरुषशिवौ। (न?) तथा न मायाकार्यं कालादि। तस्मान्न मायातो भिद्यते इति। एवं हेतुलक्षणोक्त्या हेत्वाभासा निराकृताः। ते चासिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः पक्षधर्मत्वादिरूपाभावाद् भवन्ति। तत्रानिश्चितपक्षवृत्तिरसिद्धः। यथा —शब्दो नित्यश्चाक्षुषत्वादित्यादि। पक्षविपक्षयोरेव वर्तमानो विरुद्धः। यथा — आकाशविशेषगुणः शब्दः प्रमेयत्वादित्यविद्यमानसपक्षः। क्षित्यादिकालान्तं नित्यं कार्यत्वादिति विद्यमानसपक्षः। पक्षत्रयवृत्तिरनैकान्तिकः। यथा — नित्यः शब्दः प्रमेयत्वादिति साध्यासाधकः। पक्ष एव वर्तमानोऽनध्यवसितः। तद्यथा — नित्या

भूः गन्धवत्त्वादिति विद्यमानसपक्षः । सर्वं क्षणिकं सत्त्वादित्यविद्यमानसपक्षः । प्रमाणबाधिते प्रतिज्ञातार्थे वर्तमानो हेतुः कालात्ययापदिष्टः । शुचि नरशिरःकपालं प्राण्यङ्गत्वात् शङ्खवदित्यागमविरुद्धः । उलूको दिवा रूपं पश्यति, चक्षुष्मत्त्वादित्यनुमानविरुद्धः[1] । रूपदर्शनाविनाभाविचेष्टाभावेन रूपदर्शनाभावानुमानादिति । अनुष्णोऽग्निः मथनजन्यत्वाद् नवनीतवदिति प्रत्यक्षविरुद्धः । स्वपरपक्षासिद्धावभिरूपो हेतुः प्रकरणसमः । तद्यथा — अनित्यः शब्दः पक्षसपक्षयोरन्यतरत्वाद् घटादिवदित्यस्य नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वाद् मायावदित्यत्रापि त्रैरूप्यसद्भावादिति । सम्यग्दृष्टान्ताभिधानमुदाहरणम् । व्याप्तिग्रहणभूमिर्दृष्टान्तः । तद्यथा — यो यो धूमवान् स सोऽग्निमान् यथा महानस इति साधर्म्योदाहरणम्, अन्वयमुखेन दृष्टान्ताभिधानत्वात् यस्त्वग्निमान्न भवति स धूमवानपि न भवति, यथा जलमिति वैधर्म्योदाहरणं, व्यतिरेकमुखेन दृष्टान्ताभिधानत्वात् । अनेनोदाहरणाभासा व्युदस्ताः । तथाच नित्यं मनः मूर्तत्वाद् यद्यन्मूर्तं तत्तन्नित्यं यथा घट इति साध्यविकलः, यथात्मेति साधनविकलः, यथा कर्मेत्युभयविकलः, यथा खपुष्पमित्याश्रयहीनः। यन्नित्यं न तन्मूर्तं यथात्मेति साध्याव्यावृत्तः, यथा घट इति साधनाव्यावृत्तः, यथा मायेत्युभयाव्यावृत्तः ।

---

१. 'द्धम् ।' ख. पाठः.

शिवतत्त्वाद् न्यूनतया मायाया मूर्तत्वम् । व्याप्तिस्तु स्वकार्यव्याप्ततयैवोच्यते । यथा खपुष्पमित्याश्रयहीनः, असौ महाराज्यं करिष्यति सोमवंशोद्भूतत्वाद् भविष्यद्राजपुत्रवदिति सन्दिग्धाश्रय इत्यादि । दृष्टान्ते प्रसिद्धव्याप्तिकस्य हेतोर्दृष्टान्तोपमानेन पक्षे व्याप्तिव्यापकं वचनमुपनयः । तथाचायं धूमवानिति साधर्म्योपनयः । न च तथा धूमवानयं पर्वत इति वैधर्म्योपनयः । उपनयानन्तरं सहेतुकं प्रतिज्ञावचनं निगमनं तस्मादग्निमानेवेति । तदुक्तं भगवता वेदव्यासेन —

"पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषवित् ।
उत्तरोत्तरवक्ता च ब्रुवतोऽपि बृहस्पतेः ॥"

इति । अन्ये तु पक्षधर्मत्वसपक्षेसत्त्वविपक्षाद्व्यावृत्त्यात्मकरूपत्रयवानन्वयव्यतिरेकी । पक्षादिलक्षणं[1] च सन्दिग्धसाध्यः पक्षः । सन्देहश्च विप्रतिपत्तेः । निश्चितसाध्यः सपक्षः । निश्चितसाध्यव्यतिरेको विपक्ष इत्यतोऽग्न्यनुष्णतासाधकस्य कृतकत्वस्य विपक्षाद्व्यावृत्तिरूपाभावेनागमकतया बाधितविषयत्वस्य विपक्षाद्व्यावृत्तावन्तर्भावः[2] । स्वपरपक्षसिद्धावेकस्य त्रैरूप्यासंभवादसत्प्रतिपक्षत्वरूपाभावः । पक्षसपक्षयोरन्यतरत्वस्य चैकस्यासंभवात् । तदुक्तं —

"यच्चानुमेयसंबन्धं प्रसिद्धं च तदन्विते ।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम् ॥

१. 'णः', २. 'वात् । स्व' क. पाठः.

विपरीतमतो यत् स्यादेकेन द्वितयेन वा।
विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीत् ॥"

इति। एवं केवलान्वयी च रूपद्वयवान् विपक्षाद्व्यावृत्तिरूपाभावात्। व्यतिरेकी च तथा, सपक्षाभावेन सपक्षे सत्त्वरूपाभावादिति मन्यन्ते इति। शब्दजन्यं सम्यग्ज्ञानमागमः। स द्विविधः— पौरुषेयवाक्यजन्योऽपौरुषेयवाक्यजन्यश्चेति। तत्र तन्त्रेतिहासपुराणमन्वादिवाक्यानि पौरुषेयाणि। वेदवाक्यान्यपौरुषेयाणीति। ननु वेदवाक्यानि पौरुषेयाणि वाक्यत्वाद् भारतादिवाक्यवदित्यनुमानात् तेषां पौरुषेयत्वसिद्धिरिति चेत्। नैवम्।

"तस्मै नूनमभिद्यवे वाचा विरूप! नित्यया"

इत्यागमेन वेदनित्यत्वसिद्धेरस्य कालात्ययापदिष्टतयाप्रामाण्यात्।

"प्रलये समनुप्राप्ते नष्टे स्थावरजङ्गमे।
एकोऽहं संस्थितो देवि! न द्वितीयोऽस्ति कुत्रचित् ॥

तस्मिन् वेदाश्च शास्त्राणि मन्त्रे पञ्चाक्षरे स्थिताः।
ते नाशं नैव सम्प्राप्ता मच्छक्त्या ह्यनुपालिताः ॥"

इति लैङ्गागमविरोधाच्चेति। न च प्रत्युच्चारणं वेदस्योत्पत्तिनाशोपलम्भाद् अनुपपन्नं तन्नित्यत्वमिति वाच्यम्। उच्चारणाया अभिव्यञ्जकत्वेन तदुभयाभावात्। तच्च

स एवायं वेद इति स एवायं स्तम्भ इतिवत् प्रत्यभिज्ञाप्रत्यक्षेण प्रागपीदानीमुपलभ्यमानस्य वेदस्य सत्त्वावगमादवगम्यते । न च प्रलयावस्थायां वेदधारणसमर्थपुरुषाभावेन वेदस्य विनाशे पुनः सर्गादौ वेदानां परमेश्वररचि(ते ? तत्वे)-नानित्यत्वमिति वाच्यम् । द्विजातीनां वेदधर्तॄणामभावेऽपि परमेश्वरस्य वेदधर्तुः सद्भावात् । तथाहि — सर्गादावुत्पन्नस्य वेदस्य यावत्प्रलयमवस्थानं वैशेषिकादिभिर्वेदानित्यत्ववादिभिरभ्युपगम्यते । ततस्तत्र न विवादः । प्रलयकाले तु सद्भावः साध्यते । तथाहि — प्रलयकालो वेदवित्पुरुषसमन्वितः कालत्वादितरकालवदिति । न च भूभूधरादिसत्त्वमपि तेनैव न्यायेनानुमातुं शक्यत्वादतिप्रसङ्ग इति वाच्यम् । भूभूधरादिशून्यकालस्य प्रलयत्वेन तस्य तद्वत्तासाधने माता मे वन्ध्येतिवत् प्रतिज्ञाविरोधप्रसङ्गात् । एकब्रह्माण्डवर्तिसकलवैदिकपुरुषविनाशेऽपि ब्रह्माण्डान्तरवर्त्यनन्तवैदिकपुरुषसद्भावाच्च वेदनित्यत्वम् । ब्रह्माण्डान्तराण्यप्येतद्वेदवन्ति ब्रह्माण्डत्वात् संप्रतिपन्नवदिति सर्वत्र वेदैकत्वम् । वेदानित्यत्वपक्षेऽनन्तशाखाविततानन्तवेदजननाशतत्कारणकल्पनायां कल्पनागौरवप्रसङ्गः । नित्यत्वे तु सिद्धस्य वेदस्य नित्यत्वमात्रकल्पनाया लाघवान्न कश्चिद् दोष इति । तथा वेदकर्तुरसम्भवाच्च न वेदपौरुषेयत्वम् । तथाहि — नेश्वरः कर्ता वेदस्य । पूर्ववेदपरित्यागे कारणाभावात् । न च पूर्वकल्पे वेदाभाव इति वाच्यम् ।

१. 'रचि' ख. ग. पाठः. २. 'दोषप्र', ३. 'द्वा' क. पाठः.

पूर्वकल्पे वेदसद्भावस्यानुमानसिद्धत्वात्। तथाहि—पूर्वः सर्वोऽपि कल्पो वेदवैदिकयुक्तः कल्पत्वादिदानीन्तनकल्पवदिति। न चेदानीन्तनकल्पवदेव भावानामद्यतनानामपि कल्पान्तरे सद्भावानुमानादतिप्रसङ्ग इति वाच्यम्। प्रमाणाविरुद्धभावसद्भावस्येष्टत्वात्। तदुक्तं भगवता मनुना—

"यथ(र्तु)ष्वृतुलिङ्गानि नानारूपाणि पर्यये।
दृश्यन्ते तानि तान्येव तथा *ब्रह्मा हरादिषु॥"

इति। तस्मादपौरुषेयो वेदराशिरिति सिद्धम्। वेदाः प्रमाणम् अनाप्तकृतशब्दत्वात् सम्प्रतिपन्नवत्। विमतं वेदाध्ययनं तद्वेदाध्ययनपूर्वकं वेदाध्ययनत्वाद् इदानीन्तनवेदाध्ययनवदिति।

उपमोपमानम्। गोसदृशो गवय इति वाक्यं तज्जनितं वा विज्ञानं यद्युपमानं, तदागम एव न प्रमाणान्तरम्। योऽयमस्य गोसदृशस्य गवयशब्दो वाचक इति संज्ञासंज्ञिसंबन्धविषयः प्रत्ययः, स चानुमानमेव। तथाहि—गोसदृशस्यास्य गवयशब्दो वाचकः, तत्र वृद्धैः प्रयुज्यमानत्वात्। यो हि शब्दो यत्र वृद्धैः प्रयुज्यते, सोऽसति वृत्त्यन्तरे तस्य वाचकः। यथा गोशब्दो गोत्वे प्रयुज्यमानस्तस्य वाचकः। तथा प्रयुज्यते चायं गवयशब्दो गोसदृशे। तस्मात् तस्य वाचक इति ज्ञानमनुमानान्न भिद्यत इति। यश्च प्रत्यक्षे गवये गोसादृश्यप्रत्ययः, सोऽक्षसंयोगजत्वात् प्रत्यक्षान्तर्भूतः। तथैव प्रत्यक्षमेव स्मर्यमाणायां गवि गवयसादृश्यज्ञानम्।

---

* 'भावा युगादिषु' इति देवताधिकरणस्थशाङ्करभाष्यपाठः।

तस्यैकतया प्रत्यक्षगम्यत्वाविरोधात्। तथाहि— भूयोवयवसामान्ययोगो जात्यन्तरवर्ती जात्यन्तरे सादृश्यमुच्यते। तस्यैकतया गवये प्रत्यक्षगम्यस्य गोस्मरणानन्तरं गवि प्रत्यक्षत्वाविरोध इति पूर्ववन्निर्विकल्पकानुभूतत्वेन स्मर्यमाणं वा गवि गवयसादृश्यमिति नोपमानवेद्यं किञ्चिदस्तीति न प्रमाणान्तरमिति। एवं जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्य प्रमाणान्तरानवगतस्य परिकल्पनात्मिकार्थापत्तिरपि न प्रमाणान्तरम्, अनुमानत्वात्। सदेव यदेकत्र नास्ति, तदन्यत्रास्ति। सन्नेवाव्यापको यदेकत्रास्ति, तदन्यत्रास्तीति स्वशरीर एव व्याप्तिग्रहणसंभवात्। तथाच देवदत्तो बहिर्देशसंबन्धी सत्त्वे सति गृहेऽविद्यमानत्वात् बहिःस्थवृक्षादिवदिति गृहाभावे लिङ्गेन बहिर्भावज्ञानमनुमानमेवेति। न च सत्त्वमात्रावेदकगृहासत्त्वावेदकप्रमाणयोः ज्योतिःशास्त्रप्रत्यक्षयोः परस्परविरोधादेकं विषयव्यवस्थयार्थापत्तिरिति वाच्यम्। अनवच्छिन्नावच्छिन्नयोः सत्त्वमात्रगृहासत्त्वयोर्विरोधाभावेनाविरोधापादनासंभवात्। नहि यत्र क्वचन सत्त्वस्य गृहासत्त्वेन विरोधः संभवति। भिन्नविषयत्वात्। न च निश्चितो गृहाभावः पाक्षिकतया सांशयिकेन गृहसत्त्वेन प्रतिक्षिप्यते, प्रबलत्वादसत्त्वस्य। न च देशसामान्येन पाक्षिकमस्य गृहसत्त्वं प्रतिक्षिपन् गृहाभावः सत्त्वमात्रं प्रतिक्षेप्तुं सांशयिकत्वं वा नेतुं शक्नोति। तस्य तत्रौदासीन्यादिति। सत्त्वमात्रगृहासत्त्वयोर्विरोधाभावादवि-

रोधापादनं[1] नार्थापत्त्या क्रियत इति न सा प्रमाणान्तरमिति। न च भावान्तरादन्योऽस्त्यभावः, यत्सिद्ध्यर्थमभावाख्यं प्रमाणमाश्रीयेत। नहि भूतलपरिणामविशेषात् कैवल्यलक्षणादन्यो घटाभावो नाम। प्रतिक्षणपरिणामिनो हि सर्वे भावा ऋते चिति[2]शक्तेः परमेश्वरादिति स परिणामभेद इन्द्रियसिद्ध इति। अथवा भवतु भावान्तराद् व्यतिरिक्तोऽभावः। तथापि प्रत्यक्षादिप्रमाणसिद्धत्वात् तत्सिद्ध्यर्थं न प्रमाणान्तरमभ्युपगन्तव्यम्। तथाहि — चक्षुर्विष्फारणान्वयव्यतिरेकानुविधानादिह भूतले घटो नास्तीत्यभावज्ञानस्यैन्द्रियकत्वम्। तथा बहिःस्थत्वेन घटादीनां गृहासत्त्वं स्वशरीरवदनुमीयते। तथा भारतपुरुषाणामभावो भारतागमेनावगम्यत इति। तस्मान्नाभावाख्यं प्रमाणान्तरमस्तीति। सम्भवस्तु खार्यां द्रोणाढकप्रस्थावगमः। स चानुमानं, खारीत्वस्य द्रोणादिव्याप्ततया तेन तदनुमानादिति। यच्चानिर्दिष्टप्रवक्तृकं प्रवादमात्रमिति होचुर्वृद्धा इत्यैतिह्यं, यथेह वटे यक्षः प्रतिवसतीत्यादि, इदं न प्रमाणान्तरम्। आप्तोक्त्यनिश्चयेन सांशयिकत्वात्। आप्तवक्तृनिश्चये त्वागम एवेति न प्रमाणान्तरमिति। चेष्टा चाभिनयः। स च समयबलेन परोक्षानुभवसाधनत्वादागम एवेति न प्रमाणान्तरमिति। एवं विरोधोऽपि। ह्रदमध्येऽग्न्यभावज्ञानं तदनुमानमेव। जलाग्न्योः परस्परविरुद्धयोरेकत्रासम्भवेनेतरेतराभावव्याप्तत्वादिति त्रीण्येव प्रमाणानीति। तदुक्तं —

---

१. 'नाद् ना', २. 'तिं' ख. पाठः.

"दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥
प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं च ॥
सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात् ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् सिद्धम् ॥"

इति । ऐहिकामुत्रिकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यं न रागाभावः । तदैहिकामुत्रिकविषयाणामनित्यत्वसातिशयत्वादिदोषदर्शनादुपजायत इति । अविघातकरणमैश्वर्यम् । तदष्टविधम् —

"अणिमा महिमा चैव लघिमा गरिमा तथा ।
ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥"

तत्राणुत्वमणिमा परमाणुवदवस्थानम् । महत्त्वं महिमा यावदिच्छं स्थूलीभावः । लघिमा लघुत्वं, यतः सूर्यमरीचीनालम्ब्य सूर्यलोकं गच्छति । गुरुत्वं गरिमा अन्यैरचाल्यत्वेनावस्थानम् । ईशित्वमीशभावः भूतभौतिकानां प्रभवादिहेतुत्वम् । वशित्वं वशीकरणभावः सर्वस्य स्वेच्छावशवर्तित्वम् । प्राप्तिः प्रापणं, येनाङ्गुल्यग्रेण स्पृशति चन्द्रमसम् । प्राकाम्यमिच्छानभिघातः, भूमौ चोन्मज्जति निमज्जति यथोदक इति । सत्यसङ्कल्पतेत्यपरे । यथास्य सङ्कल्पो भवति, तथैव भूतानि भवन्तीति । अस्मदादीनां निश्चयाः

---

१. 'श्य' क. पाठः.

प(रा ? दा)र्थानुरूपाः, योगिनां तु निश्चयानुविधायिनः प(रा ? दा)र्था इत्येतच्चतुष्कं समासतः सात्त्विकं, सत्त्वादुत्पन्नं रूपमिति । चत्वारस्तामसाश्च विपरीताः अधर्माज्ञानावैराग्यानैश्वर्याभिधाना इति । तामसास्तमस उत्पन्नाः । अधर्मोऽनभ्युदयानिःश्रेयसहेतुः । अज्ञानं ज्ञानविपर्ययः, असम्यग्ज्ञानमिति यावत् । तत् त्रिविधं — विपर्ययो विकल्पो निद्रा चेति । विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं शुक्तिकादौ रजतादिज्ञानम् । शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः । तद्यथा — शशविषाणादिशब्दश्रवणानन्तरं तदर्थविषयज्ञानमिति । जाग्रत्स्वप्नप्रत्ययाभावहेतुतमःप्रकर्षमवलम्ब्य या बुद्धिवृत्तिरुद्भवति, सा निद्रा । तदुक्तं पतञ्जलिना भगवता— "अभावप्रत्ययालम्बना निद्रा" इति सूत्रेण । अवैराग्यं च दृष्टानुश्रविकविषयरागः । अणिमादिप्रादुर्भावविरोधी बुद्धिधर्मोऽनैश्वर्यमिति । अन्ये तु परमेश्वरतत्त्वावेदकं ज्ञानं तदन्यदज्ञानमिति ब्रुवते । एतदुक्तं साङ्ख्यैः —

"धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ॥

वैराग्यात् प्रकृतिलयः संसारो राजसाद् भवति रागात् ।
ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ॥"

इति । विषयाध्यवसायरूपिणीत्यनेन बुद्धेः सद्भावश्च प्रतिपादितः । तथाहि — विषयाध्यवसायादिवृत्तेः परिदृश्यमानाया

मूलभूतं वृत्तिमद्बुद्धितत्त्वमभ्युपगन्तव्यम् । अन्यथा वृत्त्यभावप्रसङ्गादिति । तदुक्तं पारमेश्वरे—

"अथ बुद्धेर्विकासो यः स्वधर्मेणानुमीयते ।
क्षुब्धेभ्यः[1] सहसा पूर्वं गुणेभ्यो भूतगोचरा ॥
बुद्धिरध्यवसायेन भावानां जननी शुभा ।
वर्ण्यतेऽष्टगुणोपेता संविभज्य यथाक्रमम् ॥"

इत्यादि । तस्या विभागमाह—सापि त्रिविधेति । सा[2] बुद्धिस्त्रिप्रकारा । कुत इत्यत आह—गुणतः प्राक्तनकर्मानुसारेणेति । पुरुषस्य पूर्वजन्मनि कृतपुण्यापुण्यात्मककर्मानुसारेण गुणभेदादिति । तदुक्तं—"बुद्धिः कर्मानुसारिणी" इति । तथाहि—पुण्येनैकेन सात्त्विकी बुद्धिरपुण्येन तामसी मिश्रेण राजसीति । तथा जाग्रत्स्वप्नसुषुप्त्यात्मना च कर्मानुसारेण[3] गुणभेदात् त्रिविधा बुद्धिरिति वा । तथाहि—स्थूलकर्मनिमित्तं सात्त्विकी बुद्धिर्जागर्ति । सूक्ष्मकर्मवशाद् राजसी स्वप्नं गच्छति । जाग्रत्स्वप्नवृत्त्यभावहेतुभूततमःप्रकर्षमवलम्बमाना बुद्धिः सुषुप्तिमुपगच्छति । विश्रमार्थमात्मनः सर्वदैकस्वभावस्य सर्वगतस्य चिन्मात्रस्य जाग्रत्स्वप्नसुषुप्तिसाक्षिणो जाग्रदादित्रयाभावाद् बुद्धेर्विकारवतोऽवस्थात्रयवत्त्वमिति । तस्या वर्णमादित्योदयनिभम् । तदुक्तम्—

"अहङ्कारस्य बाह्येऽपि बुद्धितत्त्वं व्यवस्थितम् ।
आदित्योदयसंकाशं बोधयन्तमिवाखिलम् ॥"

---

१. 'क्षयेभ्यः' क. पाठः. २. 'सापि बु', ३. 'ण भे' ख. पाठः.

इति । तस्याः षडध्वव्याप्तिः — ठकारो वर्णः । तेजस्तेज इत्यादि द्वे पदे । तारहृदयपञ्चार्णमन्त्रः । बुद्ध्याख्यं तत्त्वम् । पैशाचाद्यष्टभुवनानि । विद्या कला ॥ ३९ ॥

इदानीमहंकारतत्त्वं निरूपयति —

स्यात् त्रिविधोऽहंकारो जीवनसंरम्भगर्वरूपोऽयम् ।
संभेदादस्य सतो विषयो व्यवहार्यतामेति ॥ ४० ॥

इति। बुद्धितत्त्वादहंकारात्मकं तत्त्वमुत्पद्यते। अहंकृतिरहङ्कारः। अहमित्येवंरूपव्यापारवानित्यर्थः। विभागमाह— त्रिविध इति । केन रूपेणेत्याशङ्क्याह— जीवनसंरम्भगर्वरूपोऽयमिति। जीवनाहङ्कारः संरम्भाहङ्कारो गर्वाहङ्कारश्चेति । तत्र जीवामीत्याकारो जीवनाहङ्कारः । अहं करोमीति संरम्भाहङ्कारः। प्रबलोऽस्मि रूपवानित्यादि गर्वाहङ्कारः । एतानि रूपाणि यस्य स तथोक्त इति । प्रमाणमाह — संभेदादित्यादि । अहङ्कारसंबन्धाच्छब्दादिविषयो व्यवहार्यतामनुभवार्हतां यातीति । तथाहि — आत्मा तावन्निर्गुणो निष्क्रियश्चिन्मात्र उदासीनस्वभावः । तस्मादसौ न शृणोति, न च पश्यति, न च वक्ति, न च करोतीत्ययमहङ्कारः श्रोत्रादिकृतश्रवणादिकं वागादिकृतवचनादिकं बुद्धिकृताध्यवसायादिकं चित्तकृतसंशयादिकं चाहं शृणोमीत्यादिभिरहं वच्मीत्यादिभिरहमध्यव(स्य?स्यामि) इत्यादिभिश्च वृत्तिभिरात्मनि साक्षिणि संबध्नाति । तेनाहङ्काराख्यं तत्त्वमभ्युपगन्तव्यम् ।

---

१. 'श्र' ग. पाठः.

अन्यथा देवदत्तकृतस्य यज्ञदत्त इव श्रोत्रादिकृतस्य श्रवणादेरात्म(नि)संबन्धाभावप्रसङ्ग इति । तदुक्तं शैवरहस्ये—

"संबन्धंप्रतिभासो ज्ञातुर्ज्ञेयेन देशकालाभ्याम् ।
सुलभोऽभिमाननामा व्यापारोऽहङ्कृतेरस्याः ॥"

इति ॥ ४ ॥

तस्यैव प्रकारान्तरेण त्रैविध्यमाह—

सात्त्विकराजसतामसभेदेन स जायते पुनस्त्रेधा ।
स च वैकारिकतैजसभूतादिकनामभिः समुच्छ्वसिति ॥

इति । सत्त्वरजस्तमोविकारतया सात्त्विकराजसतामसभेदवानहङ्कारस्त्रिविधो भवति । स पुनरहङ्कारो वैकारिकतैजसभूतादिकनामाभिस्त्रिविधो भवतीति । सत्त्वोद्रिक्तः सात्त्विको वैकारिकाख्यः। रजोद्रिक्तस्तैजसः। केचिद् वैपरीत्यमिच्छन्ति, स च तैजसवैकारिकभूतादिकेति ग्रन्थपाठश्चेत्याहुः । तमोद्रिक्तस्तामसः। स भूतादिनामेति गुणतो नामतश्च त्रैविध्यमहङ्कारस्य भवतीति ॥ ५ ॥

कार्यमाह—

तैजसतस्तत्र मनो वैकारिकतो भवन्ति चाक्षीणि ।
भूतादेस्तन्मात्राण्येषां सर्गक्रमोऽयमेतस्मात् ॥ ६ ॥

इति । एतस्मादेव त्रिविधादहङ्काराद् एषां ज्ञानकर्मेन्द्रियतन्मात्रमनसां षोडशानां सर्गः । किमात्मकान्मनस उत्पत्तिः, किंरूपादिन्द्रियाणां, कथंभूतात् तन्मात्राणामित्या-

१. 'न्धे' क. पाठः.

शङ्क्य तेषामुत्पत्तिं विभागेनाह — तैजसत इत्यादि। तैजसा-ख्यादहङ्काराद् राजसाच्चलस्वभावं मन उत्पद्यते, वैकारिकात् सात्त्विकात् प्रकाशलाघवोपेतमिन्द्रियदशकम्। भूतादेस्तामसात् तमोबहुलानां तन्मात्राणामुद्भव इति। तैजसात् सात्त्विकात् स्वच्छं लघूत्पद्यते मन इत्यन्ये। सात्त्विकसहकृताद् वैकारिकाद् राजसाद् बुद्धीन्द्रियाणामुत्पत्तिः, ज्ञानसाधनत्वात्। तामससहकृताद् वैकारिकात् कर्मेन्द्रियाणामिति। सांख्याः सात्त्विकादेवाहङ्कारादेकादशेन्द्रियाणां, तामसात् तन्मात्राणा-मुत्पत्तिं मन्यन्ते। सत्त्वतमसोर्निष्क्रियतया स्वयमुत्पादना-सामर्थ्याच्चलस्वभावेन रजसा प्रेरितयोस्तयोः कारणत्वमि-त्युभयमपि रजसा निमित्तेनोत्पद्यत इति न तु तस्योपादा-नत्वं, तत् सत्त्वतमसोरेवेति ब्रुवते। तथाहि —

"सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्॥"

इति। एषां सर्गक्रमोऽयमेतस्मादित्यनेन पुनरुक्तेन पञ्चभूतेभ्यः पञ्चानां बुद्धीन्द्रियाणामुद्भवं तार्किकाद्यभिमतं निरस्यति। तथाहि — "घ्राणरसनचक्षुस्त्वक्श्रोत्रेन्द्रियाणि भूतेभ्यः" इति न्यायसूत्रम्। 'भूतानां बाह्यैकैकेन्द्रियग्राह्यविशेषगुणव-त्त्वेन्द्रियप्रकृतित्वे साधर्म्यमि'ति प्रशस्तपादीयं वैशेषिकभाष्यं च पृथिव्यादिभ्य इन्द्रियाणां घ्राणादीनां शब्दादीनां च स-मुद्भवमाभिधत्ते। मनश्च नित्यमिति तार्किकमीमांसका आहुः।

१. 'लं म' क. पाठः.

तदेतदागमविरुद्धत्वादनुपपन्नम् । तथाहि — पारमेश्वरे तावत्,

"सत्त्वधर्मस्त्रिधा तावदहंकारस्य सुव्रत! ।
वैकारिकस्तैजसश्च भूतादिश्चेति स त्रिधा ॥
सत्त्वेनोत्कृष्टवीर्येण गर्वो वैकारिकः स्मृतः ।
रजसा भूरिसंपृक्तस्तैजसः परिकीर्तितः ॥
भूतादिस्तमसोत्कृष्टस्तेषां वक्ष्यामि वृत्तयः ।
वैकारिकोऽक्षसेनायाः कारणं योनिरुच्यते ॥
मिथुनाज्जायते गर्वान्मनश्चैवोभयात्मकम् ।
तस्माद् वैकारिकादेव गर्वात् कर्मेन्द्रियाण्यपि ॥
व्यक्तिमायान्ति संक्षोभात् सिसृक्षोः कारणात्मनः ।
भूतादेरप्यहङ्कारात् तन्मात्राणि भवन्ति हि ॥"

इत्यादि ।

शिवधर्मोत्तरे च —

"प्रधानादभवद् बुद्धिर्जगद्धेतुः शिवेच्छया ।
बुद्धेरपि च संक्षोभादहङ्कारस्त्रिधाभवत् ॥
अहङ्काराच्च सूक्ष्माणि तन्मात्राणीन्द्रियाणि च ।"

इति । अनुमानाच्च । तथाहि — विमतानीन्द्रियाणि भौतिकानि[२] न भवन्ति इन्द्रियत्वान्मनोवदिति । अनित्यं मनः इन्द्रियत्वाच्चक्षुरादिवत्, सर्वाणीन्द्रियाणि जन्यानि आत्ममूलकारणव्यतिरिक्तवस्तुत्वान्मूलकारणातिरेकिजडत्वात् सगु-

१. 'क', २. 'नि भ' ग. पाठः.

णत्वान्मूर्तत्वाद्वा घटादिवदित्याद्यनुमानादभौतिकत्वकार्यत्वसिद्धाविन्द्रियाणां कारणापेक्षायामागमबलादहङ्कारस्य कारणत्वमाश्रीयत इति। अत एव नाहङ्कारिकाणीन्द्रियाणीन्द्रियत्वान्मनोवदित्यनुमानस्य कालात्ययापदिष्टत्वात् साध्यवैकल्याच्चाप्रामाण्यमिति। तथा पृथिव्यप्तेजोवायवो गन्धरसरूपस्पर्शोपादाना न भवन्ति भूतत्वाद् व्योमवत्, व्योम च न शब्दोपादानं भूतत्वात् पृथिवीवदिति, शब्दादीन्युपादानकारणवन्ति कार्यत्वात्, कार्याणि च मूलकारणातिरि(क्त?क्तानि) जडत्वाद् घटादिवद् इत्यनुमानाद् भूतव्यतिरिक्ततदुपादानाहङ्कारसद्भावसिद्धिः। तस्य वर्णं पावकनिभम्। तदुक्तं—

"तद्बाह्ये तु भवेत् तत्त्वमहङ्काराख्यमव्ययम्।
दीप्तपावकसंकाशं भीमरूपं दुरासदम्॥"

इति अस्य षडध्वव्याप्तिः—धकारो वर्णः। अरूपेत्यादि द्वे पदे। ईशानपश्चाणौ मन्त्रौ। अहङ्काराख्यं तत्त्वम्। छगलण्डद्विरण्डौ? भुवने। प्रतिष्ठा कला॥ ६॥

अथ मनःपूर्वाणामिन्द्रियाणां स्वरूपमाह—

इच्छारूपं हि मनो व्यापारस्तस्य भवति सङ्कल्पः।
बुद्ध्याक्षाणि श्रोत्रं त्वग् दृग् जिह्वा च नासा च॥

इति। इच्छारूपं प्रार्थनारूपं, मन इति। व्यापारः वृत्तिस्तस्य मनसः सङ्कल्पः अनिर्धारिताविशेषरूपः संशयरूप इति यावत्। अनेन लक्षणमुक्तम्। सद्भावश्च संशयात्मि-

---

१. 'र्शौ' ग. पाठः.

कया वृत्त्या वृत्तिमतोऽनुमानादिति । तथा चक्षुरादिकरणसम्बन्धेष्टविषयेषु युगपज्ज्ञानानुत्पादनाच्चक्षुरादिव्यतिरिक्तं करणान्तरमस्तीत्यवगम्यते । यदि तन्न स्याद् युगपद्रूपादिज्ञानं जायेत । अतः करणान्तरमस्तीति तन्मन इति तत्सिद्धिः । तस्याणुकल्पत्वं त्वयुगपद् ज्ञानादेवावगम्यत इति विभुत्वानुमानं कौमारिलोक्तं धर्मिग्राहकप्रमाणविरुद्धत्वादप्रमाणमिति । बुद्ध्यक्षाणि बुद्धिवृत्तिसाधनानीन्द्रियाणि । कानि तानीत्यत आह — श्रोत्रं त्वग् दृग् जिह्वा च नासा चेति ॥ ७ ॥

तेषां विषयमाह —

ग्राह्यास्तेषां शब्दः स्पर्शो रूपं रसश्च गन्धश्च ।
इत्येतेषां विषयाः क्रमेण पञ्चापि पञ्चानाम् ॥ ८ ॥

इति । बुद्धीन्द्रियाणां श्रोत्रादीना पञ्चानामेते पञ्च शब्दादयो विषया यतो ग्राह्या अतस्ते विषयाः । तान् क्रमेण दर्शयति — शब्दः स्पर्शो रूपं रसश्च गन्धश्चेति ॥ ८ ॥

बुद्धीन्द्रियाणां स्वरूपं चाह —

शब्दादीनां ग्रहणं व्यापारः कीर्तितः क्रमादेषाम् ।
वाक्पाणिपादपायूपस्थं कर्मेन्द्रियाणि स्युः ॥ ९ ॥

इति । शब्द आदिर्येषां ते शब्दादयः तेषां ग्रहणं तदाकारभजनम् एषामिन्द्रियाणां व्यापारः उक्तः, तत्त्वज्ञैरित्यर्थः । क्रमादित्यन्यस्यान्यग्रहणं न संभवति । अनेन लक्षणमुक्तं प्रत्येकं

---

१. 'स्य' ग. पाठः.

श्रोत्रादीना[1]मिति परीक्षापरं चेदं वाक्यम्। तथाहि—शब्दग्रहणं करणजन्यं क्रियात्वात् छिदिक्रियावदिति श्रोत्रसद्भावसिद्धिः। एवं स्पर्शरूपरसगन्धग्रहणकरणतया त्वगादीन्द्रियसिद्धिरवगन्तव्या। तथाहि—वर्णावर्णात्मना द्विविधशब्दग्रहणं श्रोत्रेण करणेन विना नोपपद्यते। बधिरस्य तद्ग्रहणादर्शनात्। एवं शीतोष्णमृदुकठिनद्रवतीक्ष्णादिस्पर्शग्रहणं च त्वगिन्द्रियेण विना न स्यात्। त्वग्दोषदूषितस्य तदनुपलम्भात्। तथाहि—श्वेतरक्तकृष्णपीतहरितधूम्रश्यामह्रस्वदीर्घादिभे[2]दभिन्नरूपग्रहणं चक्षुः करणं विना न संभवति। अन्धस्य तद्दर्शनासंभवात्। एवं मधुराम्लतिक्तलवणकटुकषायात्मना षड्विधरसग्रहणमपि तत्प्रवर्तकरसनकरणेन विना न स्यात्। जाड्योपप्लुतरसनेन्द्रियवतस्त[3]दनवगमात्। तथा सुरभ्यसुरभ्यात्मना द्विविधगन्धग्रहणं च तत्करणनासिकाकरणं विना न संभवति। अघ्रातृ[4]त्वदूषितेन्द्रियस्य तदनुपलब्धेरिति ॥ ९ ॥

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानीति पञ्च भवन्ति। तेषां व्यापारमन्तःकरणानां विभागं चोत्तरश्लोकेनाह—

वचनादानविहरणोत्सर्गानन्दाश्च कर्मैषाम्।
अन्तःकरणं त्रिविधं बुद्धिरहंकारचेतसी चेति ॥ १० ॥

---

१. 'म्। प' ग. पाठः. २. 'दग्र' ख. पाठः. ३. 'दव' क. पाठः. ४. 'ल' ख. पाठः.

इति । एषा कर्मसाधनतया कर्मेन्द्रियाणां वचनादीनि कर्माणि । परीक्षार्थं चेदं वाक्यम् । तथाहि — शब्दोच्चारणान्यथानुपपत्त्या तत्करणभूतवागिन्द्रियसद्भावोऽवगम्यते । न च तदधिष्ठानं वागिन्द्रियमिति वाच्यम् । मूकस्यापि शब्दोच्चारणप्रसङ्गादिति । एतदिन्द्रियान्तरेष्वप्यवगन्तव्यम् । अन्यथा कौण्यपङ्गुत्वोदावर्तक्लैब्यात्मकेन्द्रियवतः आदानादिप्रसङ्गात् । तदुक्तं सांख्यैः —

"बाधिर्यं कुष्ठितान्धत्वं जडताजिघ्रता तथा ।
मूकता कौण्यपङ्गुत्वं क्लैब्योदावर्तमन्दताः ॥"

इति । तस्मादधिष्ठानातिरिक्तानामतीन्द्रियाणामिन्द्रस्यात्मनश्चिह्नत्वेनेन्द्रियशब्दवाच्यानां सद्भावः सिद्ध इति । विमतानीन्द्रियाण्यतीन्द्रियाणि इन्द्रियत्वान्मनोवदिति च तेषा-(मि ? मती)न्द्रियत्वसिद्धिरिति । आभ्यन्तरं करणमन्तःकरणं त्रिविधं केन रूपेणेत्यत आह — बुद्धिरहंकारश्चेतसी चेतीति । बुद्धिरहङ्कारो मनश्चेति । अथवा अन्तःकरणमेकैकं त्रिविधं भूतभविष्यद्वर्तमानविषयभेदात् । तदुक्तं मातङ्गे —

"यदन्तःकरणं नाम त्रिकालविषयात्मकम्[1] ।
यतोऽवसीयते तस्माच्चिरकालानुसञ्चितम् ॥
वर्तमानमतीतं च यच्चेष्यमनुमानतः ॥"

इति । तथा साङ्ख्यैश्च —

"साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्"

इति ॥ १० ॥

---

१. 'यं मतम्' ख. ग. पाठः.

बाह्यकरणभेदं तन्मात्रवृत्तिं चाह—

बुद्धीन्द्रियकर्मेन्द्रियभेदाद् बाह्यं पुनर्दशधा ।
तन्मात्रेभ्यः खपवनतेजोम्भःक्ष्मेति पञ्च भूतानि ॥ ११ ॥

इति । बाह्यं करणं दशविधं—पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणीति । अथवा अन्तःकरणं बुद्ध्यहंकारमनोरूपम् । कर्मेन्द्रियबुद्धीन्द्रियात्मकं बाह्यं च कार्यभेदात् त्रिविधं च । अन्तःकरणस्य प्राणादिवृत्त्या शरीरधारणलक्षणं, बुद्धीन्द्रियाणां प्रकाशः, कर्मेन्द्रियाणामाहरणमिति । तदुक्तं—

"करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्"

इति । मनःपूर्वाणामिन्द्रियाणां षडध्वव्याप्तिः क्रमेणोच्यते—उकारो वर्णः । ओंधूमेत्यादि द्वे पदे । तत्पुरुषपञ्चार्णौ मन्त्रौ । मनस्तत्त्वम् । माकोटाख्यं भुवनम् । निवृत्तिः कला । नकारो वर्णः । शर्वमहेश्वरौ पदे । कवचपञ्चार्णौ मन्त्रौ । श्रोत्राख्यं तत्त्वम् । मण्डलेश्वरं भुवनम् । शान्त्यतीता कला । पकारो वर्णः । महादेवेत्यादि द्वे पदे । शिखापञ्चार्णौ मन्त्रौ । त्वगात्मकं तत्त्वम् । कालञ्जरं[२] भुवनम् । शान्तिः कला । ढंकारो वर्णः । महातेजादि द्वे पदे । शिरःपञ्चार्णौ मन्त्रौ । चक्षुराख्यं तत्त्वम् । शङ्कुकर्णं भुवनम् । विद्या कला । बकारो वर्णः । मुञ्च मुञ्चेत्यादि द्वे पदे । हृदयपञ्चार्णौ मन्त्रौ । वागात्मकं तत्त्वम् । मण्डलेश्वरं भुवनम् । शान्त्यतीता कला । यकारो वर्णः । सर्वसान्निध्यकरणेत्यादि द्वे पदे । अघोरपञ्चार्णौ

---

१. 'अ' क. पाठः. २. 'ज्व', ३. 'फ', ४ 'रेत्या' ख. पाठः.

मन्त्रौ । पाण्यात्मकं तत्त्वम् । कालञ्जरं भुवनम् । शान्तिः कला । र इति वर्णः । अनर्चितेत्यादि द्वे पदे । वामदेवपञ्चार्णौ मन्त्रौ । पादात्मकं तत्त्वम् । शङ्कुकर्णं भुवनम् । विद्या कला । लकारो वर्णः । पूर्वस्थितेत्यादि द्वे पदे । सद्योजातपञ्चार्णौ मन्त्रौ । पाय्वात्मकं तत्त्वम् । स्थूलेशं भुवनम् । प्रतिष्ठा कला । वकारो वर्णः । तुरु[1] तुर्वित्यादि द्वे पदे । अस्त्रपञ्चार्णौ मन्त्रौ । उपस्थात्मकं तत्त्वम् । स्थलेश्वरं भुवनम् । निवृत्तिः कला ॥ ११ ॥

तन्मात्रेभ्य इत्यत्र कानि तन्मात्राणि तेभ्यः कथं भूतानामुत्पाद इत्यत आह—

तन्मात्राण्यविशेषाः शब्दादीनां प्रकीर्तिताः पञ्च ।
भूतानि पञ्च तेभ्यो भवन्ति तान्येकगुणवृद्ध्या ॥ १२ ॥

इति । अविशेषाः सूक्ष्माः शब्दादयः पञ्च तन्मात्राणीत्युच्यन्ते । मात्रशब्देन भूतसंश्लेषो भूतभावेन परिणामो वा व्युदस्तः । केवलाः शब्दादयः सूक्ष्मत्वेनावस्थितास्तन्मात्राणीत्यर्थः । तेभ्यस्तन्मात्रेभ्यः पञ्चभ्यः पञ्चभूतान्येकैकगुणवृद्ध्या भवन्तीति । तथाहि — शब्दतन्मात्राच्छब्दैकगुणमाकाशमुत्पद्यते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुः । उक्ततन्मात्रद्वयसहिताद् रूपतन्मात्राच्छब्दस्पर्शरूपगुणं तेजः । उक्ततन्मात्रसहिताद् रसतन्मात्राच्चतुर्गुणा आपः । शब्दस्पर्शरूपरसतन्मात्रसहिताद् गन्धतन्मात्रोपा-

१. 'रू' ग. पाठः.

दानकारणाच्छब्दस्पर्शरूपरसगन्धात्मकपञ्चगुणा पृथिवी समु त्पद्यत इति । अपरे केवलेभ्यस्तन्मात्रेभ्यः केवलानि भूतानीत्याहुः । अन्ये तु शब्दतन्मात्रादाकाशस्पर्शतन्मात्रावुत्पद्येते । स्पर्शतन्मात्राद् वायुरूपतन्मात्रौ । रूपतन्मात्रात् तेजोरसतन्मात्रौ । रसतन्मात्राज्जलगन्धतन्मात्रौ । गन्धतन्मात्रात् केवला पृथिवीति । तदुक्तं—

"तामसतो भूतादेरहंकृतेर्भवति शब्दतन्मात्रम् ।
तस्मादपि तन्मात्रादाकाशः स्पर्शतन्मात्रः ॥
रूपरसगन्धमात्रं पवनाद्यैः सह यथोत्तरं भवति ।
पूर्वस्मात् तन्मात्रात् केवलतो गन्धतः पृथिवी ॥"

इति । परे शब्दतन्मात्रादाकाशः, तद्द्वयसहितात् स्पर्शतन्मात्राद् वायुः । तत्त्रयसहिताद् रूपतन्मात्रात् तेजः, तच्चतुष्कसहिताद् रसतन्मात्रादापः, तत्पञ्चकसहिताद् गन्धतन्मात्रात् पृथिवीत्याहुः । अपरे शब्दतन्मात्रादाकाशः, तस्मात् स्पर्शतन्मात्रं, तस्माद् वायुः, तस्माद् रूपतन्मात्रं, तस्मात् तेजः, तस्माद् रसतन्मात्रं, तस्मादापः, ताभ्यो गन्धतन्मात्रं, तस्मात् पृथिवीति ब्रुवत इति । तन्मात्राणां षडध्वव्याप्तिः— णकारो वर्णः । अनादेत्यादि द्वे पदे । अघोरपञ्चार्णौ मन्त्रौ । शब्दतन्मात्रं तत्त्वम् । मण्डलेश्वरं भुवनम् । शान्त्यतीता कला । तकारो वर्णः । धूत्रयादि द्वे पदे । वामदेवपञ्चार्णौ मन्त्रौ । स्पर्शतन्मात्रं तत्त्वम् । कालञ्जरं भुवनम् । शान्त्यतीता कला । थकारो वर्णः । ओं भुव इत्यादि द्वे पदे । सद्योजातपञ्चार्णौ मन्त्रौ । रूपतन्मात्रं तत्त्वम् । शङ्कुकर्णं भुव-

नम् । विद्या कला । दकारो वर्णः । अनिधनादि द्वे पदे । अस्त्रपञ्चार्णौ मन्त्रौ । रसतन्मात्रं तत्त्वम् । स्थूलेशं भुवनम् । प्रतिष्ठा कला । धकरो वर्णः । निधनोद्भवेति पदम् । नेत्रपञ्चार्णौ मन्त्रौ । गन्धतन्मात्रं तत्त्वम् । स्थलेश्वरं भुवनम् । निवृत्तिः कलेति ॥ १२ ॥

अथ पञ्चानां भूतानां व्यापारमाह —

अवकाशव्यूहनपाचनसंग्रहधारणं क्रमादेषाम् ।
व्यापारो भूतानां व्योमादीनां समुद्दिष्टः ॥ १३ ॥

इति । अवकाशः स्थानप्रदानं व्योम्नो व्यापारः, भेदकारणत्वात् । व्यूहनं विविधवहनं वायोर्व्यापारः, पुञ्जीकरणं वा । पाचनं परिपाककरणं तेजसो व्यापारः । संग्रहः संश्लेषणमपां व्यापारः, क्लेदनं वा । धारणं सम्भरणं पृथिव्या व्यापार इति । तदुक्तं —

"व्योम्नोऽवकाशदानं व्यूहो वायोर्हविर्भुजः पाकः ।
संग्रहणमपां धारणमुर्व्याः सर्वात्मना वृत्तिः ॥"

इति । आकाशमत्र परमं भूतं, तच्छब्दगुणं, शब्दतन्मात्रादुत्पन्नत्वात् । यथा मृदुत्पन्नो घटो मृद्गुणः, कार्पासादुत्पन्नस्तन्तुः कार्पासगुणः एवं शब्दादुत्पन्न आकाशः शब्दगुण इति । तदिदं भूतमवश्याश्रयणीयम् । अन्यथा मूर्तवस्तुनो गमनागमनवृद्धिसंरोहणव्यायामादिसर्वव्यापाराभावप्रसङ्गादिति । तदुक्तं पारमेश्वरे —

---

१. 'धा', २. 'हगुण' ख. पाठः.

"आकाशं शब्दतन्मात्रादवकाशकलक्षणम् ।
व्यक्तं व्यक्तिकरं विप्र! पृथक् संस्थानसिद्धये ॥"

इति । तदेकममूर्तमूर्तघटकुम्भमठकूपाद्युपाधिभेदादनेकभेद-भिन्नम् । तस्य वर्णमनिर्देश्यं शुद्धस्फटिकसन्निभमिति । अ-परे चन्द्रमण्डलाकारं मण्डलमिति । तदुक्तं —

"तद्बाह्ये तु भवेद् व्योम भूतत्त्वे संव्यवस्थितम् ।
अप्रतर्क्यमविज्ञेयं मोक्षस्थानमिवापरम् ॥"

इति । अस्य षडध्वव्याप्तिः — शकारो वर्णः । पिङ्गपिङ्गेत्यादि द्वे पदे । नेत्रपञ्चार्णौ मन्त्रौ । आकाशात्मकं तत्त्वम् । वस्त्रा-पदाद्यष्टौ भुवनानि । शान्त्यतीता कला । नीरूपस्पर्शवान् वायुः । स शब्दस्पर्शगुणः । 'आकाशाद् वायुरि'त्यागमबलात् परमाणोरुत्पत्तिर्बाधिता । स त्रिविधः शरीरं प्राणो विषय-श्चेति । यातनादेः शरीरस्य वायवीयत्वं तदाधिक्याद्, न ता-वन्मात्रत्वात् । प्राणः शरीरस्थोऽन्तःकरणसामान्यवृत्तिरूपः । तदुक्तं —

"स्वालक्षण्या वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥"

इति । इतरो विषयवायुः । तदुक्तं मातङ्गे —

"येनाविष्टं जगत् कृत्स्नं स्फुरते बुद्धिमेति च ।
यत्र बद्धा विमानानां कोटयोऽष्टौ च विंशतिः ॥
भ्रमन्ति चक्रवत् सोऽयं वायुः प्राणभृतां वरः ।"

इति ।

"अस्याञ्जननिभं वर्णं वृत्तं षड्बिन्दुमण्डलम् ।"

तदुक्तं —

"तद्बाह्ये वायुतत्त्वं तु भिन्नाञ्जनसमप्रभम् ।
घर्घरारावमुखरं महाबलजनाकुलम् ॥"

इति । अस्य षडध्वव्याप्तिः — षकारो वर्णः । शब्दशब्देत्यादि द्वे पदे । कवचपञ्चार्णौ मन्त्रौ । वाय्वात्मकं तत्त्वम् । गयाद्यष्टौ भुवनानि । शान्तिः कला । भास्वररूपं तेजः । तद् द्विविधम् आभ्यन्तरं बाह्यं चेति । शरीरान्तर्वर्तिभुक्ताहारपाकसाधनमाभ्यन्तरम्, इतरद् बाह्यम् । तच्च द्विविधं शरीरं विषय इति । देवर्षीणां देहस्तैजसः ।

"तैजसानि शरीराणि भवन्त्यद्भुतकर्मणाम्"

इति वचनात् । इतरत् सूर्यसोमवह्निविद्युदादि । तस्य वर्णं विद्युन्निभम् । तदुक्तं —

"तेजस्तत्त्वं तु तद्बाह्ये विद्युत्कोटिसमप्रभम् ।
मेघस्तनितनिर्घोषं तेजोरूपं जनाकुलम् ॥"

इति । मण्डलं स्वस्तिकलाञ्छितं त्रिकोणम् । अस्य षडध्वव्याप्तिः — सकारो वर्णः । शिवशर्वेति पदम् । शिखापञ्चार्णौ मन्त्रौ । तैजसं तत्त्वम् । श्रीशैलाद्यष्टौ भुवनानि । विद्या कला । स्वतोद्रवा आपः शब्दस्पर्शरूपरसगुणाः । तत्र स्वकीयो रसगुणः । त्रयोऽन्ये सङ्करजाः । तदुक्तं पारमेश्वरे —

"रसः स्वाख्योऽत्र बोद्धव्यस्त्रयोऽन्ये संकरोद्भवाः"

इति । तद् द्विविधं शरीरं विषय इति । शरीरं वरुण-

---

१. 'पवत्तेजः' ग. पाठः.

लोकस्थानाम्। विषयभूतमितरद्; भोग्यत्वात्। स्फटिकवर्णं चैतत्। तदुक्तं चन्द्रज्ञाने—

"पृथिवीतत्त्वमाक्रम्य जलं दशगुणं बहिः।
ब्रह्माण्डाधारभूतं तु शुद्धस्फटिकसन्निभम्॥"

इति। अस्य षडध्वव्याप्तिः—हकारो वर्णः। सर्वेदादि[1] द्वे पदे। शिरःपञ्चार्णौ मन्त्रौ। अबात्मकं तत्त्वम्। अमरेशाद्यष्टौ भुवनानि। प्रतिष्ठा कला। गन्धवती पृथिवी, पञ्चगुणा च। तदुक्तं पारमेश्वरे—

"संक्षुब्धाद् गन्धतन्मात्राद् गुणैः पञ्चभिरन्विता।
स्वाख्योऽस्या गन्ध एवोक्तश्चत्वारोऽन्येऽनुषङ्गजाः॥
सारं तावत् परा काष्ठा नखदन्तास्थिजातयः[2]।"

इत्यादि। सा चेयं शरीरं विषय इति द्विविधा। शरीरं च स्थावरजङ्गमात्मना द्विविधम्। स्थावरं तृणादिवृक्षान्तम्। जङ्गमं चतुर्विधं जरायुजमण्डजं स्वेदजमयोनिजं चेति। मनुष्यपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्। यूकमत्कुणपतङ्गादीनां स्वेदजम्। भुवनेशदेवर्षीणामयोनिजं चेति। ब्रह्माण्डतदन्तर्वर्तिसप्तद्वीपपातालाष्टाविंशतिकोटिनरकतावत्संख्यविमानादयः पुराणशतेतिहाससिद्धा विषयाः, भोग्यत्वादिति। अण्डात्मकं क्षितितत्त्वं शतकोटियोजनविस्तृतम्। तदुक्तं शैवरहस्ये—

"पार्थिवमन्तिमतत्त्वं ब्रह्माण्डात्मकमखण्डमपि तावत्।
विस्तारायामाभ्यामुक्तं शतकोटियोजनम्"

१. 'र्वादि', २. 'यतः।' ग. पाठः.

इति । मतङ्गपारमेश्वरे च —

"एवं कोटिशतं पूर्णं पार्थिवं तत्त्वमत्र तु ।
अस्माद् दशगुणं तोयं तोयादग्निस्ततोऽनिलः ॥
वायोः खं खादहङ्कारस्तस्माच्च परतो महान् ।
महतः परतो ज्ञेयं गुणानां त्रितयं मुने! ॥
गुणत्रयात् प्रधानाख्यं तत्त्वं दशगुणोत्तरम् ।
शतोत्तरगुणानि स्युर्मायान्तान्यपि रागतः ॥
सहस्रवृद्धं विद्याख्यं लक्षमेशं ततस्ततः ।
कोट्या विवर्धितं[1] भूयः शिवतत्त्वं प्रकीर्तितम् ॥
अनन्तरमनन्तं स्यादप्रमेयं च शाश्वतम् ।"

इति । एतत् क्षितितत्त्वं स्वर्णनिभम् । तदुक्तं चन्द्रज्ञाने —

"सौवर्णं पृथिवीतत्त्वं सूर्यकोटिसमप्रभम् ।
कुक्कुटाण्डनिभं चैतद् ब्रह्माण्डं परिकीर्तितम् ॥"

इति । चतुरश्रं वज्रलाञ्छितं चन्द्रमण्डलम् ।

"ब्रह्माद्या देवता ज्ञेयाः क्ष्मादीनां पञ्च वै क्रमात् ।
शिवादिपृथिव्यन्तेषु तत्त्वेषु सकलेष्वपि ॥
भुवनानि चतुर्विंशत्यधिकं तु शतद्वयम् ।"

अस्याः षडध्वव्याप्तिः — क्षकारो वर्णः । शिवायों नमो[2] नम इति पदम् । हृदयपञ्चार्णौ मन्त्रौ । पार्थिवं तत्त्वम् । कालाग्न्यादिभद्रकाल्यन्तान्यष्टोत्तरशतं भुवनानि । निवृत्तिः कला इति ॥ १३ ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायामशुद्धवर्गविनिर्णयः
चतुर्थः परिच्छेदः ।

---

१. 'वि', २. 'नम' ख. पाठः.

अथ पञ्चमः परिच्छेदः ।

अथैवं गुणसाम्यात्मकात् प्रधानादुत्पन्नानि त्रयोविंशतितत्त्वानि कार्यकारणात्मना द्विविधानि । तत्र तन्मात्रापञ्चकभूतपञ्चकात्मना दशविधं कार्यम् । बाह्याभ्यन्तरभेदेन त्रयोदशविधं कारणम् । तयोर्विनियोगं[1] दर्शयति —

कार्यमिदं दशधा यत् तत् करणैः कार्यते समाविश्य ।
करणान्यसमर्थत्वात् कार्यं संश्रित्य चेष्टन्ते ॥ १ ॥

इति । अयमभिप्रायः — दशविधं यत् कार्यं तत् करणैः कार्यते स्वीक्रियते गृह्यत इति यावत् । कार्यं शरीरं सूक्ष्मस्थूलात्मना दशविधम् । समाविश्य संश्रित्य । आश्रयं विना तेषां चेष्टितुमशक्यत्वादित्यर्थः । अथवा कार्यं विषयम्(?) । दशविधमिदम् । तत् करणैः विषयीक्रियते । समाविश्य सम्बध्येति ॥ १ ॥

तदेवं षट्त्रिंशत्तत्त्वानां स्वरूपमभिधाय साम्प्रतं शुद्धानीत्यादिना सूचितं शुद्धत्वं शुद्धाशुद्धत्वमशुद्धत्वं च प्रतिपादयितुं तद्धेतुमाह —

पञ्चानामाद्यानां चिद्रूपतयान्वयः परेषां तु ।
मायाद्यानां द्वेधा सप्तानां कीर्तितः शैवे ॥ २ ॥

अव्यक्तप्रभृतीनां गुणैस्तु सुखदुःखमोहरूपतया ।
अन्वय इह निखिलानां दशके ह्यन्ते विशेषोऽयम् ॥ ३ ॥

इति । अयमभिप्रायः — एकजातिसमावेशोऽन्वयः समानरूपत्वम् ऐकात्म्यमिति यावत् । तत्र पञ्चानामाद्यानां

---

१. 'योर्योगं' ख. पाठः.

शिवशक्तिसदाशिवेश्वरविद्यातत्त्वानां चिद्रूपतयान्वयः । तेन कारणेन तेषां शुद्धत्वं, ज्ञानरूपस्याज्ञानमलसम्बन्धासंभवात् । मायाकालनियतिकलाविद्यारागपुरुषाणां सप्तानां द्वेधा चिदचिद्रूपतयान्वयः[1] । चिदनुविद्धाचिद्रूपत्वाद् मायादीनां पुरुषव्यतिरिक्तानां द्वेधा समन्वयः । पुरुषस्य[2] चित्स्वभावस्योपाधिकृताचिद्रूपत्वादिति । यथा जपासन्निधानात् स्वतः शुद्धस्य स्फटिकस्य रागः, तथा पुरुषस्याप्युपाधिधर्माध्यारोपादचिद्रूपत्वमिति । तेन सप्तानां मायादीनां शुद्धाशुद्धत्वमिति । अव्यक्तादीनां बाह्यतया चित्संबन्धरहितानां सुखदुःखमोहरूपत्वेन गुणैरन्वयः । तेन तेषां केवलाशुद्धत्वमिति ॥ ३ ॥

अन्ते दशके भूततन्मात्रात्मके वक्ष्यमाणो(यं?यो) विशेषः स किंलक्षण इत्यत आह —

शब्दादेर्गुणसाम्ये तुल्यत्वेनान्वयोऽत्र विज्ञेयः ।
अङ्गाङ्गिभावविहितो भवति विशेषस्तु केषाञ्चित् ॥ ४ ॥

इति । शब्दादीनां[3] सगुणत्वसाम्ये सत्यप्यसमतया सम्बन्धो वेदितव्यः । अङ्गाङ्गिभावः कार्यकारणभावः, तेन विहितः प्रतिपन्नो भावसर्गाख्यो विशेषः केषांचित् कार्यरूपाणां कालाद्यवन्यन्तानां विज्ञेय इति । कार्याणां स्वसाधारणकारणेषु सत्त्वं भावसर्गः । तदुक्तं शैवरहस्ये —

"प्रातिस्विकेषु हेतुषु तत्तत्त्वात्मकस्य सूक्ष्मस्य ।
कार्यस्यावस्थानं भावः सत्कार्यवादिमते ॥"

---

१. 'पान्व', २. 'स्य तु चि', ३. 'शब्दगु' ख. पाठः.

इति । सोऽयं भावसर्गः कार्यकारणभावेनावगम्यते । तथाहि — कार्यकारणभावसंबन्धो नासति संबन्ध्यन्तरे कार्ये सम्भवतीत्यसतः खरविषाणादेरदर्शनात् । विमतानि कार्याणि कारणेषु सन्त्येव, उत्पत्तिमत्त्वात् । यत् कारणेष्वविद्यमानं न तदुत्पत्तिमत् यथा खरविषाणम् । नच तथैतानि नोत्पत्तिमन्ति । तस्मात् कारणेषु सन्त्येव इति । तथा उपादानकारणस्वीकाराच्च । यदि तिलेषु तैलं न स्यात्, तर्हि तैलार्थिनः सिकतेष्विव तिलेष्वपि स्वीकारो न स्यात् । न तदस्तीति तिलेषु तैलसद्भावसिद्धिः । एतस्मादेव कारणात् सर्वसद्भावाच्च सदेव कार्यम् । यदि कारणेष्वसत् कार्यं जायेत, तर्हि तस्मादेवाखिलकार्यसंभवप्रसङ्गः, असत्त्वस्य सर्वत्राविशेषात् । न च तदस्तीति सदेवोत्पद्यत इति । शक्तात् कारणाच्छक्यकार्यजननाच्च । यदि कारणेष्वविद्यमानं कार्यं जायेत, तर्ह्यशक्तादपि तदुद्भवप्रसङ्गः, असत्त्वे शक्तिकल्पनावैयर्थ्यात् । तथा शक्तेः कार्यसूक्ष्मावस्थारूपत्वाच्च सत् कार्यम् । तथा यद्यसत्कार्यमशक्यमपि तदा कार्यं जायेत, कारणस्य शक्तत्वात् न चासति कार्ये तत्रैव शक्तिरितिवक्तुं न शक्यते, असत्त्वेनाविशेषादिति । कारणत्वाच्च सत् कार्यम् । यदि कार्यं कारणे न स्यात् तदास्य कारणत्वमपि न स्याद् इतरसाधारण्यात् । तद् दृष्टमतः सत् कार्यमिति । तदुक्तम् —

"असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥"

---

१. 'क' ख. पाठः.

इति । नच सत्कार्यवादे कारणवैयर्थ्यप्रसङ्ग इति वाच्यम् । कारणानामभिव्यक्त्यर्थत्वात् । यथावघातदोहनापीडनैः तण्डुलक्षीरतैलानामुत्पत्तिः, तथा कालाद्यवन्यन्ततत्त्वानां तद्विकारभूतघटादीनां चोद्भव इति । विनाशश्च तेषां तिरोभाव एव, नासत्त्वमिति । नचाभिव्यक्तेरभिव्यक्त्यन्तराभ्युपगमेऽनवस्थेति वाच्यम् । उत्पत्तेरपि समानत्वात् । तथा पटोत्पत्तिः स्वकारणसमवायः स्वसत्तासमवायो वा नोत्पद्यते । तथापि तदर्थानि कारकाणि व्यापार्यन्ते । एवं सत एव घटादेः स्वत एवाविर्भावाय कारणापेक्षेति युक्तम् । तदुक्तं भगवता विष्णुना —

"नासतो विद्यते भावो नाभावो विद्यते सतः"

इति । श्रीविष्णुपुराणे च —

"तदेतदक्षयं नित्यं जगन्मु[2]निवराखिलम् ।
आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥"

इति । अथवा अङ्गाङ्गिभावविहितः कल्पितो विशेषः, हेतुमत्त्वान्नित्यत्वात् । व्यापित्वसत्क्रियत्वानेकत्वाश्रितत्वलिङ्गत्वसावयवत्वपरतन्त्रत्वादिर्धर्मैः[3] कालाद्यवन्यन्तानां व्यक्तानां विद्यत इति त्रिगुणत्वाविवेकित्वविषयत्वसामान्यत्वाचेतनत्वप्रसैवधर्मित्वा(द्य ? न्य)व्यक्ताख्यस्य मायातत्त्वस्यापि सन्ति । चिन्मात्रस्य शिवस्य पुंसो हेतुमत्त्वादिकं त्रिगुणत्वादिकं च

---

१. 'द्या त' ग. पाठः. २. 'गन्मुनि' ख. पाठः. ३. 'वर्गः का', ४. 'सिद्धिध' क. पाठः.

नास्ति । तयोः कार्यकारणभावविहितयोः कार्यकारणत्वशून्ये पुरुषेऽसंभवादिति केषांचिदेवायं धर्म इति । तदुक्तं—

"हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥
त्रिगुणमविवेकिविषयं सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥"

इति । अथवा अङ्गमचेतनं चेतनार्थत्वात् । तस्याङ्गी चेतनः शेषित्वात् तस्य । तयोर्भावः संबन्धः । तद्विपरीतो विशेषः इतरेतराध्यासोऽङ्गाङ्गिभावविहितो विशेष इति । तदुक्तं—

"तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥"

इति । अथवा अङ्गाङ्गिभावः प्रधानाप्रधानभावः । बुद्धिः प्रधानभूता, पुरुषस्या[1]तिसन्निकृष्टत्वात् । तस्यास्तेनाङ्गित्वम् । बाह्येन्द्रियाण्यङ्गानि अप्रधानानि, तत्साध्यत्वात् । तयोर्भावविहितो विशेषः केषांचित् कारणानामस्तीति । तदुक्तम्—

"एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषात् ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥"
सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् ॥"

इति । तस्मादेव तत्त्वानामुत्पत्तिरिति ॥ ४ ॥

एवं तत्त्वानां सृष्टिक्रमं स्थितिं चोक्त्वा संहारक्रममाह—

---

१. 'पि' ग. पाठः.

तत्त्वानां स्थितिरेषा कथिता सृष्टिक्रमेण सर्वेषाम् ।
प्रतिलोमं परिणामान्मायायां तानि लीयन्ते ॥ ५ ॥

इति । एतेषां तत्त्वानामुक्तेन प्रकारेण सृष्टिः स्वे स्वे कारणे स्थितिश्च कथिता । परिणामप्रतिलोमेन मायायां तानि स्वे स्वे कारणे लयं प्राप्य लीयन्त इति ॥ ५ ॥

मायायाः परस्ताद् यानि तत्त्वानि तेषां कुत्र लय इत्याशङ्क्याह—

मायायाः परतोऽध्वा शुद्धः शक्तौ निलीयते सकलः ।
सर्वात्मनि सापि शिवे तिष्ठत्यविभागमापन्ना ॥ ६ ॥

इति । मायायाः परतो यस्तत्त्वाध्वा शुद्धाख्यः, स सर्वोऽपि शक्तितत्त्वे लयं याति । सा शक्तिः शिवेनैक्यं प्राप्य तिष्ठति । निलीयत इति, "आनीदवातं स्वधया तदेकमि"ति श्रुतेस्तदवगमात् ॥ ६ ॥

ननु संहारदशायां सकलस्य विनाशेन पुनरुत्पादासंभव इत्याशङ्क्याह—

माया पुरुषः शिव इत्येतत् त्रितयं महार्थसंहारे ।
अवशिष्यते पुनस्तत् प्रवर्तते पूर्ववत् सृष्टौ ॥ ७ ॥

इति । महार्थानां कालाद्यवन्यन्ततत्त्वानां शुद्धानां च विद्येशसदाशिवानां संहारे मायापुरुषशिवानां जगत्कारणानां सद्भावात् पुनरपि जगदुत्पत्तिः संभवत्येव पूर्ववदिति ॥ ७ ॥

ननु तर्हि किं प्रलयेनेत्याशङ्क्याह—

संसारे खिन्नानां सर्वेषां प्राणिनां प्रभुः कृपया ।
कुरुते महार्थसंहृतिमेतेषामेव विश्रान्त्यै ॥ ८ ॥

इति । अनवरतमुपजायमानशरीरेन्द्रियविषयसंपर्कजातसुखदुःखानुभवव्यापारसञ्जातश्रमाणां प्राणिनां विश्रान्त्यर्थं करुणानुन्नहृदयः प्रभुर्महार्थसंहारं करोतीति । तदुक्तं—

"कार्यव्यासक्तचित्तानां विश्रान्त्यै रजनी यथा ।
संहारं भवखिन्नानां कृपया कुरुते शिवः ॥"

इति ॥ ८ ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायां सामान्यवादः

पञ्चमः परिच्छेदः ।

अथ षष्ठः परिच्छेदः ।

अथ तर्हि पुनः सर्गकारणमयुक्तं, विश्रामस्यैव पुरुषार्थत्वादित्याशङ्क्याह —

कर्मविपाचनहताः पशुदयया पुनरपीह परमेशः ।
सृष्टिं विधाय कर्माण्येवं पाचयति देहभृताम् ॥ १ ॥

इति । अयमभिप्रायः — निश्शेषदुःखनिवृत्तिनित्यनिरातिशयानन्दात्मकापवर्गविहीनान् पशुतयानधिगतपुरुषार्थान् कर्मबद्धान् दयार्हान् पशूनवलोकयन् भगवान् भोगेन कर्मबन्धविनिवृत्तये तत्साधनदेहेन्द्रियविषयसृष्टिं विधत्ते । तेषां कर्मबन्धविनिवृत्तिश्च मोक्षार्थेति मोक्षार्था सृष्टिरुपपन्नेत्यर्थः ॥ १ ॥

ननु केन तर्हि कर्मपाकः, कथं वा मोक्षसंभव इत्यत आह —

भोगेन कर्मपाकं विधाय दीक्षां शिवः शक्त्या ।
मोचयति पशूनखिलान् करुणैकनिधिः सदा शंभुः ॥ २ ॥

---

१. 'हा' ख. पाठः.

इति । अयमाशयः— भोगेन कर्मणः पाकं विनाशं कुर्वन् भगवान् कालं प्रतीक्षमाणः कर्मसाम्ये सति शक्तिर्मोचिकां ? पाचयित्वाचार्यो भूत्वा दीक्षां विधायापवर्गार्हान् पशूनखिलान् सर्वदा सदा परमकारुणिकः शंभुर्मोचयतीति । ननु न मोक्षाख्यः[1] पुरुषार्थोऽस्ति, नापि स्वर्गाख्यः, तयोः सद्भावे प्रमाणाभावात् । न चानुमानागमाभ्यां तयोः सद्भावसिद्धिरिति वाच्यम् । अनुमानागमयोरप्रामाण्यात् । तत्रानुमानस्याप्रामाण्यं व्याप्तिग्रहणसापेक्षस्यानुमानस्य तदसंभवात् । स च देशान्तरकालान्तरगततयानध्यक्षयोः साध्यसाधनयोः, साहित्यनियमात्मकस्याविनाभावस्याध्यक्षतो ग्रहणासंभवात् । नचानुमानात् तदविनाभावग्रहणमिति वाच्यम् । अन्योन्याश्रयप्रसङ्गाद्, व्याप्तिग्रहणे सत्यनुमानप्रवृत्तिः, अनुमानप्रवृत्तौ व्याप्तिग्रहणमिति । नचानुमानान्तरेण व्याप्तिग्रहणम् । अनवस्थाप्रसङ्गात् । नचागमाद् व्याप्तिग्रहणम् । तस्य सन्दिग्धत्वात् तदनुपलम्भाच्चेति । नचागृहीताविनाभावात् साधनात् साध्यसिद्धिरिति वाच्यम् । अतिप्रसङ्गात् । तस्मात् प्रत्यक्षमेव प्रमाणम् । तच्च स्वर्गापवर्गौ नावगमयतीति काम एव मुख्यः पुरुषार्थः, अर्थश्च तत्साधनत्वादिति । तदुक्तं— "वृत्तिसाध्या प्रीतिः पुरुषार्थः, स काम एव नान्यो मोक्षादिः, दृष्टहान्यदृष्टकल्पनाप्रसङ्गादि"ति । तथा पृथिव्यप्तेजोवायव एव तत्त्वानि, शरीरेन्द्रियविषयाणां तत्समुदायरूपतया तत्त्वान्तराभावात् । नच ज्ञानं तत्त्वान्तरम् । तस्य

1. 'ख्यं' ग. पाठः.

रजनीचूर्णसंबन्धादुपजायमानरागवद् भूतसमवायजन्यतया तद्धर्मत्वनिश्चयादिति चार्वाकः। तदयुक्तम्। अनुमानागमाप्रामाण्ये सन्दिग्धं विपर्यस्तं वा प्रतिपाद्यं प्राति प्रतिपादकस्य शब्दप्रयोगासंभवप्रसङ्गात्। तथाहि — अस्याज्ञानं सन्देहो विपर्यासो वा विद्यत इति प्रतिपाद्यशब्दादिना लिङ्गेनानुमाय मयोच्चारितेन शब्देनास्य यथार्थप्रतिपत्तिर्भविष्यति। सा तदज्ञानादिकं निर्णुदस्यतीत्याद्यनुमानपूर्वको हि परं प्रतिपाद्यं प्राति प्रतिपादकस्य शब्दप्रयोगः। अतत्पूर्वकत्वे शब्दप्रयोक्तुरुन्मत्तवदुपेक्षणीयताप्रसङ्गेन च परगताज्ञानसन्देहविपर्यासाः प्रत्यक्षतोऽवगन्तुं शक्यन्ते। अतोऽनिच्छतापि चार्वाकेणानुमानस्य चागमस्य च प्रामाण्यमभ्युपेतव्यम्। शब्दस्याप्रमासाधकत्वे प्रयोगासंभवप्रसङ्गात्। न च व्याप्तिग्रहणासंभवादनुमानाप्रामाण्यम्। सामान्योपग्राहकवशादखिलव्यक्तिषु संबन्धग्रहणवत् तदुपपत्तेः[1]। तथाहि—व्याप्तिग्रहणवेलायामल्पत्वादिविशेषं परित्यज्य धूमजातीयमग्निजातीयं न व्यभिचरतीति सामान्योपग्राहकवशादजातातिवृत्तप्रत्युत्पन्नाखिलव्यक्तीनां तत्तज्जातीयतया तथा व्याप्तिग्रहणे व्याप्तेर्गृहीतत्वान्न व्याप्तिग्रहणासंभव इति। सामान्ययोरेव व्याप्तिग्रहणम्, अधिकरणसिद्धान्तन्यायेन विशेषसिद्धेरिति। तदपास्तम्।

"विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात्।
तद्वतोऽनुपपन्नत्वाद् अनुमानकथा कुतः॥"

इति। यतो व्याप्तिग्रहणादि[2]संभवस्योक्तत्वात्। तथा भोज-

१. 'त्पत्तेः', २. 'णसं' ग. पाठः.

नादिसर्वक्रियासंभवश्च । तासामनुमानपूर्वकत्वात् । किञ्च, अव-
गताविनाभावस्य पुरुषस्य धूमदर्शनादग्निज्ञानमुपलभ्यते । तत्
किंरूपमास्थेयम् । न तावद् विपर्ययरूपम् । बाधकाभावात्, प्र-
त्यक्षस(म्भा[1]?म्भ)वाच्च । नापि विकल्परूपम् । "शब्दज्ञानानुपाती
वस्तुशून्यो विकल्प" इत्युक्ततल्लक्षणाभावात् । नापि निद्रा ।
सुषुप्त्यभावात् । न च स्मृतिरूपम् । धूमादिसंभवसंस्कारमात्रज-
न्यत्वा[2]भावादिदन्तया भासमानत्वात् तथाविधपूर्वानुभवाभा-
वाच्चेति । नापि संशयरूपम् । अनवधारणज्ञानं संशय इत्यु-
क्तसंशयलक्षणाभावात् । तस्मादेतज्ज्ञानं प्रमाणमेव । न च
तत् प्रत्यक्षम् । अर्थेन्द्रियसंप्रयोगाजन्यत्वात् । न चाग्नेरर्थस्य
चक्षुरादिना सम्प्रयोगोऽस्ति, आवृतत्वाद् इत्यग्निज्ञानकारणधू-
मज्ञाननिष्पादनार्थं चक्षुर्विज्ञानमग्निज्ञानार्थम् । स्वर्गादिज्ञा-
नकारणशब्दज्ञानार्थश्रोत्रव्यापारवदिति । न चानुमितानुमा-
नादौ चक्षुराद्यपेक्षेति प्रमाणान्तरमेवानुमानाख्यमिति सिद्धम-
नुमानमिति । आगमप्रामाण्यं च पूर्वमुपवर्णितमित्यलमातिप्र-
सङ्गेन । तथाहि — शरीरेन्द्रियै[3]र्वृत्तिसङ्घातः परार्थः भोग-
साधनत्वात्, भोगसाधनं च जडत्वात्, जडं च कार्यत्वात्,
गृहक्षेत्रादिवदिति भूतव्यतिरिक्तः पर आत्मा सिद्धः । तस्य
नित्यत्वं, शरीरनाशे(त्य?ऽप्य)विनाशात् । स च जातिस्मृत्या-
दिनावगम्यते । तस्य मोक्षो बद्धत्वात् । अतो मोक्षस्य कादा-
चित्कतया कारणापेक्षा । कारणं च हिंसालक्षणधर्माधर्मसंयुताद्

---

१. 'म्पादाच्च' ग. पाठः. २. 'सम्भवा' ख. पाठः. ३. 'यस' ग. पाठः.

"अहिंस्यदेहाद्युन्मूतिर्मोक्षमाहुर्दिगम्बराः"

इति। तथाहि — नित्य(भा?ता)यां ग्रह अनित्यत्वे च द्वेष इत्यु-भयपरिहारार्थानेकान्तभावना। तथाहि — घटादिः मृदादि-रूपेण नित्यः, सर्वावस्थासूपलम्भात्। घटादिरूपतया अनित्यः, तदपायात्। एवं स्वदेशकालकारणाधारतया सत्त्वमर्थानामन्य-देशादिष्वसत्त्वं, स्वकार्ये कर्तृत्वं कार्यान्तरे चाकर्तृत्वं, स्वशब्दे-नाभिधेयत्वम्, अन्यशब्देनानभिधेयत्वमित्याद्यूह्यमर्थानामने-कान्तत्वमिति दिगम्बराः। तदिदमनुपपन्नम्। अनेकान्तभाव-नायां मिथ्यारूप[1]तयापवर्गसाधनत्वासंभवात्। तच्च स्वदेशादिषु सत्त्वादिनियत[2]रूपस्यैवोपलम्भात्। तथा घटादेश्च कार्यस्य नित्यत्वान्मृदादेः कारणस्य च नियमेन नित्यत्वाच्च नोभया-त्मकत्वम्। एवं स्वशब्देनाभिधेयत्वमेवान्यशब्देन चाभिधे-यत्वमेवेति नानेकान्तत्वमिति। या चेयमुभयरूपता प्रोक्ता तत्र विवादः। इतरेतराभावाभ्युपगमेनास्माभिरप्यभ्युपगत-त्वात्। यदि च स्वदेशादिष्वप्यसत्त्वादिकं स्यात्, तदा स्या-दर्थानामनेकान्तता। न च तदस्ति। तस्मान्नानेकान्तत्वम-र्थानामिति मिथ्याभूतत्वान्नापवर्गकारणमनेकान्तज्ञानमिति। न चानेकान्तताभावनावशाद् विशिष्टप्रदेशे अक्षयशरीरादि-प्राप्तौ प्रमाणमस्ति। न च तेषामागमः प्रमाणम्। तस्य प्रमाण-मूलत्वाभावात्। न च प्रत्यक्षानुमाननित्यागमा मूलानामानि-त्यागमा[3]नु(?)शब्दानां प्रामाण्यं संभवतीत्युक्तम्। न च

---

१. 'कार्यांप' ग. पाठः. २. 'म' ख. पाठः ३. 'माश्च' ग. पाठः.

शरीरेन्द्रियविषयाणां कार्याणां नित्यत्वं संभवति । अतिप्रसङ्गात् । यच्च शरीरपरिमितस्यात्मनः शरीरनाशे नक्षत्रादिवदवस्थानं निःश्रेयसमित्यार्हतैकदेशीयैरुक्तं, तदपि न चतुरश्रम् । देहपरिमितस्यात्मनो देहवन्मूर्ततयानित्यत्वप्रसङ्गात् । तथा गजशरीरावस्थितस्य मशकशररिप्रवेशे मृदङ्गपिहितप्रदीपप्रभाया घटपिधान इव सङ्कोचविकासाश्रयणेन परिणामित्वप्रसङ्गः । तस्माद् रूपरसगन्धस्पर्शशब्दज्ञानात्मकेषु षट्पदार्थेषु यद् दुःखसमुदायनिरोधमार्गाख्यं पदार्थचतुष्कं तस्मिन् क्षणिकादिभावनापवर्गकारणं, शुद्धचित्तसन्तानोत्पत्तिरपवर्ग इति सौगताः । दुःखं रूपादिस्कन्धपञ्चकम् । तच्च रूपस्कन्धो वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्कन्धो विज्ञानस्कन्धश्चेति स्कन्धपञ्चकम् । तत्र वर्णगन्धरसस्पर्शात्मना चतुर्विधो रूपस्कन्धः । सुखा वेदना दुःखा वेदना मध्यमा वेदनेति त्रिविधो वेदनास्कन्धः । चक्षुःसंज्ञा जिह्वासंज्ञा श्रोत्रसंज्ञा घ्राणसंज्ञा स्पर्शसंज्ञेति षट्प्रकारः संज्ञास्कन्धः । संस्कारस्कन्धो द्विप्रकारः कुशलाकुशलभेदात् । तत्राकुशलो दशविधो मनोवाक्कायभेदैः । तत्र मानसा मिथ्यादर्शनाभिलाषप्रद्वेषास्त्रयः । वाचिका अनृतवचनपैशुन्यपरानिन्दाविप्रलम्भवचनानि चत्वारि । कायिका हिंसापरस्वहरणमैथुनयोगास्त्रयः । इ(ति ?-त्य)कुशलाः । कुशलाश्च दश विपरीताः । एवं संस्कारस्कन्धो विंशतिप्रकारः । चक्षुर्विज्ञानं श्रोत्रविज्ञानं घ्राणविज्ञानं स्पर्शविज्ञानं जिह्वाविज्ञानं मनोविज्ञानं चेति षट्प्रकारो विज्ञानस्कन्धः । इत्येष दुःखकारणत्वात् दुःखमिश्रत्वात् सुखमपि

दुःखम् । तस्य कारणं समुदायः । तयोर्निरोधो विनाशः, तस्योपायो मार्गः । क्षणिकादिभावेनैष क्षणिकमिति भावनावशात् (प्रा ? रा)गादिनिवृत्तिः । ममेदमिति सम्बन्धाभावात् । तथा निरात्मकभावनातश्च रागादिनिवृत्तिः, स्वपरसम्बन्धाभावात् । एवं सर्वं शून्यमिति भावनया रागादिनिवृत्तिः, असत्त्वात् । नहि गगनकुसुमवन्ध्यासुतादौ रागादिसम्भव इति शुद्धचित्तसन्तत्युद्भवोपपत्तिरिति वैभाषिकसौत्रान्तिकज्ञाना[1]द्वैतवादिनो बौद्धाः । शुद्धचित्तसन्ततेरपि विनाशोऽपवर्ग इति शून्यवादिनः । तदिदमनुपपन्नम् । क्षणिकादिभावनानां मिथ्यारूपतया निःश्रेयससाधनत्वासंभवात् । न च सर्वे भावाः क्षणिकाः सत्त्वाद् विज्ञानवदित्यनुमानात् पदार्थो(नां) रूपरसगन्धस्पर्शविज्ञानानां क्षणिकत्वसिद्धेः क्षणिकत्वभावनाया न मिथ्यात्वमिति वाच्यम् । तस्य[2]ाग्न्यनुष्णतासा(ध)ककृतकत्वानुमानवत् स एवायं घट इत्यादिप्रत्यक्षबाधया प्रामाण्यात् । न च स एवायं नखः, त एवामी केशा इत्यादिप्रत्यभिज्ञावदस्यापि न प्रामाण्यमिति वाच्यम् । अस्य बाधकाभावात् । न चानेनैवानुमानेनास्य बाध इति वाच्यम् । अनुमानस्य प्रत्यक्षमूलस्य स्वमूलबाधकत्वासम्भवात् । न चा[3]नुष्णतासाधकेनोष्णताग्राहिप्रत्यक्षं बाध्यत इति । तथा विज्ञानस्य त्रिक्षणस्थायितया [4]क्षणिकत्वाभावात् साध्यविकलो दृष्टान्त इति । नन्वक्षणिकस्यार्थक्रियाकारित्वलक्षणसत्त्वासंभवादुपलभ्यमानं

१. 'म्बन्ध इ' क. पाठः. २. 'ह्य' ख. पाठः. ३. 'ब्रा', ४. 'बाधक' ग. पाठः.

इति । अयमर्थः — शिवाद्यवनिपर्यन्तानां निखिलानां तत्त्वानां व्यवस्थितिः कथिता । तथा निखिलानां तत्त्वानामापूरकमाभीक्ष्ण्येन पूरकमध्वातीतं शिवाख्यं निष्कलं रूपं च कथितम् । "तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुतेः । यतो भवति यत् तत्त्वं यत् कारणं चापूरकमुपकरणं वा, तच्च कथितमिति ॥ ५ ॥

शास्त्रस्वीकरणाय कर्तारं स्वात्मानमभिद्योतयति[1] —

तत्त्वानामपि तत्त्वं येनाखिलमेव हेलया कथितम् ।
श्रीभोजदेवनृपतिर्व्यधत्त तत्त्वप्रकाशं सः ॥ ५ ॥

इति । तत्त्वानामपि तत्त्वं स्वरूपं येनाखिलं कृत्स्नमेव हेलयाश्रमेण पूर्वं कथितं, स एव तत्त्वप्रकाशं व्यधत्त विभागेन कृतवानिति । नन्वाप्तकृतत्वावबोधेन (न) शास्त्रस्वीकारः । शास्त्रस्वीकारस्य युक्तियुक्तावबोधपूर्वकत्वात् । तदुक्तं भट्टाचार्येण —

"कणान् वा भक्षयेत् कामं माहिषाणि दधीनि वा ।
युक्तियुक्तनिबन्धश्चेत् तद्धि ग्राह्यं मनीषिभिः ॥"

इति । नैतदेवम् । इतरेतराश्रयदोषप्रसङ्गात्[2] । श्रवणे प्रवर्तमानस्य युक्तियुक्तावबोधः, युक्तियुक्तावबोधे सत्येव[3] श्रवणे प्रवृत्तिरिति । तस्मादाप्तकृतत्वावबोध एवादौ श्रवणे प्रवृत्तिहेतुः । यथा[4] हि मनुना प्रणीतं व्यासेन प्रणीतमित्यादिक-

१. 'द्या' क. पाठः. २. 'त् । तथा श्र', ३. 'त्युपश्र' ग. पाठः.
४. 'त' ख. पाठः.

र्तृबहुमानात् प्रवृत्तिरिति युक्तं कर्तृसंकीर्तनमिति। अत्र निवृत्तिः कलाध्वा। तत्त्वाध्वा पृथिवी। भद्रकाल्यादिकालाग्न्यन्तान्यष्टोत्तरशतं भुवनाध्वा। क्षकारो वर्णाध्वा। ळकारो वाष्टाविंशतिपदानि पदाध्वा। सद्योजातहृदयाख्यौ मन्त्राध्वा।

पदोद्धार उच्यते—

"चतुर्वर्णं समुद्दिष्टं महादेवपदं हि यत्।
सद्भावेश्वरसंज्ञं तु पञ्चार्णं मुनिसत्तम!॥
महातेज[1] इति प्रोक्तं पदं वर्णचतुष्टयम्।
पदं पञ्चार्णमुद्दिष्टं योगाधिपतिसंज्ञितम्[2]॥
मुञ्चमुञ्चचतुर्वर्णं षड्वर्णं प्रथमात्मकम्।
शर्वशर्वपदं चात्र बोद्धव्यं चतुरक्षरम्॥
भवयुग्मं तथा तद्वद् भवोद्भवपदं पुनः।
पदमष्टाक्षरं चान्यत् सर्वभूतसुखप्रदम्॥
सर्वसान्निध्यपूर्वं तु करान्तं सप्तवर्णकम्।
पदमष्टाक्षरं ब्रह्मविष्णुरुद्र[illegible]रम्॥
अनर्चितं द्वि[3]रभ्यस्तमष्टार्णं पदमुच्यते।
असंस्कृतपदं तद्वत् पूर्वस्थितपदं तथा॥
साक्षि[4]न्तुरुपदे तद्वच्चतुर्वर्णौ[5] द्विरुक्तितः।
षट्पतङ्गपदे वर्णाश्चत्वारः पिङ्गसंज्ञके॥
तद्वज्ज्ञानपदं शब्दसूक्ष्माख्ये चतुरक्षरे।
द्व्यक्षरं स्याच्छिवपदं तथा शर्वपदं विभोः॥

---

१. 'देत इ' ग. पाठः. २. 'ज्ञकम्' क. पाठः. ३. 'द्रु', ४. 'क्षिं', ५. 'र्गैर्द्विरु' ग. पाठः.

सत्त्वं पृथिव्यादिक्षणिकतां साधयेत् । तथाहि[1]— क्षणिको यदि स[2] निष्पाद्यं सर्वं युगपदेव करोति, नह्युत्तरादिक्षणेष्वपि । तदेव सर्वं ज्ञायत (?) तत्कारणस्य विद्यमानत्वात् । नहि कारणे सति कार्यानुत्पत्तिर्घटत इति । नापि क्रमेण । प्रथमक्षण एवोत्तरादिक्षणभाविनां कार्याणां कारणभूतस्यास्य सद्भावेन विलम्बनासंभवात् । न च सहकारिप्राप्त्यनुरूपेण कार्यजननमिति वाच्यम् । सहकारिणा[3] क्रियमाणस्य कारणातिशयविनाशस्य वा कारणाद् भिन्नत्वे तदितरविश्ववदुपेक्ष्यत्वात् । तथानतिशयानिवृत्त्यतिशयाधानहेतुत्वे सहकार्यपेक्षकारण[4]भिन्नत्वेऽतदुत्पत्तौ तदुत्पादप्रसङ्गः । अतिशयाधानानतिशयानिवर्तकत्वे तदितरविश्ववत् सहकारिणामप्युपेक्ष्यत्वप्रसङ्ग इति । तस्मादर्थक्रियाकारित्वलक्षणसत्त्वविरहादसन्तोऽक्षणिका इति । अत्र प्रयोगः— यत् (क्रमा)क्रमाभ्यामजनकं तन्नास्ति यथा खरविषाणम् । क्रमाक्रमाभ्यामजनकाश्चाक्षणिका इति । तस्मात् पृथिव्यादिषु पक्षभूतेषूपलभ्यमानं सत्त्वं विपक्षे वृत्त्यसम्भवात् सपक्षाभावेऽपि क्षणिकत्वं साधयतीति । नैत[5]म् । अक्षणिकानामपि क्रमाक्रमाभ्यां सहकारिप्राप्तौ तथैव जनकत्वोपपत्तेः । ननूक्तं सहकारिणातिशयाधानं तदनतिशयनिवृत्तिर्वेति विकल्पोक्तं[6] स(त्त्व ? त्वा)दनुपपन्नमस्यैवातिशयत्वात् । यद् यस्य सद्भावे कार्यं करोति, स तस्यातिशय इति मृदादिकारणं

---

१. 'हि — अक्ष', २. 'स्व', ३. 'णां' ख. पाठः. ४. 'णे', ५. 'वं, क्ष' ग. पाठः. ६. 'क्तसत्युप' ख. पाठः.

चक्रादिसहकारिसमवधाने घटादिकार्यजनकमुपलब्धमिति तत् तदतिशय इति ॥ २ ॥

ननु न षट्त्रिंशत् तत्त्वानीति शक्यते वक्तुं, शरीरघटादेरपि सद्भावादित्याशङ्क्याह —

आप्रलयं तिष्ठति यत् सर्वेषां भोगदायि भूतानाम् ।
तत् तत्त्वमिति प्रोक्तं न शरीरघटादि तत्त्वमतः ॥ ३ ॥

इति । अयमभिप्रायः — शरीरघटादेस्तत्त्वलक्षणाभावाच्च तत्सद्भावेन तत्त्वाधिक्यम् । तथाहि — यद् आप्रलयावस्थायि सर्वभूतभोगकारणं तत्त्वमिति तत्त्वलक्षणं न शरीरघटादेरस्ति । तद्देशतत्काल[1]व्याप्त्यभावात् । तथा शरीरघटादीनां पृथिव्यादितत्त्ववृत्तिरूपतया बुद्धिवृत्तिरूपाध्यवसायादिवत् तत्त्वान्तर[2]त्वासम्भवाच्च न तत्त्वाधिक्यमिति । तदुक्तं गुरुदेवाचार्येण —

"ततत्वात् सन्ततत्वाच्च तत्त्वानीति ततो विदुः ।
ततत्वं देशतो व्याप्तिः सन्ततत्वं च कालतः ॥
लक्षादियोजनव्यापि तत्त्वमा प्रलयात् स्थितम् ।
अन्यथा स्तम्भकुम्भादिरपि [3]तत्त्वं प्रसज्यते ॥"

इति ॥ ३ ॥

प्रतिज्ञातार्थमुपसंहरति —

तत्त्वं यतो भवेद् यत् कारणमापूरकं च तत्त्वस्य ।
कथिता व्यवस्थितिर्यन्निखिलानामेव तत्त्वानाम् ॥ ४ ॥

---

१. 'तद्व्याप्त्य', २. 'स्य सम्भ' ख. पाठः. ३. 'स' ग. पाठः.

त्र्यक्षरं सर्वदपदं प्रणवादि नमो नमः ।
पञ्चवर्णं शिवायेति त्र्यक्षरं समुदीरितम् ॥
नतियुग्मं पञ्चवर्णं सतारं पदमुत्तमम् ।"

इति । ननु कुतः कथं कलानामुत्पत्तिः । शिवेच्छया बिन्दोरिति ब्रूमः । तदुक्तं गुरुदेवपद्धतौ —

"बिन्दोर्नादात्मकात् तस्माच्छिवेच्छातः प्रवर्तिताः ।
कलाः पञ्च निवृत्त्याद्या यासु विश्वं प्रतिष्ठितम् ॥
मन्त्राः पदैस्तानि वर्णैर्व्याप्तानीह समन्ततः ।
वर्णास्तु भुवनैर्व्याप्तास्तत्त्वैर्व्याप्तानि तानि च ॥
कलाभिस्तानि तत्त्वानि व्याप्तानीह कलाः क्रमात् ।
सदाशिवादिभूम्यन्तं शक्तितत्त्वं व्यवस्थितम् ॥
सदाशिवादिकं त्वेवं स्वकार्यं व्याप्य संस्थितम् ।
चतुर्युगमहापादं पृथिवीतत्त्वकन्दरम् ॥
कालतत्त्वात्तनाभं तत् पञ्चाशन्नावकण्टकम् ।
मायातत्त्वबृहद्ग्रन्थि शुद्धविद्याब्जशोभितम्[2] ॥
विद्येश्वरदलच्छन्नं शक्तिकेसरसंयुतम् ।
पीठमेवंविधं कल्प्यं मातृकाबीजसंभवम् ॥"

इति ।

"कलाध्वोक्ताङ्गसम्पूर्णो भुवनाध्वोक्तरोमधृक् ।
वर्णाध्वोक्तत्वचोपेतो मन्त्राध्वरुधिरान्वितः ॥
पदाध्वोक्तसिरामांसशुक्लमज्जास्थि[2]तत्त्वगः ॥
सदाशिवषडध्वात्मा तस्य प्राणः शिवः स्मृतः ।

---

१. 'र' ग. पाठः. २. 'ब्द' क. ख. पाठः.

परावरो महादेवो ध्याने सकलरूपधृक् ॥
निष्कलस्तदभावे तु अष्टात्रिंशत्कलात्मकः ।
आसनं मूर्तिरावाह्यमेतत् त्रितयमध्वनि ॥
व्याप्यव्यापकभावेन ज्ञात्वा यजनमारभेत् ।
आसनं शुद्धविद्यान्तं मूर्तिः शक्त्यन्तगोचरा ।
आवाह्यं शिवतत्त्वं स्यादेतच्छैवानुशासनम् ॥"

इति ॥

इति तत्त्वप्रकाशतात्पर्यदीपिकायां निवृत्त्याख्यः
षष्ठः परिच्छेदः ।

यस्याखिलं करतलामलकक्रमेण
देवस्य विष्फुरति चेतसि तत्त्वजातम् ।
श्रीभोजदेवनृपतिः स शिवागमार्थ-
तत्त्वप्रकाशमसमानमिदं व्यधत्त ॥

नमस्तस्मै भगवते भोजायाक्लिष्टकर्मणे ।
शिवाय शिवभक्ताय शिवैकाहितचेतसे ॥
नमः सर्वजगज्जन्मास्थितिभङ्गैकहेतवे ।
सर्वदैकस्वभावाय शिवाय शिवदायिने ॥
तत्त्वप्रकाशव्याख्यानं भक्तिनिर्भरचेतसा ।
अविज्ञाय कृतं यत्तु सन्तस्तत् क्षन्तुमर्हथ ॥

इति भारद्वाजकुलालङ्करणभूतेन शङ्करसूनुना विधिविहित-
सोमरसास्वादनपरितोषिणा शिवाङ्घ्रिकमलद्वयासक्त-
मधुकरायमाणमानसेन श्रीमता श्रीकुमारेण
रचिता तत्त्वप्रकाशतात्पर्यदीपिका
परिपूर्णा ॥

शुभं भूयात् ।

शुद्धिपत्रम् ।

पृष्ठम्.	पङ्क्तिः	अशुद्धम्.	शुद्धम्.
५६	७	१६	१७ (एतदनुसारेण विंश-श्लोकमभिव्याप्य संख्या शोध्या ।)
१४४	४	३९	३
,,	७	४०	४
१४८	१९	द्धया	द्धय
१७५	७	५	४

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—**दैवम्** (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—**अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ** by Krishnalîlâsukamuni.	0	2	0
No. 3—**नलाभ्युदयः** (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—**शिवलीलार्णवः** (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—**व्यक्तिविवेकः** (Alankâra) by Mahima Bhatta with commentary.	2	12	0
No. 6—**दुर्घटवृत्तिः** (Vyâkarana) by Saranadeva.	2	0	0
No. 7—**ब्रह्मतत्त्वप्रकाशिका** (Vedânta) by Sadâsivendra Sarasvati	2	4	0
No. 8—**प्रद्युम्नाभ्युदयम्** (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—**विरूपाक्षपञ्चाशिका** (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—**मातङ्गलीला** (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—**तपतीसंवरणम्** (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12—**परमार्थसारम्** (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—**सुभद्राधनञ्जयम्** (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0

	RS.	AS.	P.
No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Varya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Sri Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pada.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghatana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part II, 2nd Kanda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânânda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankara) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part III. 2nd Kanda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvananda (Part IV. 3rd Kanda)	1	8	0
No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmavatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Sri Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kavya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Raghavânanda.	0	8	0

	Rs.	As.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Sri Krishnananda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha)	0	8	0
No. 63—किरातार्जुनीयम् (Kavya) by Bharavi with the commentary Sabdarthadipika of Chitrabhanu (1, 2 and 3 Sargas)	2	8	0
No. 64—मेघसन्देशः (Kavya) by Kalidasa with the commentary Pradipa of Dakshinavartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni	3	8	0
No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Narayana with the commentary Vimarsini of Sankara (Part I. 1–6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Sri Bhojadeva with the Commentary Tâtparyadipika of Sri Kumara	2	0	0

Apply to:—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

IN THE PRESS.

1. Tantrasamuchchaya (Tantra) of Nârâyana with commentary by Sankara (Part II).
2. Îsânasivagurudevapaddhati (Tantra) of Îsânasivagurudevamisra.
3. Silparatna (Silpa) of Sri Kumâra.
4. Manjusrîmûlakalpa.
5. Yâjnavalkyasmriti with the commentary, Bâlakrida of Visvarûpâchârya.

Undertaken for Publication.

1. Arthasâstra of Kautilya.
2. Âsvalâyanagrihya with the commentary Anâvilâ of Haradatta.
3. Do. with Devasvâmin's Bhâshya
4. Pramânalakshana (Mîmâmsa) by Sarvagnâtmapâda.
5. Sarasvatîkanthâbharana (Vyâkarana) of Bhoja with the Vritti of Nârâyana.
6. Vishnusamhitâ (Âgama).
7. Uttaragârgya (Âgama).
8. Kâvyaprakâsa (Alankâra) with the commentary Sampradayaprakâsini of Sri Vidyâchakravartin.

DATE OF ISSUE

This book must be returned within 3, 7, 14 days of its issue. A fine of ONE ANNA per day will be charged if the book is overdue.